श्रौतचन्द्रिकाग्रन्थस्य सम्पादनम्

(AN EDITION OF ŚRAUTA-CANDRIKĀ)

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

विद्यावारिधि-(पी-एच्० डी०)-शोधोपाधिकृते

प्रस्तुतः शोधप्रबन्धः

निर्देशकः—
डॉ० युगलकिशोरमिश्रः
वेदाचार्यः, एम० ए०, पी-एच्० डी०
आचार्योऽध्यक्षश्च–वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

प्रस्तुतकर्ता—
देवेन्द्रनाथपाण्डेयः
वेदाचार्यः, एम० ए०
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी
पञ्जीकरणसंख्या-३२०/९२१

जून १९८४

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri
DHRUVA BOOK
BHU GATE, LANKA

T.Q
53,2

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

श्रौतचन्द्रिकाग्रन्थस्य सम्पादनम्

(AN EDITION OF ŚRAUTA-CANDRIKĀ)

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

विद्यावारिधि-(पी-एच्० डी०)-शोधोपाधिकृते

प्रस्तुतः शोधप्रबन्धः

निर्देशकः—

डॉ० युगलकिशोरमिश्रः

वेदाचार्यः, एम० ए०, पी-एच्० डी०

आचार्योऽध्यक्षश्च–वेदविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी

प्रस्तुतकर्ता—

देवेन्द्रनाथपाण्डेयः

वेदाचार्यः, एम० ए०

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी

पञ्जीकरणसख्या-३२०/९२१

जून १९८४

CC.O Sampurnanand University Collection. Digitized by eGangotri

सरस्वती भवन पुस्तकालय
आगत संख्या 166640
सम्पूर्णानन्द संस्कृत [illegible]

CC.O Sampurnanand University Collection. Digitized by eGangotri

मङ्गलम्

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ।
इदमहमनृतात् सत्यमुपैमि ॥

यजुर्वेदः

अनुष्ठेयस्य कर्मणः पालक , सर्वेषामग्रनेतः , त्वत्प्रेरणया शास्त्रकर्म अनुष्ठास्यामि । त्वत्प्रसादात् तत्कर्मानुष्ठातुं शक्तो भूयासम् । अहमस्मादनृतात्लौकिकात् कर्मणः उद्गत्य सत्यमलौकिकज्ञानरूपं श्रौतं कर्म प्राप्नोमि । मदीयं तच्छास्त्रकर्म निर्विघ्नं सत् समाप्तिपर्यन्तं सिध्यतु । तच्च सत्यज्ञानं मम सिद्धिं भूयात् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रमाणम्

'शौनकचन्द्रिकाग्रन्थस्य सम्पादनम्' इति विषयमधिकृत्य श्रीदेवेन्द्रनाथपाण्डेयेनानुसन्धात्रा यथानियमं १९७७वत्सरे, २०।५२९ संख्यया पञ्जीकरणमवाप्य मन्निर्देशेन परिश्रमेण कार्यमिदं सम्पूरितम्। ग्रन्थस्यास्य पाण्डुलिपिः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयीये सरस्वतीभवनग्रन्थागारे समुपलब्धा। तामिमां विशोध्य, यथास्थं टिप्पण-भूमिका- परिशिष्टादिभिश्च समलंकृत्य, विद्यावारिधि-(पी-एच०डी०) शोधोपाधये शोधप्रबन्धतया समनुसन्धानं प्रस्तुतं लोककल्याणकारिणी-प्रतीयते,

युगल किशोर मिश्र

(डा०युगल किशोर मिश्रः) 30/6/84

निर्देशकः

आचार्य एवं अध्यक्ष
वेद विभाग
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुरोवाक्

दैवेन्द्रनाथपाण्डेयोऽहं बिहारप्रदेशस्य पूर्णियामण्डलान्तर्गतं मधुबनीग्रामवास्तव्यः माध्यन्दिनशाखाध्यायी पराशरगोत्रोऽस्मि । बाल्यावस्थायामाधुनिकाङ्ग्लविद्यालयेऽधीयानस्यापि मम मनः संस्कृत-वाङ्मयानुरक्तमासीत् । पारिवारिकैर्बाध्यमानस्यापि मे प्रवृत्तिरत्र जाता, वेदमेवाहं पठिष्यामीति निश्चयश्च मयाकृतः । किंचिद्दिनानन्तरं मदीयाः पितृव्यस्य जामातारः विद्यायामभिरुचिधारकाः डा० आनन्दकिशोर-पाण्डेयाः (कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालये वेदव्याख्यातृपदमलङ्कुर्वा-णाः) निवेदनं मम स्वीकृत्य मां वाराणसीमानीतवन्तः । तेषां साहाय्येन नानाशास्त्रविद्भिः वेदवेदाङ्गपारङ्गतैः मीमांसामर्मज्ञैः विद्वन्मूर्धन्यैः गुरुवर्यैः वाराणस्यां संस्कृतविश्वविद्यालये वेदविभागाध्यक्षपदमधितिष्ठद्भिः डा० गोपालचन्द्रमिश्रमहाभागैरहमङ्गीकृतोऽन्तेवासितया कृपया । पूज्याः गुरुचरणाः ज्ञात्वा मम परिस्थितिं भोजनावासव्यवस्थादिकमकुर्वन्; वाराणसेयसंस्कृत विश्वविद्यालयादेव प्रथमारोहणमारभ्य आचार्यकक्षान्तं प्रायः स्वर्णपदकानां प्राप्तिपूर्वकं सान्निध्ये मया वेदाध्ययनं मूलार्थाङ्गोपाङ्गसहितं विहितम् । यावद्बुद्धिवैभवमध्ययनेनापि मादृशेन सर्वं वेदवारिधेः कणमपि ज्ञातमिति न तिरोहितमस्ति विदाम् । तथापि गुरुचरणाशीर्भिः सर्वं शक्यम् ।

वेदाचार्यपरीक्षोत्तीर्णतानन्तरं वैदिकवाङ्मये शोधकार्यार्थं प्रवृत्तेन मया प्राचीनग्रन्थानां तालिका सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीय सरस्वती-भवनग्रन्थालयस्थालोडने मन्त्रचन्द्रिकाग्रन्थस्य मातृका २०५० संख्या अधि-गता । अप्रकाशितत्वादस्य ग्रन्थस्य सम्पादनकार्यं शोधरूपेण मयाङ्गीकृतम् । अस्मिन्शोधकार्ये बह्व्यः समस्याः समापतिताः यासां व्याख्यानमत्र नोचितं मन्ये । आसामासां समाधानाय तस्मिन् समये गुरुचरणान्विहाय न कोऽपि वाराणस्यां सहायकरूपेणागतोऽभवत् परन्तु विधिः मां प्रति तेषां स्नेहं न सेहे । अकस्मादेव दिवङ्गमनं गुरूणामभूत् । पौषे सितपक्षे

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ग्रन्थो भाष्यसूत्रपाठसमन्वितो विश्रुतेन विद्वन्निकायेन श्रीमद्भागवतोक्तिः
मधुरचरणैः श्रीमदनुप्रविष्टात्मभिः प्रकाशिता । १८९६ वर्षे मधुर-
जन्माः प्राच्यपाश्चात्यविद्याविचक्षण विदुषा डा० युगलकिशोरमिश्रवर्यैः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदविभागाध्यक्षपदे अलङ्कृताः । तैरयं
शिष्यस्तु कनिष्ठभ्रातृवत् पुत्रवदेव स्नेहदर्शिकाः, तेषां सन्निदेशेन शोधकार्यमिदमारब्धम्।
तस्यैवेदं फलं प्रबन्धरूपम् ।

यद्यपि संपादनात्मकं शोधकार्यं सरलमिति प्रतीतिः । परन्तु कस्यचिदपि
ग्रन्थस्य सम्पादने महान् विवेकोऽपेक्षते । तत्रापि वैदिकग्रन्थानां सम्पादनमत्यन्तमेव
काठिन्यमावहति इति मेऽनुभूतिः । हस्तलिखितग्रन्थास्तु प्रायोऽतिप्राचीनशैल्यां
भवन्ति । अत एव आधुनिकानां कृते दुरूहत्वं भजते । अपराश्च समस्याः अशुद्ध-
पाठानां शोधनम्, टीकस्य भावानुसारमभिव्यक्तिकरणम्, उदाहरणे च प्रकरणादि
निर्धारणम्, टीकस्य समन्वयनम्, इत्यादीनि तत्त्वानि सन्ति । तथैवात्र प्रबन्धेऽपि
समस्या समुपस्थितासीत् । सर्वे समस्यागताः विषयाः यथाशक्तिक्रमेण समाहिताः ।
अस्य सौत्रकन्दिकाग्रन्थस्य द्वे प्रती समुपलब्धे स्तः प्रथमा प्रतिः पूर्णा, अपरा चापूर्णा।
तत्र प्रथमप्रतिलिप्यां सम्पूर्णं भाष्यसूत्रव्याख्यानपुरश्चरणान्तविषयाः सन्ति।
अपरस्यां प्रतिलिप्यां व्याख्यानं, पुरश्चरणञ्चेति द्वौ विषयौ वर्णितौ स्तः ।

तस्य ग्रन्थस्य प्रतिलिपिं कृत्वा पूर्णरूपेण पाठभेदपरीक्षणार्थं विभिन्नैः
विश्वविद्यालयैस्सह सम्बन्धः संस्थापितो मया । यथा–कुरुक्षेत्रविश्वविद्यालयेन–कानपुर-
विश्वविद्यालयेन, होशियारपुरशोधसंस्थानेन च । परन्त्वसफलतैव लब्धम् । उप-
लब्धया प्रतिलिप्या पाठभेदादिका समस्या यथाशक्तिसमाहिता। अन्यत्रैव संशो-
धनं, अत्र पाठः समान एव, क्वाचित्कं विहाय। टिप्पण्यामेव पाठभेदाः सूत्र-
प्रतीकान्यन्यान्यपि चिह्न– पूर्व–पूर्व– पदं सुनाम्नकीर्तितानि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अन्ततो प्रातःस्मरणीयचरणानां गुरुवर्याणां डा० श्रीगोपालचन्द्रमिश्र-महोदयानां वैदुष्यानां पादयोः महानुकम्पाभारं निवेदयामि । अथ वैदुष्यवि-भूषितानां निरतिशयं स्नेहभाजां भ्रातॄणां डा० विन्ध्येश्वरीप्रसादमिश्राणां शिक्षा-भागानाञ्च चरणयोः कृतं नतीः निवेदयामि ।

गुरुवर्याणां वेदविभागाध्यक्षाणां डा० श्री युगलकिशोर मिश्र महोदयानां कृते नास्ति कश्चित् शब्दराशिः कृतज्ञताज्ञापनाय । ये स्नेहधारया मामुत्साहयन्ति-दैनन्दिन सम्पादनसमस्यां दूरी कुर्वन्तः । तेषां कृते प्रणतीनां ततयो भवन्तु चिरन्तु । अथ च भ्रातॄणां डा० श्री नन्दकिशोरमिश्रमहोदयानामप्यहं योगदान-मविस्मरणीयं मन्ये । पाठभेदे, पाठशुद्धौ, विषयविभागे ग्रन्थस्य कलेवरसंघटने च मनसा, वाचा, कर्मणा ये सहायतां कुर्वन्तः । तेषां कृतेऽपि सादरभावं विहाय नास्ति शब्दसंघटना कृतज्ञताज्ञापनाय ।

विद्वन्मूर्धन्यानां पं० रामनाथदीक्षितमहानुभावानामपि सहयोगोऽत्र स्मरणीयः, स्मरणीयतमास्ति येः अतिवार्धक्येऽपि नियमेन ग्रन्थप्रतिलिपिः संशोधिता । तान् वेदविदुषः प्रत्यहं महानुभावस्य ।

डा० श्री कैलाशचन्द्रदवे (काशी हिन्दू विश्वविद्यालयीयवेदव्याख्यातृन्) महाभागान् कृतज्ञतां प्रकटयामि, ये मामध्यापयामासुः, शोधकार्ये च पुनः भूमिका संशोधनकार्ये सहायतां कृतवन्तः । डा० कैलेन्द्र महानुभावं प्रति धन्यवादं वच्मि येन परिपादनातिसूक्ष्म सम्पादनं कृत्वा महत्पूर्णकार्यं कृतम् । वस्त्रापहरणो-पाख्यानभागस्य टिप्पणी अकरम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पूज्यचरणानां न्यायिकलक्षाधिकारिपदमलङ्कुर्वाणानां श्रीकुबेर-पाण्डेयानां सौहार्दं अविरतं वात्सल्यं स्नेहाशिषं च सम्प्राप्य धन्यात्मानं मन्ये तेषां महत्याकाङ्क्षाऽऽसीत् ममायं पुत्रः शोधोपाधिं प्राप्नुयादिति । किमु वच्मि तेषां कृते नतिमन्तरा ।

उपसंहृतौ पादं शोधग्रन्थस्य निष्पन्नत्वात्, दाक्षिण्यपूर्णयोः भाषा शैथिल्ये दोषाणामन्याहतानां त्रुटीनां कृते विद्वद्भ्यो नूनं क्षमां प्रार्थये -

न शास्त्रकरणात्योऽस्मि सुधीः सुधारत्नवती,
निरुक्तिपाण्डित्ययुता कृतिनो गुणाग्रहः ।
सितावलिःखिन्न कल्पुतिरपीह पुंश्चिका,
नतिः कलमाकीर्ति रचयामि विवेचु ताम् ।

इत्यावेदयति

देवेन्द्रनाथ पाण्डेय
(देवेन्द्रनाथपाण्डेयः)
अनुसन्धाता

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणिका

(विस्तृता)

विषयविवरणम् — पृष्ठांकाः

भूमिकाभागः

उपोद्घातः १, वेदस्य अपौरुषेयता ६, वेदविभाजनम्, ११
वेदस्वरूपः १२, ऋग्वेदसंहिता १३, ऋग्वेदस्य शाखाः १३,
शाखानां परिचयः १३, शाकलशाखा १३, बाष्कलशाखा १४,
आश्वलायनशाखा १४, शांखायन शाखा १४, माण्डूकायनशाखा, १४
ऋग्वेदस्य कालः १५, ऋग्वेदस्य वैशिष्ट्यम् १६। यजुर्वेदः १८,
सामवेदः २२, सामशाखा २४, सामवेदस्य विषयः २५, उपलब्धाः
सामशाखा २६, कौथुमशाखा , राणायनीयशाखा ,
जैमिनीयशाखा , अथर्ववेदः २८, अथर्वमन्त्रलक्षणम् २९,
प्रादुर्भावविवेचनम् ३०, विषयाः ३१, ब्राह्मणभागविचारः ३५
ब्राह्मणविषयेमतान्तराणि ३८, स्वामिदयानन्द ३८, आचार्यकपर्दी
३८, मेदिनीकोषः ३८, बौधायनः ४०, महाभारतम् ४०,
वाचस्पतिमिश्रः ४०, उव्वटः ४०, विन्टरनित्सः ४१, बार्टे ४१,
मैकडानल ४२, डा० रामपूर्ति शर्मा ४२, उपलब्धानि ब्राह्मणानि ४२
ब्राह्मणम् (ऐतरेय ब्राह्मणम् शांखायन ब्राह्मणम्) शुक्लयजुर्वेदीय-
ब्राह्मणम् , शतपथब्राह्मणम् , सामवेदीय ब्राह्मणम् ४२ ताण्ड्य-
महाब्राह्मणम् ४२, षड्विंशब्राह्मणम् ४३, सामविधानब्राह्मणम् ४३
आर्षेयब्राह्मणम् ४३, देवताध्याय ब्राह्मणम् ४३, उपनिषद्ब्राह्मणम्
४३, संहितोपनिषद् ब्राह्मणम् ४३, वंशब्राह्मणम् ४३ जैमिनीयब्राह्मणम्
४३, अथर्ववेदीयं ब्राह्मणम् ४३, अनुपलब्धानि ब्राह्मणानि ४३,
वेदाङ्गसाहित्यम् ४५, शिक्षा ४६, प्रधानशिक्षाग्रन्थानां
परिचयः ४८, आपिशलशिक्षा ४८, भारद्वाजशिक्षा ४८, पाणिनीय
शिक्षा ४९, याज्ञवल्क्यशिक्षा ४९, वासिष्ठीशिक्षा ४९, कात्यायनी

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शिक्षा ४८, पाराशरी शिक्षा ४८, माण्डव्य शिक्षा ४९, अमोघानन्दिनी शिक्षा ४९, माध्यन्दिनी शिक्षा ५०, वर्णरत्नप्रदीपिका, केशवी शिक्षा मल्लशर्मशिक्षा स्वराङ्कुश शिक्षा , षोडशश्लोकी शिक्षा , अवसाननिर्णयशिक्षा , स्वरभक्तिलक्षणशिक्षा , प्रातिशाख्यप्रदीप-शिक्षा ५०, नारदीय शिक्षा , माण्डूकी शिक्षा ५१ ।

व्याकरणम् ५१, निरुक्तम् ५३, निरुक्तशास्त्राणां प्रमुख विषयाणां वर्णनम् ५९ , देवताविज्ञानम् ६१, स्वर्देवता अन्तरिक्षदेवता पृथिवीस्थादेवाः द्यावापृथिव्यादेवताः देव्यः ६१, युग्मदेवता देवतासमूहः ,गुणदेवता ६२, छन्दः ६३, प्रसिद्धानि छन्दांसि ६६ गायत्री उष्णिक् अनुष्टुप बृहती पंक्तिः त्रिष्टुप ६७, जगती ६८, ज्योतिषम् ६८, वैशिष्ट्यम् ७२, कल्पः ७५ , ऋग्वेदीयश्रौतसूत्रम् ७७, शुक्लयजुर्वेदीयश्रौतसूत्रम्, कृष्णयजुर्वेदीय श्रौतसूत्राणि ७८, गृह्यसूत्रम् ७८ ऋग्वेदीयगृह्यसूत्रम् ७८, शुक्लयजुर्वेदीयगृह्यसूत्रम् ७८, कृष्णयजुर्वेदीयगृह्य-सूत्राणि ७८, धर्मसूत्रम् ७८, शुल्वसूत्रम् ७९, श्रौतसूत्र विचारः ८० रचनाकालः ८२ पंचाग्निवर्णनं ८५, वैदिकयज्ञारम्भः ८५, दर्शपौर्णमासौ: यज्ञम् ८५ प्रसिद्धानि श्रौतसूत्राणि ८५, आश्वलायन श्रौतसूत्रम् ८५, शांखायन श्रौतसूत्रम् ८६, शुक्लयजुर्वेदीयं श्रौतसूत्रम् ८६, कात्यायनश्रौतसूत्रम् ८६, कृष्णयजुर्वेदीयं श्रौतसूत्राणि ८६, बौधायनआपस्तम्ब, हिरण्यकेशी ८६, वैखानस-भारद्वाज-मानव-वाराह-काठक-वाधूलश्रौतसूत्राणि ८७, श्रौतग्रन्थिकाव्यपदेशसूत्रम् ८७, श्रौतग्रन्थिकाउल्लेख: ८८, श्रौतग्रन्थिकागत-श्रौतसूत्राणां परिचयः ९१, आश्वलायन-शांखायन बौधायनापस्तम्ब हिरण्यकेशी भारद्वाज कात्यायनश्रौतसूत्राणि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

श्रौतसूत्रिकाग्रन्थस्थौच्यौगिता ९४, रत्नाकरः ९५, ग्रन्थाराध्यायणां
परिचयः ९६, धूर्तस्वामी ९६, भाष्यवृत्ति ९७, रामाग्निचित् ९८, रामाण्डार-
व्यपदेशमूलम् ९, तद्धेव ९९, बोधायनः १००, कपर्दी: १००, गोपालः १०१,
भवस्वामी १०१, दर्शपूर्णमासप्रयाणः १०२, द्रव्यम् , विधिः १०३,
अथाग्न्याधेयम् १०४, ,ग्न्याधानो पिकारिणः १०५, पुरश्चरणम् १०६ ।

—००—

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणिका

विषयविवरणम् **पृष्ठांकाः**

सूत्रादि १०८– २३४

मंगलाचरणम् १०८, धर्मप्रतिपादनम् १०८, धर्मप्रमाणम् ११०, धर्मे ऽधिकारिणः ११०, धर्मस्यावश्यानुष्ठेयत्वम् १११, आन-कर्मसंज्ञा ११२, अध्ययनम् ११४, यज्ञाः ११६, निर्णिदेशः ११७, अधिकारिविशेषणम् उपपातकानि ११८, अग्न्याधानविवेचनम् ११९, वैदिककर्मप्रशंसा १२०, नियमातिक्रमे दोषः १२२, स्थण्डिलोपादानम् १२४, इष्टिसंस्थाः १२६, सोमसंस्थाः १२८, पाकयज्ञविवेचनम् १२८, ऋत्विजां प्रतिपादनम् १३६, दर्शपूर्णमाससंकल्पः १४०, कर्मादौ द्रव्यदेवताक्रमानुसन्धानार्थं देवतानुक्रमः १४०, दर्शपूर्णमासे देवतात्वादि विचारः १४२, यागांगत्वविचारः १५१, उपांशुक्रिया विवेचनम् १५५, करणमन्त्र-कर्तृत्वविचारः १५७, सोमयागस्यानन्यकृत्यत्वम् १६०, व्रीहिनिर्वापः १६१, परिस्तरणम् १६३, व्रतोपायनम् १६६, यज्ञशालाच्छेदनम् १६६ आहवनीयागारप्रवेशनम् १७१, आहवनीयाभिप्रणयनम् १७३, स्रुव-करणम् १७६, बर्हिषः सम्भरणम् १७७ इध्मकरणम् १७८, वेद-करणम् १८१, पिण्डपितृयज्ञविचारः १८२, पिण्डपितृयज्ञस्याहुतिकाल विचारः १८४, पिण्डपितृयज्ञेतिकर्तव्यता १८६, पिण्डप्राशनम् १९१, पात्रासादनम् १९२, सान्नाय्यपात्रप्रोक्षणम् १९८, सान्नाय्यदेवता विचारः २०१, स्तोकानुमन्त्रणम् २०२, वाग्विसर्गः २०४, अग्नि-परिस्तरणम् २०६, आसनासनविचारः २१०, वत्सायुधानां आदानम् २१२, पवित्रकरणम् २१५, अपां प्रणयनम् २१६, अध्वर्युयजमानानां वाग्यमः २१७, शकटधुरभिमर्शनम् २१८, हविर्निर्वापः २२०, द्रव्यदेवता-विचारः २२१, उपांशुयाग विचारः २२२, अग्नीषोमीयविचारः २२३, पुरोडाशकपाल विचारः २२४, आहवनीयेडावदानम् २२६, उत्खनन विचारः २२८, पुरोडाशस्थानां प्रोक्षणम् २२९, कृष्णाजिनास्तरणम् २३१

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शुभ्राणां निर्णयनम् २३४, पौर्णमासकर्मविचारः २३७, विष्टिविप्रलम्भनम्
२३८, पिण्डकरणम् २४४, पत्निकर्तृत्वविचारः २४९, मधीदय्यावधिन-
विचारः २५७, पत्नीसन्नहनविचारः २६१, कृष्णाजिनानुमन्त्रणम् २६४,
वर्णां प्रोक्षणम् २६६, बर्हिः षोडशविचारः २६७, आयतनविचारः २६८,
सुचाभिघारणविचारः २७१, पुरोडाशासादनम् २७७, समिदाधानम् २७८,
उपस्थानमन्त्रम् २८०, होताधिकरणम् २८३, प्रयाजहोमः २८४, प्रयाजेऽनुयाजादि-
स्वरविचारः २८५, पुरोडाशनिर्वापः २८६, पार्वणहोम २९२, प्राशित्रावदान-
विचारः २९२, प्राशित्रहरणम् २९८, अन्वाहार्यपचनम् २९९, अनुयाजविचारः
३०२, परिधिनिधानविचारः ३०६, पत्नीसंयाजविचारः ३०७, पत्नीसंयाजानुमं-
त्रणम् ३०९, संयुक्तकरणविचारः ३११, प्रायश्चित्तहोमादिविचारः ३१२,
यजुर्विहितहोमविचारः ३१५, समिष्टयजुर्होमविचारः ३१७, यज्ञपुनरारम्भविचारः
३२१, प्रायश्चित्तकालमध्ये अन्यहोमाकरणविचारः ३२२, कृतपर्वविचारः
३२४ ।

उत्तरार्द्ध ३२७–४५०

अन्वाधानम् ३२७, काम्यविचारः ३३०, गोपालविचारः ३३१,
आपस्तम्बविचारः ३३२, सत्याषाढविचारः ३३४, पूर्वस्मादिविचारः ३३५,
रामाण्डारविचारः ३३५, शास्त्रदीपिका ३३६, वात्स्यायनः ३३६, अन्वा-
धानसंभारा ३३७, यानस्पत्यः ३३७, अन्वाहरणे विशेषः ३३८, कात्यायन-
मतम् ३३९, विष्णुपुराणे ३३९, यजमानकालविचारः ३४०, शुद्धिमागणम्
३४३, गोपालमतम् ३४४, विहारविचार ३४५, वैश्वानरणविचारः ३४६,
चतुरङ्गकृतिकथनम् ३५२, विहारकरणोपायः ३५२, व्रतविचारः ३५६,
व्रतोपायनम् ३५७, पुष्पाहवाचनम् ३५८, उपव्याहरणम् ३५९, ऋत्विजां
वरणम् ३६१, देवयजनयाचनम् ३६४, ऋत्विजां धर्मः ३६७, वात्स्यायनमतम् ३६८,

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वरणावंशाः ३७०, प्रयोगक्रमः ३७२, ब्रह्मावरणम् ३७४, होतृवरणम् ३७५, अध्वर्युवरणम् ३७५, आग्नीध्रवरणम् ३७५, मधुपर्काहरणविचारः ३७६, आश्वलायनानुसारी प्रयोगक्रमः ३७७, बौधायनीयाः मधुपर्कः ३८०, गार्हपत्याद्युद्धरणप्रोक्षणविचारः ३८२, अंगारोपकल्पनम् ३८५, सम्भारहरणविचारः ३८७, गौपितृयज्ञविचारः ३८८, उपस्थानविचारः ३८८, पात्रासादनम् ३९४, अश्वप्रयोगः ३९७, राष्ट्रभृद्धोमः ४०७, आपस्तम्बविचारः ४०८, आमात्यहोमाः ४१०, प्राजापत्यहोमः ४१५, प्रायश्चित्तविचारः ४१८, अरणिप्रदानम् ४२२, अरणिमन्थनम् ४२७, अग्नेरादानम् ४३०, अग्न्याधानपद्धतिः ४३२, सभ्यावसथ्यौ: करणम् ४३८, आपस्तम्बविचारः ४३८, अग्निहोत्रम् ४४३, आश्वलायनमतम् ४४६, गोपालविचारः ४४७, दानम् ४४९, पुनिरु विचारः ४५२, सायमग्निहोत्रहोमः ३७६, पर्यावर्तविशेषः ४६२, देवतासंकल्पः ४७८, पुनराधेयम् ४८५, पुनराधेयकालविचारः ४९० ।

परिशिष्टभागः

		पृष्ठांकाः
परिशिष्टम् १–	आश्वलायनहौत्रसूत्रम्	५०२
परिशिष्टम् २–	दर्शपूर्णमासवंशसंकलनम्	५१०
,, ३–	पात्राणां स्वरूपम्	५११
,, ४–	पारिभाषिक शब्दाः	५१५
,, ५–	दर्शपूर्णमासयोः विधिवाक्यसंकलनम्	५२३
,, ६–	वैदिकवाङ्मयस्य संक्षिप्तविवरणम्	५२४
,, ७–	सहायकग्रन्थानां सूची:	५३३
,, ८–	शब्दसूची:	५३५
,, ९–	ग्रन्थकाराणां नामानि	५३७
,, १०–	यज्ञपात्रचित्राणि	

—ooo—

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भूमिकाभाग:

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उपोद्घातः

वेदः

प्रथमतस्तावत्किं नाम वेदत्वमिति जिज्ञासायां बहुभिराचार्यैः विद्वद्भिश्च स्वाभिमतानुकूलतानिदर्शं वेदशब्दस्य युक्तिविभिन्नाः व्याख्याः स्वस्वशास्त्रेषु कृताः । तत्र च - [१]"अपौरुषेयं वाक्यं वेदः।" इत्येके,

"मन्त्रब्राह्मणयोर्वेदनामधेयम्" इत्यपरे ।

"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो बोधयति वेदयति वा स वेदः" इत्यन्याचार्याः ।

"ऋषिर्वेदः" इत्यपि अन्यः ।

नैवं केवलं प्राचीनाचार्यैः सायण प्रभृतिभिरेव वेदस्य परिभाषा भाषिता, प्रत्युत प्राश्चात्यविद्वांसोऽपि तत्परिभाषणे प्रयत्नं कुर्वन्तः स्वबुध्या विलक्षणां वेदस्य भाषितवन्तः । तत्र प्राचीनाचार्याणां परिभाषणात् वेदस्य कर्मकाण्डमात्रोद्देश्यं परिलक्ष्यते । ते "वेदा हि यज्ञार्थमभिप्रवृत्ताः" इत्यस्यैव वाक्यस्यानुयायिन आसन् इति प्रतीयते । परन्तु विचारणीयोऽयं विषयः यत् किञ्चिद् न वैशिष्ट्यमन्यदपि विलसति, वेदे येन, पुरातनकालादद्यावधि स्वरूपं तस्य पूर्ववद् एवास्ति ।

वेदपदार्थ एव सर्वेषां लौकिक- पारलौकिक वस्तूनां समावेशोऽस्तीत्यस्माकं प्रत्ययः ।

---

(१)

१- सर्वसंग्रहः ।

२- आपस्तम्ब परिभाषासूत्र ।

३- सायणाचार्यमतम् ।

४- हरदत्तः ।

५- वैजयन्ती कोषः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदशब्दस्य त्रिविधं रूपं पुरः समुपस्थितं भवति । किं तावद्- 'वेदमधीत्य स्नायात्' 'इत्यत्र उत वेदं कृत्वा वेदिं करोति' अत्र वा पठिते वेदे तात्पर्यम् ? उच्यते प्राधान्येन व्यपदेशा भवन्ति' इति वचनात् सर्वोऽपि शब्दराशिरेव एतत्र ज्ञातव्यः । एवञ्च मूलाभावे कुतः शाखा ' इति लौकिकन्यायेनैव वेदग्रन्थं विना वेदं कृत्वेति श्रुते रनुपपत्तिः । अतो वेदोः यजुर्वेदीयो वेदः स मंत्र ब्राह्मणात्मकः ग्रन्थः । अथर्ववेदस्य प्रथमवेदपदार्थाव्यञ्जकत्वात् कर्मकाण्डभागस्य प्रथमस्यांगत्वान्मीमांसापरत्वाच्च वेदपदार्थस्य प्रथमं व्याख्यानं युक्तमिति। वैदिक वाङ्मये वेदशब्दोपरि विस्तररूपेण विचारः प्राप्यते । काठक: मैत्रायणी तैत्तिरीयादि संहितासु अन्यग्रन्थेषु च वेदस्यार्थोऽवबुध्यते ।

यथा-

(क) वेदेन वै देवाः असुराणां वित्तं वेद्यमविन्दन्त तद्वेदस्य वेदत्वम् ।

(ख) वेदिर्देवेभ्यो निलायत , तां वेदेनान्वविन्दन् । वेदेन वेदिं विविदुः पृथिवीम् ।

(ग) पुरुषार्थानां वेदयिता वेद उच्यते ।

(घ) नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्ति , तस्मादाहुर्वेदा इति ।

(ङ) आयुरस्मिन् विद्यतेऽनेन वा आयुर्विन्दतीति आयुर्वेदः ।

(च) तमायुर्वेदयतीत्यायुर्वेदः ।

(छ) नाट्यस्य वेदनं यत्र ज्ञानं विचारश्च यत्र तन्नाट्यशब्देन उच्यते।

(ज) विदन्त्यनेन धर्मं वेदः ।

(झ) विदन्ति धर्मादिकमनेनेति वेदः ।

(ञ) व्युत्पाद्यते च वेदशब्दः विदन्त्यनन्यप्रमाणवेद्यं धर्मलक्षणमस्मा-दिति वेदः ।

१- (क) तै०सं० १-४-२० वैदिक संशोधनमण्डल पूना ।

(ख) तै० ब्रा० पृ० ६५२ भाग-२ ।

(ग) भट्टभास्करः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(ट) निःश्रेयसकराणि कर्माणि आवेदयन्ति वेदाः ।

(ठ) वेदयन्तीति वेदाः ।

(ड) ऋषिर्वेदः , स्तुतं ऋषिणा इत्यादौ दर्शनात् ।

(ढ) ऋषिस्तुवै ।

(ण) ऋषिर्वेदः तदध्ययन- विज्ञान-तदर्थानुष्ठानातिशययोगात् पुरुषोऽप्यृ-
षिशब्दः ।

(त) ऋषिर्वेदे इत्यादि ।

परन्तु विवेचनीयोऽयं विषयः यत् यावन्तोऽर्थाः वेदशब्दस्य व्युत्पत्त्या जाताः तावन्त एव| [अथवा] कश्चिदन्योऽपि अर्थः संभाव्यते इति विचारे , वेदस्य विश्वज्ञानत्वात् वेदः विश्वस्य संविधानमिति कथनं भवति । शब्दान्तरेण मैकडानल महोदयोऽपि तदेव कथयति । अस्य मते वेदः विश्वस्य प्रथमः पुस्तका[1]लयोऽस्ति।

- -

(थ) । पिप्पलादश्रुतिः ।

(द०) सूत्रस्थान [illegible] वृ ।

(ध) सूत्रस्थान चरक सं० ७ पृ० भा० चौ० वि० भा०।

(न) अभिनवगुप्तः । नाट्यशास्त्र पृ० १५३।

(प) अमरकोषः ।

(फ) सर्वानन्दः ।

(ब) गंगानाथ झा ।

(ट) कपर्दी भाष्यम् आप० श्रौ०सू० ।

(म) वाचस्पत्य कोषः ।

(१) संस्कृतसाहित्येतिहासः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एतच्छब्दव्युत्पत्त्यभिप्रायोऽयं प्रतिभाति यत् सांसारिकव्यवहारोपयोगि ऐहलौकिक पारलौकिक पदार्थाः सर्वे वैदिक वाङ्मये व्याख्याताः सन्ति । वेदातिरिक्तः अन्यः कश्चित् पदार्थः संसारे नित्यो नास्ति द्वितीयश्चार्थोऽयम् यदनेन लभ्यन्ते सत्यार्थाः । यथा युगान्ते[1] तिरोभावमाप्तः । एतत्-शब्देभ्यः वेद एव संसारस्य कारणमित्यपि वक्तुम् उचितमेव प्रतिभाति ।

अस्मिन् विषये केषाञ्चित् विदुषां मतानि प्रस्तूयन्ते ।

(१) स्वामिदयानन्दमहोदयः[2]:-

" वेदशब्दार्थनिर्वचनम् - विद् धातोः घञ्, वेदयन्ति जिज्ञासवो । विद् ज्ञाने, विद् विचारणे, विद्लृ लाभे, विद् सत्तायाम् इत्यादिधातुभ्यो तथा लाभस्येति सत्योऽर्थाः सिध्यन्ति ।

(२) विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति अथवा विन्दन्ते ।

लभन्ते, विन्दन्ति विचारयन्ति, सर्वे मनुष्याः सत्यविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः । इत्येवं स्वामिदयानन्दः सरस्वती:।

- -

१- युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वं पूर्वाचार्य महर्षिभिः ।

२- ऋ० वे० भाष्यभूमिका ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(ख) (३) मन्त्रब्राह्मणं[1] वेद इत्याचक्षते ।

(४) आम्नायः पुनर्मन्त्राश्च[2] ब्राह्मणानि । च । अनेन प्रकारेण वेदविषये पाश्चात्त्य विद्वांसो ऽपि स्वमतमेवं प्रकटी कुर्वन्ति । यथा-

Veda means originally knowing or knowledge, and this nam is given by the Brahamans not to one work but to the whole body of there most ancient sacred literature. "Maxmuller"

Veda is the same word which appears in the Greek Oido. The name of veda is comonly given to Four collections of himns which are respectively known by the name of Rgveda Yajurveda. Samaveda and Atharvaveda but Forour own purposes, namely for tracing, earliest growth of religious. Idea in India the only important the only real veda is the Rgveda.
----History of Indian Literature.

एवं हि इदं निश्चीयते यत् वेदः भारते आविर्भूय विश्वं व्याप्नोति आ भुवनेषु स्वयं विश्वजनेषु विचरति नानारूपेण ।ईश्वरः विभारूपेण प्रत्येकेषु विश्वेषु विचरति तदतिरिक्तेषु अविभक्तेन तिष्ठति ।अतो विश्वस्य प्राणं वेदस्य ।अस्मिन् सांख्यदर्शनस्य प्रकृतिपुरुषः संयोगकरः,वेदान्तस्य ब्रह्म-जीवैक्यविधाता: ।अस्मिन् सृष्टिसृष्टा अस्मिन् लयप्रलयः ।अस्मिन् विश्वाधारभूतो विविधः इति भावतो वेदस्य विषये परिचयप्रस्तावितम् ।

—:o:—

१- बौधायन गृह्यसूत्रम् ।

२-कौशिक सूत्रम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदस्य अपौरुषेयता

वेदस्य विश्ववाङ्मयाधिभूतत्वात्तद्विषये बहुभ्यः कालेभ्यः तस्य कर्तृत्वेषणायाः परम्परा यथावधि जीवति । संसारस्य साहित्येषु वैदिकसाहित्यस्य मूर्धन्यत्वाच्च , विकासक्रममधिकृत्य भक्तानां शंकाः श्रुतिगवेषकाणां कुशाग्रधि-रा/मति । प्रागपि बहुभिराचार्यैः पाश्चात्यपण्डितैः तदनुयायिभिश्च विविधविधाः शंकाः समुत्पादिताः ।

विज्ञानवेत्तारः कियांसोऽपि अस्मिन् विषये नैव तूष्णीं स्थिताः, यथाशक्ति प्रयत्नवद्भिरपि तैः सोऽस्य वेदस्य कर्तृज्ञानाय परन्तु नैव सफलतामाप्नुवन्। अस्य कारणं वेदस्य तपः पूत प्रज्ञावापन्नानां महर्षीणां तपोविभवत्वमेव , उक्तं यथा- युगान्तेऽन्तर्हितान्वेदान् (अ) सेतिहासान् महर्षयः ।

लेभिरे तपसा पूर्वं पूर्वाचार्यमहर्षिभिः[१] ।

वेदस्य अपौरुषेयता पौरुषेयता च इत्युभयविधविवादयोः समाधानं वेद एव संस्थापयति ~~संस्थापयति~~ स्वतः प्रामाण्यात् ।

(अ) अर्थात् पौराणिकमान्यतानुसारेणैकसप्तति चतुर्युगाणामेकं मन्वन्तरं भवति प्रत्येकस्य चतुर्युगस्यमध्ये द्वापरयुग समाप्तिकाले विशिष्ट तपस्यान्वैः महर्षिभिः एकात्मकस्य वेदस्य चतुर्धा विभाजनं क्रियते । विभाजनमिदं कलियुगादेव प्रवर्तते , कलि समाप्तौ च समाप्यते उक्तं यथा-

चतुर्युगेष्वथ व्यस्ता द्वापरान्तेमहर्षिभिः ।
वेदान् महर्षयो व्यस्यन् वृद्धया च्युत चोदिता ।

—ऋ० कां० पृ०५० का आलोचनात्मक अध्ययन,
डा० श्री किशोर मिश्र ।

(१) अनुज्ञाता स्वयंभुवा ' इति पाठः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्मदभिज्ञायां वैदिकपरम्परायां प्राचीनानामाचार्यवरेण्यानां विपश्चिताऽनूचानानाञ्च प्रमाणं प्राचुर्यान्नैवात्राऽवधीयते , श्रुतेः संचयिभिर्गौणान्वेषणाय । प्रथमं तावच्छ्रुतिरित्यस्यार्थेनैव श्रवणेन्द्रिय जन्यस्य शब्दराशेराकर्णितत्वान्नित्यत्वं गम्यते । "ऋषयो मंत्रद्रष्टारः" इत्यनेन दर्शनं कस्यचित्पदार्थस्य चक्षुरिन्द्रियसाध्यमेव, अतः प्रायोगिकरूपेणैव कस्यचिद् वस्तुनः प्रत्यक्षीकरणमुपलभ्यते ।

अतो ऋषिर्दिव्यदृष्टिप्राप्तत्वाद्यः दर्शकः मंत्राणामिति भावः । ऋषीणामेवैषं परम्परा, वैदलौकिकपरम्परायां पोषिताः पुरुषैः परिशीलनचिरकैरनुगम्यमाना ।"ऋषिर्दर्शनात्" "ऋषिः मन्त्रद्रष्टा" इत्युभयत्र साक्षात्कृतत्वादेव तेषाम् ऋषिः कविश्चेति व्यपदेशः सार्थकः । अतएवोच्यते "साक्षात् कृतधर्माण ऋषयो बभूवुः" इति ।

साक्षात्कारे उभयत्र समानधर्मत्वात् नैव कश्चित्सम्बन्धः उररीकृतः स्यात्। एकः [1] अन्यं साक्षात्करोति अन्यश्चान्यं तथैव । अस्मादेतोः वेदवाणी वेदस्य अपौरुषेयत्वे

वेदाः नित्याः सन्ति । यदि नित्यस्य वस्तुनः परीक्षणमनित्यवस्तुना क्रियेत तदा शाश्वतात्मकं प्रमाणभूतं किञ्चिद् वस्तु नैवावशिष्येत । सूर्यो यथा रात्रौ अन्तर्हितो भवति, तथैव वेदा अपि युगान्तेऽन्तर्हिताः सन्तः पुनश्च युगादौ प्रादुर्भवन्ति ।अतो शास्त्राणां प्रकृतप्रामाण्यात् स्वतः प्रामाण्याच्च वेदानामपौरुषेयत्वमेव सुस्थितं भवति ।

वेदे यावन्तोऽपि पदार्थाः सन्ति ते सर्वे नित्या एव । अतो हि मीमांसकैरप्येवम् प्रत्यभिज्ञाबलात् शब्दानां नित्यत्वं प्रतिपादितम् । अत एव शब्दराशेर्वेदस्यापि नित्यत्वम्। यन्नित्यं तद्ब्रह्म । अत एव वेदराशेः ब्रह्मनाम्ना व्यपदेशोऽप्यस्ति।

१- भावोऽयं यद् यथा सिंहः पुरुषं साक्षात्करोति तथैवारण्ये पुरुषोऽपि सिंहं पश्यति समानदर्शनक्रियारूपत्वात् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदानामपौरुषेयत्वं साधयितुं जैमिनिः सूत्रे "कृते वा विनियोगः कर्मणः सम्बन्धात्" इत्यस्मिन् सूत्रे एकां दिशं ततः समुन्नामितः । सायणाचार्येणास्य सूत्रस्य व्याख्याने वेदानामपौरुषेयत्वमेवं साधितम्। यथा- "यदि नाम वेदाः पौरुषेयाः स्युस्तर्हि कथं स्वर्गादिफलार्थं ज्योतिष्टोमादि-यागानां विनियोगः संभवेत् ? ज्योतिष्टोमयागः साधनम् , स्वर्गश्च साध्यः। इत्युभयं कथं नाम अल्पज्ञः पुरुषोऽवगन्तुं शक्नुयात् -

ज्ञानाभावे च कथं स्वर्गार्थं ज्योतिष्टोमस्य विनियोगस्तेन क्रियेत ? अतोऽनुमीयते वेदवाक्यं मानवमस्तिष्कजन्यम् । सर्वज्ञः परमेश्वर एव एतादृशस्य अलौकिकस्य ज्ञानस्य दाने समर्थः ।[1] वेदान्तर्निहितज्ञानस्य नित्यत्वमादाय ज्ञाना-त्मकस्य वेदस्य नित्यत्वमपौरुषेयत्वञ्च साधितम् ।

ऋग्वेदभाष्यभूमिकायामपि विषयमिममवलम्ब्य पूर्वपक्षं समुप-स्थाप्य तस्य खण्डनञ्च कृत्वा वेदस्यापौरुषेयत्वं प्रतिपादितम् सायणाचार्येण।

तथा चायं पूर्वपक्षः:-

१- वेदांश्चैके सन्निकर्षं पुरुषाख्या ।

२- अनित्यदर्शनात् ।

३-

इति सूत्रद्वयमादाय पूर्वपक्षं प्रदर्श्य तत्खण्डनम्- वेदस्यापौरुषेयत्वं संसाधितम् । तत्रोक्तञ्चोत्तरपक्षे-

१- उक्तं तु शब्दपूर्वत्वम् ।

२- आख्या प्रवचनात् ।

३- परं तु श्रुतिसामान्यमात्रम् ।।

१- पू० वेदस्वरूप निर्णयः, पृ० सं० ३८१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

बादरायणेनापि देवताधिकरणे क्वचिन्नयाभिप्रायेण आकाशादिवत् वेदस्य नित्यत्वमङ्गीकृतम् ।सूत्रं यथा 'अतएव च नित्यत्वम्' इति ।

श्रुति स्मृतिभ्यां वेदस्य नित्यत्वमेवं निर्णीतम् -

(१) श्रुतिर्यथा- वाचा विरूपनित्यया

(२) अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।इति ।

इदानीं शब्दवेदस्य पौरुषेयत्वविषये संभाव्यमानानां सर्वेषां मतानां विरोधिशंकानाञ्च सारल्येन समाधानं, विस्तरेण च खण्डनं विभिन्नैः विपश्चिद्वरेण्यैः विहितम्। यद्यपि नैव कस्मिंश्चित्तत्स्थलेऽल्पमपि शंकायाः अवसरः , तथापि सर्वेषां प्राचीनाचार्याणां मतानांमतान्तराणाञ्च यथार्थं परिशीलनेन सम्प्रतीति कृतं खण्डनं वेदस्यानित्यत्वपौरुषेयत्वयोर्विषये । अतः प्रसक्तेऽपि स्वीय किञ्चिद् वक्तु परम्परायाः कश्चित्कार्यं न भवति । स्वस्यैव संस्काररूपेण तत्पालकानां तस्याः अनुयायिनां बुद्धौ सा तिष्ठति । एवं च तदनुकूला एव प्रवृत्तिर्मानवानां भवति । तां परम्परामनुसृत्य ये संस्काराः समुदिता भवन्ति ते संस्काराः विचारधारया भावनामारोहन्ति । सैव भावना मीमांसकानामपि शाब्दी एव काचन विचार सरणिः भावनापद वाच्या भवितुमर्हतीति मन्ये .। यतो हि पुरुषस्य विचार एव कदाचिद् संकल्परूपमास्थाय कस्मिंश्चिद् व्यापारे पुरुषं प्रेरयितुं समर्थो भवति ।

उक्तंयथा भावनायाः[1] स्वरूपम्-

'भवितुर्भवनानुकूलो भावयितुर्व्यापार विशेषः। सा च द्विविधा शाब्दी-आर्थी चेति ।'

पृ० टि०(१) अर्थ संग्रहः । भावनाविचारः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सामान्योऽयं नियमः यत्तु स्वपरिवार एव गुरु-शिष्य- परम्परायां यानि खलु पुरातनैः पूर्वैः कृतानि कार्याणि तान्येवानुतिष्ठन्ति पारिवारिकाः। तत्र नैव शंका समुदेति समाधानं तु दूरापेतम् । अत एव अध्ययनपरम्परायां नियमो उक्तमस्ति भारते -

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् । इति एवं च -

"स्वाध्यायोऽध्येतव्यः" इति विधिवाक्यस्याध्ययनमेवाभिप्रायः। अध्ययनस्य तात्पर्यं गुरुमुखोच्चारणानूच्चारणमेव ।

अत केवल पाश्चात्याः भौतिकमूला विचारणशीलाः वेदविषये पौरुषेयत्वप्रमाणपरियोजने प्रयतन्ते । ते च वैदिकयुगोऽविकसितसमाजस्य युग आसीदिति - कथने नैव संकोचमनुभवन्ति । तांश्चोपस्थाप्य स्वामिपादैः करपात्रमहाभागैः प्रखरखण्डनस्याधारं तर्कखण्डमिदं वचनम् । यथा-

"एवं यदि शब्दराशिमनित्यमेव संसाधयितुः तदा तत्र कथनस्य शब्दस्यापि संगतिः, अतः कथमनित्यं प्रमाणं स्यात् ?" नैव सर्वे वैदेशिकाः वेदपरिशीलनतत्पराः , विचारकाः वेदमर्मज्ञाः जिज्ञासवः, तत्तुल्या एव , प्रत्युत तेष्वपि केचन रूपान्तरेणापौरुषेयतामेव वेदस्य संसाधयन्ति ।
उक्तं यथा- मुधानकेन-

The veda is the first library of the world.

वचनमिदं दृष्टेरुपलब्धं प्रतिभाति ।

:o: :o: :o: :o:

:o: :o:

:o:

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदविभाजनम्

प्राचीनभारतीयवाङ्मयस्य निर्देशानुसारं ज्ञायते यत् सृष्टेः प्रारंभकाले ऋग्यजुःसामाथर्वात्मको वेदः एक संहिता आसीत् । सत्ययुगे, त्रेतायुगे द्वापरयुगस्य च प्रायशः समाप्तिपर्यन्तं एकरूपस्यैव वेदस्याध्ययना-ध्यापन क्रमः प्रचलित आसीत् । द्वापरयुगस्य समाप्तौ कौरवपाण्डवैः प्राङ्महर्षिर्व्यासः भाविनि कलियुगे जनानां बुद्धिशक्त्यायुषां प्रायस्थितिं स्वीयया दिव्यदृष्ट्या ज्ञात्वा[1] कृपापरवशया प्राप्तस्यैकात्मकस्य वेदस्य यज्ञ-क्रियानुरूपं विभागचतुष्टयं चकार । एतेषु चतुर्षु विभाजनेषु होतृकर्मोपयो-गिनां क्रियामंत्राणां सङ्कलनम् ऋग्वेद इति नाम्ना , आध्वर्यवकर्मोपयोगिनां क्रियामंत्राणां संकलनं यजुर्वेद इति नाम्ना, औद्गात्रकर्मोपयोगिनां क्रियामं-त्राणां संकलनं सामवेद इति नाम्ना, शान्तिक- पौष्टिकाद्यभिलषितफल-कर्मोपयोगिनां क्रियामंत्राणां च संकलनमथर्ववेद इति नाम्ना व्यवह्रियते ।

सम्प्रति प्रवर्तमानस्य वेदेश्वरादेः वैवस्वतमन्वन्तरे कृष्णद्वैपायनेन महर्षिणा व्यासेन कृतमिदं अष्टाविंशं विभाजनमस्ति । अर्थात् पौराणिक-मान्यतानुसारमेकसप्ततिचतुर्युगाणामेकं मन्वन्तरं भवति । प्रत्येकस्य चतुर्युगस्य मध्ये द्वापर युग समाप्तिकाले विशिष्टरूपःसम्पन्नैः महर्षिभिः एकात्मकस्य वेदस्य चतुर्धा विभाजनं क्रियते[2] । विभाजनमिदं कलियुगार्थमेव प्रवर्तते । कलि-समाप्तौ च समाप्यते । सम्प्रति मन्वन्तरेषु सप्तमस्य वैवस्वतनामकस्य मन्व-न्तरस्य अष्टाविंशतितमः कलियुगः प्रचलति । अतःपूर्वं सप्तविंशतिः कलियुगाः, तदनुसारं च सप्तविंशतिर्वेदविभागकर्तारो वेदव्यासाः विभिन्नाभिधेयाः बभूवुः । वेदस्येदमुपलब्धं साम्प्रतिकं विभाजनं महर्षेः पराशरस्य पुत्रेण कृष्णद्वैपायनेन कृतमस्ति वेदविभागकरणादेव स महर्षिर्वेदव्यासोपाधिना विभूषितो भवति । अतएव वेदं व्यस्यति विस्तारयतीति वेदव्यासः इत्येवं व्युत्पत्तिरप्यत्र भवतीति ।

१- द्र० ६ भा०१-४-१९-२०।

२- चतुर्युगेष्वथ व्यस्ता द्वापरान्ते महर्षिभिः ।
वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतचोदिताः ॥ - भा० १२-४-४६-४७।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदस्य शाखा:

१ कृष्णद्वैपायनो महर्षिर्वेदव्यास: वेदं चतुर्धा विभज्य तं चतुर्भ्य: शिष्येभ्य: समध्यापयत् । तेषु पैलनाम्ने शिष्याय ऋग्वेदम्, वैशम्पायनाय यजुर्वेदम्, जैमिनये सामवेदम् ,सुमन्तवे चाथर्ववेदमध्यापयत् ।

श्रीमद्भागवतानुसारं वेदस्यैवं चतुर्धा विभाजनमपि कालान्तरे मानवस्य धारणशक्तिबुद्ध्यादीनां ह्रासोन्मुखतया बुद्ध्वैव सम्भवात् । ततो व्यासशिष्या: पैलवैशम्पायन-जैमिनिसुमन्तव:[२] स्वशिष्येभ्य: एकैकं वेदं बहुधा शाखासु विभज्य अध्यापयामासु: । अतएव एकैका शाखा क्वचिदपि समग्रतामावहति न च तासां परस्परमन्योन्याश्रय: । अतएव " सर्वशाखाप्रत्ययमेकं कर्म " इत्युक्तम् । रामायण-महाभारतादिग्रन्थेषु एकस्मिन् काण्डे पर्वणि वा न तादृशी समग्रताऽस्ति यथा वेदस्य कस्याश्चिच्छाखाया: । रामायणे काण्डानां परस्परं सापेक्षत्वात् , महाभारतेऽपि पर्वणां सापेक्षत्वात् प्रतिकाण्डं प्रतिपर्व च समग्रताभावो स्तीति भाव: ।

महाभाष्यकृत् पतञ्जलेर्निर्देशानुसारं चतुर्णां वेदानां समग्रा: शाखा: संभूय एकत्रिंशदधिकैकादशशतं सन्ति ।तासु ऋग्वेदस्य एकविंशति: शाखा:, यजुर्वेदस्य[३] एकाधिकं शतं शाखा: , सामवेदस्य सहस्रशाखा:, अथर्ववेदस्य च नवशाखा: सन्ति।

अधुना न समस्ता: शाखा उपलब्धा: सन्ति । मुख्यतया सम्प्रति यासां शाखानां संहिता उपलभ्यन्ते तास्त्वेवम् सन्ति । यथा ऋग्वेदे शाकलशांखायन्याविति द्वे, यजुर्वेदे , (शुक्ले) काण्वमाध्यन्दिनीये इति द्वे,(कृष्णे) तैत्तिरीयमैत्रायणी-कठ-कपिष्ठला इति चतस्र: , सामवेदे कौथुमजैमिनीयराणायनीया इति तिस्र: अथर्ववेदे च शौनकपिप्पलादशाखे च द्वे समुपलभ्येते ।

१- भा० ४-२१-२२ (×भा०पु० का० गु०पु० भा० १० भूमिका भाग)
- डा० श्रीकिशोरमिश्र

२- भा० ४-२३-२४ ।

३- म० पस्पशाह्निक ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऋग्वेद संहिता

ऋग्वेदसंहितायाः विषये यद्यपि प्राचीनपरम्परानुसारं सर्वेषां वेदानामपौरुषेयत्वान्नैव प्राचीनार्वाचीनतायाः प्रश्नस्तथापि आधुनिकवेदविदुषां बुद्धिकौशल्यात् ज्ञायते यत् सर्वासु वैदिकसंहितासु ऋग्वेदः प्राचीन इति ।

" ऋचां वेदः, ऋग्वेदः ।" " अर्चनी ।" " ऋच्यते देवविशेषः, क्रियाविशेषः तत्प्रकाशनविशेषो " वा यया सा ऋक् ।" नियताक्षरपादावसाना ऋक् ।" इत्याद्याः नानाप्रकारकाः लेखाः, परिभाषाश्च ऋग्वेदस्वरूपविषये प्राप्यन्ते शास्त्रेषु ।

ऋग्वेदस्य संहितायां क्रमद्वयमस्ति - (१) अष्टक क्रमः (२) मण्डलक्रमश्च । अष्टकक्रमानुरोधेन ऋग्वेद संहिता अष्टस्वष्टकेषु विभक्ता, मण्डलक्रमानुरोधेन च दशमण्डलेषु । प्रथमक्रमेणं प्रत्येकमष्टके अष्टावध्यायाः सन्ति । तथा च प्रत्येकेषु अध्याये वर्गाः । तत्र मण्डलक्रमे ऋग्वेदो दशसु मण्डलेषु विभक्तः । प्रत्येकं मण्डलं अनुवाकात्मकम् । ऋग्वेदस्य दशसु मण्डलेषु पञ्चाशीतिः संख्याऽनुवाकानाम् । सूक्तानि सप्तदशाधिकैकसहस्रसंख्याकानि (१०१७) व्यवस्थितानि सन्ति । एतेभ्यः परं वालखिल्यानां सूक्तानां संख्या एकादश वर्तते ।

ऋग्वेदस्य एकविंशतिः शाखाः[१] इति शास्त्रेषु वर्णितमस्ति । तत्र च पञ्चशाखा एव सुप्रसिद्धास्ताश्च शाकल- बाष्कलाश्वलायन - शांखायन-माण्डूकायन शाखाः -

एतासां संक्षिप्तः परिचयः-

१- शाकलशाखा सम्प्रतीयमेव शाखा प्रचलिता वर्तते ऋग्वेदत्वेन ।

१क चत्वारो वेदाः साङ्गाः सरहस्याः बहुधाभिन्नाः । एकशतमध्वर्युशाखाः । सहस्रवर्त्मा सामवेदः । एकविंशतिधा बाह्वृच्यम् । नवधाऽथर्वणो वेदः ।

पृ० पस्पशाह्निक

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(२) बाष्कलशाखा- अस्या: शाखाया: संहिता नैवोपलभ्यते । परन्तु अस्या: संहिताया: वैशिष्ट्यमन्यत्र शास्त्रेषु वर्णितमस्ति । शाकलशाखानुसारं ऋग्वेदस्य[1] अन्तिमो मन्त्र: समानीव आ कूतिः इत्यस्ति (१०।१९१।४) परन्तु बाष्कल शाखानुसारं तच्छंयोः अन्तिमो मंत्र: " तच्छंयोरावृणीमहे ,इति शाकलशाखायां १०१७ सूक्तानि सन्ति, परन्तु बाष्कलीय शाखायां १०२५ सूक्तानि सन्ति ।

(३) आश्वलायन शाखा- अस्या: शाखायां अपि संहिता ब्राह्मण ग्रन्थ नैव प्राप्येते अधिकतु गृह्यसूत्र श्रौतसूत्रे उपलभ्यते । अतएवं सौत्रीशाखा ।

(४) शांखायनशाखा- अस्यापि शाखाया: संहिताऽनुपलब्धाऽस्ति , परन्तु ब्राह्मणारण्यक ग्रन्थौ द्वौ प्रकाशितौ स्त: । अनेकेषां विदुषां मते कौषीतकि शाखा शांखायनशाखा च एकैवास्ति ।

(५) माण्डूकायन शाखा- इयमपि शाखा इदानीमनुपलब्धाऽस्ति ।

ऋग्वेदस्याध्ययनेन ऋग्वेदे आध्यात्मिकविषयमपि वर्णितम् अस्ति ,तथापि अस्य दार्शनिक महत्त्वमपि स्वीक्रियते आधुनिकै: ।

ऋग्वेदीयदार्शनिकसूक्तेषु नासदीयसूक्तम् , हिरण्यगर्भसूक्तं पुरुषसूक्तं इति सूक्तत्रयम् महत्त्वपूर्णमस्ति ।

पुरुषसूक्ते सर्वेश्वरवादस्य प्रतिपादनं स्पष्टरूपेण वर्तते । अत्र पाश्चात्य विदुषां मतेन आध्यात्मिक-धार्मिकविकासक्रम: एवमस्ति - बहुदेववाद: एकदेववाद: सर्वेश्वरवादश्चेति ।

एतदतिरिक्तम् ऋग्वेदे - संवाद सूक्तानि । दानस्तुत्यादि लौकिक सूक्ताना-न्यतमत्वमप्यस्ति ।

ऋग्वेदे धार्मिकस्तोत्राणां संकलनमस्ति येषु नानादेवता: ऋषिभि-र्संस्तुता: सन्ति । अत्र प्रधानरूपेण अग्नि: इन्द्र:, वरुण: , इत्यादय: स्तुता: सन्ति एतदतिरिक्तं सविता पूषा , मित्र: ,विष्णु:, रुद्र:, मरुत: पर्जन्य इत्येवमादयोऽपि स्तुता: सन्ति । नोट:- टिप्पणी - १ अग्रेद्रष्टव्या: ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संवाद सूक्तेष्वपि यमयमीसंवादः पुरूरवोर्वशी संवादः विश्वामित्र-नदीसंवादप्रभृती प्रसिद्धानि सन्ति।

ऋग्वेदस्यकालः

ऋग्वैदिककालनिरूपणविषयेऽपि विभिन्नप्रकारकाणि प्रमाणानि सन्ति ।

तत्रापि पाश्चात्यविदुषां मतभेदानां विश्लेषणमपेक्षितमस्ति । प्राचीन भारतीय विदुषां मतानि प्रायः परम्परानुसाराण्येव सन्ति । तत्र पता-स्यमस्ति आधुनिकाः विद्वांसः पाश्चात्यमतमनुसरन्त एवमेव निर्णयन्ति यत् कस्मिंश्चिन्निश्चितसमये एव वेदानां रचनाऽभूदिति ।

न्याय-मीमांसादिदृष्ट्या तु वेदाः नित्याः ,शब्दनित्यत्वात् इति पूर्वमेवोक्तम् ।

पाश्चात्यानां तदनुयायिनाम् , भारतीय धीमतामपि मतानि नैकरूपाणि सन्ति वैज्ञानिकरूपापेक्षत्वात् । यथा-

१- अविनाशचन्द्रदासमहाभागाः:- भौगोलिकभूगर्भविज्ञानादस्य वेदस्याविर्भावकाल[2] ईसवीयवर्षप्रारम्भात् ७५००० तः २५००० वर्षपूर्वत्वमंगीकुर्वन्ति ।

२- डा० सम्पूर्णानन्दमहाभागानुसारं विक्रमाब्दप्रारम्भात् पूर्वं ५०,००० तः २५,००० वर्षाणि ऋग्वेदकालः ।

३- ऐतिहासिकाध्ययनाचार्य वेदमहाभागाः: ईसवीयात् पूर्वं अनेकशताब्दपूर्वमस्य कालः ।

४- मैक्समूलरवर्यस्य मतमस्ति मन्त्राणां रचनाकालः वैक्रमाब्दस्य १२०० वर्ष-पूर्वतः १०,०० वर्षपूर्वपर्यन्तमस्ति ।

१- एतस्माद्बहुकल्पबेधा ह्यास्तां ब्राह्मणकेऽधिकानि ।
तानपारणी आर्षी शैशिरीये वदन्ति शिष्टानखिलेषु विप्राः ॥
-अनुवाकानुक्रमणिका०३६

२- पु० वै०सा०इतिहासः (डा० रामपूर्तिशर्मणः)।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

५- ज्योतिषशास्त्रमंगीकृत्य डा० शामशास्त्रिण: संहितानां रचनाकाल: २५२०-२००० विक्रमवर्षपर्यन्तम् इति वदति ।

६- जैकोबिमहाभागानुसारमस्य काल: ४५०० विक्रमवर्षपूर्वम् इति ।

७- मैक्समूलरमतानुसार: ऋग्वेदस्यकालं १५०० विक्रमाब्द पूर्वमेव स्वीकुर्वन्ति ।

८- ओल्डेन बर्ग: विन्टरनिट्ज, स्टेनकोनो - इत्यादीनां विदुषां मतानि ख्रीष्टीय-वत्सरात् पूर्वं १४०० वर्षाणि ।

९- [illegible] सिद्धान्तानुसार: ऋग्वेदस्य १२०० त: १०००० ,वर्षपूर्वमेव कालमुपपादयति ।

१०- पण्डित दीनानाथशास्त्री-लक्ष३००००० लक्ष वर्ष पूर्वं मनुते ।

११- श्रोडर- ईरानकर्यो: अभिमतानुसारं क्रमश: १५०० ई०पूर्वत: २०००-२१०० वर्ष पूर्वमेव काल: ।

१२- सर्वाणि मतान्यालोक्य विन्टरनित्समहाभाग: भारतीयपरम्परायां श्रद्धान्वित प्रतीयते ।

अत: प्राच्यपाश्चात्त्यविद्वन्मतानुसारम् कथ्यतेऽपि ऋग्वेदस्य सर्वं प्राचीनत्वात् सर्वेषु ग्रन्थेष्वयं प्राचीनतम एव इति निश्चीयते । ऋग्वेद: सामवेदेन अत्यधिकम् ऋग्वेदप्रभावित: । यद्यपि केन प्रकारेणापि वयं संहितासु केन मंत्रा: प्राचीना: नवीनाश्चेति । परन्तु कल्पनायाश्च मूल्यं तार्किकतुलारूपेण नगण्यमेव। परन्तु भौतिकतथ्यम् इदमेव यदत्र वेदस्य वर्णनानि नैवोपलभ्यन्ते संस्कृतसाहित्ये। वेदा-पौरुषेयत्वविवादे आधुनिकानामपि स्पष्टं प्रमाणाभावादेषामपि कल्पनास्मा-स्माकं पूर्वजाश्च विद्वांस: प्राचीनत्वात् श्रेष्ठत्वात् प्रत्यक्षप्रमाणभूता: अस्माकं कृते । एतदन्य तेषां मते वेद: नित्य: , कर्ता नैवास्य वर्तमानकालीन विश्वासी तिष्ठति।

<u>आधुनिकदृष्ट्या ऋग्वेदस्य अन्यानि वैशिष्ट्यानि-</u>

१- ऋग्वैदिक समाजे भौतिकानां प्राधान्यमासीत् समाजे आध्यात्मिकतत्त्वानां बाहुल्यमासीत् ।। ब्रह्मसूक्तं , दानस्तुति: , इत्यादि सूक्तानां अवलोकनेन इदं ज्ञातुं शक्यते यत्पुरा समाजे शान्तिव्यवस्था समीचीनासीत् मानवा: मानवाकृति

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

महत्त्वः आसन् । अस्मात् कारणात् सुसंगठिताभवन् ।

ऋग्वैदिककाले मानवाः स्त्रीभिः पत्नीत्व पूर्णरूपेण परिरक्षिताः आसन् इति ऋग्वेदीयवैवाहिकाध्ययनेन ज्ञायते भारते राष्ट्रीयभावना दृढरूपेण आसीत् ।

ऋग्वेदीय संहितासाहित्यावलोकनेन इदमपि तथ्यं स्पष्टं भवति यत् तस्मिन् वैदिककाले पशुषु गवां महत्त्वमत्यधिकम् आसीत् । अतः प्रजानां मूलं धनं पशुपालनमेव आसीत् । तथापि गवांपरिपालनमार्याणां प्रधानधर्म-स्वरूपे प्रतिष्ठितमासीत् । दैनिकोपयोगि वस्तूनामुत्पादनं ग्रामेषु भवतिस्म । मनोरंजनार्थं अपि अनेकानि साधनानि सामाजिकेषु प्रचलितानि आसन् । द्यूत-क्रीडाऽपि प्रचलिताऽसीत् परन्तु तस्मिन्नवसरेऽपि सदा क्रीडकस्याः निन्दा शिष्टै-रासीत् । कन्दुकादि क्रीडया आर्याः परिचिता आसन् ।

ऋग्वेदीयसमाजे बालशिक्षायाः प्रचलनं नासीत् । अस्य पुष्टिः अत्याधुनिक पाश्चात्यविदुषांऽपि कृता , यः कथितवान् भारतमागतमार्यागत आसीत् स अपि सप्तभारते स्व वर्षपर्यन्तं शिक्षालयः वेदाध्ययनं कुर्वन्ति । स्वाध्यायो-ऽध्येतव्यः" इति विधिवाक्यस्य संकेताधारेण वर्षपर्यन्तादिनाऽध्ययनस्य अनन्तर-मेव उपनयनकार्यं शिक्षार्थीनां भवति स्म इति अनुमीयते । ऋग्वेदीय साहित्यावलोकनेन सूक्तेषु वैज्ञानिक रहस्यमपि स्पष्टं भवति । विमानाद्याः शस्य क्रियाव व्याख्या-पाकरणं , व्यवसायस्यअर्थव्यवस्थादृढीकरणं इत्यादया अनेकविषयाः तत्कालीन समाजस्य वैज्ञानिकं रहस्यं पोषयति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यजुर्वेदः

यजुर्वेदस्य भित्तिस्थानीयत्वा[1]दस्यापि अभ्यर्हितत्वम् । आध्वर्यवकर्मसम्पादनाय एषां यजुषां संकलनम् । यद्यपि यजुषः अनेकाः विभिन्नाः परिभाषाः वर्तन्ते, तथापि समीचीनसम्पादनाय एवास्य वेदस्य वैशिष्ट्यं मुख्यतया मन्यन्ते विद्वांसः ।

अनियताक्षरपादावसानं यजुः "गद्यात्मकं यजुः", यजुर्यजतेः[2] "शेषे यजुःशब्दः"[3], इत्येषां सर्वेषां लक्षणानामुद्देश्यतात्पर्यं चैकमेव यत् छन्दोरहितः समन्वितः सामातिरिक्तश्च य ऋगाभ्याम् ऋक्सामभ्यां भिन्नः शेषो मन्त्रभागः गद्यात्मकः तत् यजुः ।

तत्र च यजुर्वेदे द्वौ सम्प्रदायौ स्तः :- (१) ब्रह्मसम्प्रदायः (२) आदित्यसम्प्रदायश्च । ब्रह्मसम्प्रदायप्राप्तः कृष्णयजुर्वेदः । आदित्यसम्प्रदायप्राप्तश्च शुक्लयजुर्वेदः । शुक्लयजुर्वेदस्यापि पञ्चदशशाखासु द्वे शाखे उपलभ्येते -
(१) काण्वशाखा । (२) माध्यन्दिनीयशाखा चेति ।

कृष्णयजुर्वेदे मन्त्रैः सह ब्राह्मणभागोऽपि मिश्रितोऽस्ति । शुक्लयजुर्वेदे तु मन्त्रभागः ब्राह्मणभागस्य पृथक् पृथगाम्नातोऽस्ति । अयमेव पार्थक्ये हेतुः शुक्लकृष्णयजुषोः मन्यते पाश्चात्यैः आधुनिकविद्वद्भिश्च । भारतीयपरम्परानुसारं तु मुख्यो हेतुरस्ति इतिहासात्मको यत् कृष्णद्वैपायनस्य क्रोधवशात् याज्ञवल्क्यः स्वाधीतं वेदं मुमुदिलितवान् । एवमुद्वान्तानि यानि यजूंषि तानि इतरे शिष्याः तित्तिरपक्षिरूपमवधार्य गृहीतवन्तः । बहुरूपैः तित्तिरैः तस्यैव कृष्णयजुः इति व्यपदेशो जातः । ततश्च याज्ञवल्क्यः - समाराधनेन, सम्पूजनेन, धैर्येण तपसा च सूर्यं प्रासदत् । भगवान् सूर्यः वाजिरूपमवधार्य तस्मै वेदं आदिष्टवान् । वाजसनेयिसंहितापरपर्यायत्वमिदमेवास्ति । याज्ञवल्क्यस्य कथाविषये सर्वे विद्वांसः समानमनस्काः सन्ति ।

१- भित्तिस्थानीयः यजुर्वेदः चित्रस्थानीयावितरौ वेदौ "

२- निरुक्तम्।

३- जैमिनिन्यायमाला ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

आधुनिकमान्यतानुसारं वैदिकमान्यतानुसारं च नायं वैदुष्यतो विशिष्टश्च विद्वद्भिः । अस्याः शुक्लयजुषां द्रष्टा याज्ञवल्क्यः - मिथिलावासस्तस्य आसी-दिति ज्ञायते ।अतः तत्पश्चात् याज्ञवल्क्यस्य विषये शतपथब्राह्मणग्रन्थे बृह-दारण्यके चापि वर्णनं समुपलभ्यते । याज्ञवल्क्यः वेदान्तविदपि आसीत् । चरणव्यूहग्रन्थानुसारं कृष्णयजुर्वेदस्य षडशीतिः शाखाः सन्ति येषु चतस्र एव शाखाः सम्प्रति समुपलब्धा सन्ति । तास्च - (१) तैत्तिरीयशाखा (२) मैत्रायणीशाखा (३) कठशाखा (४) कपिष्ठलशाखा इति ।

तैत्तिरीयसंहिता काण्डप्रपाठकानुवाकेषु विभक्तास्ति । इयं संहिता सप्तकाण्डात्मिका, तदन्तर्गताश्च चतुश्चत्वारिंशत् (४४) प्रपाठकाः (६३१) एकत्रिंशदधिकषट्शतम् अनुवाकाश्च वर्तन्ते । पौरोडाश याजमानकर्मणां वाजपेय-राजसूयादीनाम् यज्ञानां च विशदं विधानं वर्तते । इयमेव शाखा आचार्य सायण-स्याप्यासीदिति ज्ञायते ।

मैत्रायणी संहिता- गद्यपद्यात्मिका, मंत्रब्राह्मणात्मिकाचास्ति । अत्र च संहितायां चत्वारि काण्डानि सन्ति । अस्यां संहितायां चतुश्चत्वारिंश-दुत्तरैकविंशति शतं (२१४४) सन्ति । मंत्राः सन्ति । तेषु च सैकं सप्तदशशतं (१७०१) मंत्राः ऋग्वेदादुद्धृताः सन्ति ।

कठसंहिता यजुर्वेदस्य समुपलब्धशाखा स्वन्यतमा शाखाऽस्ति । अस्य प्रसारः मध्यदेशे आसीदिति ज्ञायते । कठसंहितायां पञ्चखण्डाः सन्ति । ते च यथा - (१) इठिमिका (२) मध्यमिका (३) ओरिमिका (४) याज्यानु-वाक्या अश्वमेधानुवचनानामख्यानि च सन्ति । खण्डाः स्थानकेषु विभक्ताः । ते स्थानकाः चत्वारिंशत् संख्यकाः (४०) सन्ति । अनुवचनानि त्रयोदशसंख्याकानि, अनुवाकाश्च त्रिचत्वारिंशदुत्तराष्टशतं सन्ति । मंत्राणां संख्या एकनवत्युत्तरं सहस्रत्रयम् (३०९१) अस्ति ।

कपिष्ठल शाखापि सम्प्रत्युपलब्धा दृश्यते । चरणव्यूहानुसारं चरकशाखा-न्तर्गता एव कठाः प्राच्यकठाः, कपिष्ठलकठाश्च सन्ति । कपिष्ठ कपिष्ठलः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कश्चिदाचार्य आपिशल्यासीत्: पाणिनीय ग्रन्थेऽस्ति । दुर्गव्याख्यायामपि[1] कपिष्ठलो वासिष्ठ इत्युल्लेखः प्राप्यते । तेन द्वयैं ज्ञाता ।

शुक्ल यजुर्वेदस्यैकमन्त्रसंहिता ' वाजसनेयिसंहिता इत्युच्यते । अस्यां वाजसनेयिसंहितायां चत्वारिंशदध्यायाः सन्ति, अन्तिमाः पञ्चदश(१५) अध्यायाः खिलरूपेणापदिष्टाः सन्ति । अत्र दर्शपूर्णमासेष्टिविवेचनं तत्र मंत्राश्च निर्दिष्टाः सन्ति । ततोऽग्निहोत्रं, चातुर्मास्यम् , अग्न्याधानः, वाजपेयः , एकाहः, राजसूयः, अग्निचयनम् अश्वमेधः इत्यादयो यागाः समुपदिष्टाः । येषां सांगं विवेचनं शतपथब्राह्मणस्य काण्डेषु वर्तते । एतदतिरिक्तं अतः क्रियाशीलप्रत्याहारा- मन्त्राश्चापिताः । तत्र च १९-२१ अध्यायपर्यन्तं सौत्रामणीयागस्य वर्णनं , ततः पुरुषमेधः , सर्वमेधः, शिवसंकल्पोपनिषदस्य विवेचनमस्ति । शिवसंकल्पोपनिषदो महत्त्वं मनोवैज्ञानिकदृष्ट्या दार्शनिकदृष्ट्या चास्ति ।

संकल्पविकल्पात्मकम् ' इति मनसः स्वरूपम् तत्साध्यसर्वकृत्यव्यापकत्वाच्च मनसो निग्रहः दुर्लभः । अतो शुभमनोवृत्तिसाध्यास्तुता भावना, तदुत्पत्त्यर्थं मनसः संकल्पः शुभः करणीय इति अस्य शिवसंकल्पस्योद्देश्यमस्ति । पुरुषसूक्तस्यापि उपनिषदिव महत्त्वमस्ति । काण्वमाध्यन्दिनीयसंहितयोर्मध्ये भेदकारणं सम्प्रदाय वैशिष्ट्यमेव । उभयोः उच्चारणसम्प्रदायो भिन्नः याज्ञिकोऽपि भेदोऽवगम्यते । तथापि मौलिकसिद्धान्तैक्यत्वात् स्थूल एव भेदोऽवलोक्यते । माध्यन्दिनीयशाखाध्यायिनः षकार ऋकार- यकाराणा- मुच्चारणं क्रमशः खकार रेकार जकारवत् कुर्वन्ति । तथैव अन्यदपि वैशिष्ट्यमस्ति । माध्यन्दिनीयसंहितायां पञ्चसप्तत्यधिकैकोनविंशतिशतं(१९७५) मंत्राः सन्ति । तस्याः एकादशाधिकशतं (१११) मंत्राः अधिकाः काण्वसंहितायां सन्ति । अस्य च वेदस्य याज्ञवल्क्यर्षिः परम्परास्ति । यजुर्वेदे त्रिलमंत्राः अर्वाचीनकाले आदिष्टा इति केवन वदन्ति आधुनिकविचारकाणां मतानुसारेणास्य यजुर्वेदस्य रचनाऽऋग्वेदानन्तरमेवेति । अस्माकं भारतीयपरम्परानुसारं तु सर्वेषां मंत्रब्राह्मणभागात्मकानां वेदानामाविर्भावो युगपद् एव । न कश्चित् अग्रे पश्चाद्वा उद्भूतः वेदस्यापि नित्यत्वात् , अपौरुषेयत्वाच्च ।

आधुनिकविचारकदृष्ट्या यजुर्वेदस्य सामाजिकी व्यवस्था ऋग्वेदीयव्यवस्थातः भिन्ना प्रतीयते । चतुर्णां वर्णानामस्तित्वेन सहान्येषां जातीनामपि महत्त्व-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मासीत् तदानीम् ।

एतावता इदमनुमीयते यजुर्वेदीययुगे सर्वा सामाजिकीव्यवस्था वर्णाश्रमधर्मानुकूलाऽऽसीत् । अस्य च भौगोलिकविवरणमेवं ज्ञातुं शक्यते यत्, यजुर्वेदस्याऽऽस्थितत्वम् अत्यधिकप्रसारस्य भारतस्य मध्यदेशे आसीत् । आध्यात्मविषयेऽपि यजुर्वेदः स्वकीयं महत्त्वं भारतीयसंस्कृतौ स्थापयति । देवताविचारसरण्यां एवं ज्ञातुं शक्यते यद्यप्यस्याः देवतायाः महत्त्वम् ऋग्वेदीययुगे सामान्यमासीदस्याः देवतायाः महत्त्वं यजुर्वेदीययुगे अधिकमभूत् । याज्ञिकदृष्ट्याऽपि अस्य कालः प्रशंसनीयः यज्ञस्य प्रसारः प्रभूत आसीत् । यज्ञः स्वाभीष्टसाधनरूपे स्थित आसीत् प्रजानां स्वकीयाः कामनाः, अनेनैव सिध्यन्ति स्म । यजुर्वेदकाले- यजुर्वेदस्यैव समाजे प्रायोगिकरूपेणाभ्यर्हितत्वं प्रतीयतेऽस्य साहित्यावलोकनेन । तस्मिन् समये तान्त्रिकप्रयोगा अपि शनैः शनैः विकसिताः । अस्य सूक्तानां महत्त्वं दार्शनिकदृष्ट्या राष्ट्रभक्तिदृष्ट्या चास्ति । यजुर्वेदीयकाले कृषकाः पूर्णरूपेण अन्नराश्युपाश्रिताः आसन् , ऋग्वेदीययुगेऽपि तथैव, अत्र उभयत्र साम्यमस्ति । यजुर्वेदीययुगे अन्नानाम् उत्पादनं कृषकाः याज्ञिकदृष्ट्या मुख्यरूपेण कुर्वन्तिस्म । शुक्लयजुर्वेदीयायामृग्वेदीयसंहितायां च बहूनि अन्नानि परिगणितानि सन्ति तेष्वन्येषु कानिचिदन्नानि इदानीं लुप्तानि जातानि । धान्यं प्रधानमन्नमासीत् । अस्य याज्ञिकमहत्त्वं सामाजिकमहत्त्वं चाप्यासीत् । देवताप्रीत्यर्थं धान्यमावश्यकमासीत् । अस्याप्युपयोगः यजुर्वेदकाले अधिकमनुमीयते यथा धान्यमसि इति मंत्रः ।(मा०सं० --) यजुर्वेदकाले मानवेषु धर्मप्रवृत्तिः प्रबलासीत् । यजुर्वेदोक्तानां यज्ञानामवलोकनेन एवं ज्ञातुं शक्यते यत् तात्कालिकसमाजे यज्ञः परमावश्यकस्तुत्य आसीत् । अन्याश्च संस्कृतिसभ्यताः ऋग्वेदीयकालवदेवासन् यथा वर्णाश्रमधर्मपालनम्, तदनुकूलमेव मानवानां प्रवृत्तिराचारश्चासीत् । चतुर्णामाश्रमाणां प्रचारोऽप्यतिप्राचीन एव प्रतीयते । वैशिष्ट्यमिदं वैदिकयुगस्य यद् वर्णाश्रमधर्मयुक्ते वैदिकसमाजे सुव्यवस्था शान्तिश्चाऽऽस्ताम् । सर्वे सामाजिकाः देशं प्रति आकृष्टा आसन् । अस्य प्रमाणं यजुर्वेदस्यैकेन

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मंत्रेण[१] भवति । यज्ञस्यानुष्ठानं येनोद्देश्येनापि भवति स्म । तस्यामेव परम्परायां मिदानीमपि यज्ञानुष्ठानं लोककल्याणार्थमपि भवति ।

अनेन कारणेन वैदिकयुगस्य जनाः सुखिनः, आध्यात्मिकचिन्तन-शीलाः, समृद्धिसम्पन्नाश्चासन् ।

१- ॐ आ ब्रह्मन् ब्राह्मणो० इति मंत्रः ।

– शुक्लयजुर्वेदसंहिता ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सामवेदः

सामवेदस्य वेदचतुष्ट्यां उत्कृष्टं स्थानमस्ति। अस्य महत्त्वं सर्वेषु शास्त्रेषु वर्णितमुपलभ्यते । गीतायां भगवतास्वयमेवोक्तम्- वेदानां सामवेदोऽस्मि [1] ' इति ।

बृहद्देवतायामपि- ' यो वेद सामानि स वेद तत्त्वम् ' इत्युक्तम् । छान्दोग्योपनिषदि ओंकारं सामवेदरूपमित्युक्तम् ।

सामवेदस्य प्रयोगः अग्निष्टोमादि सोमयागानुष्ठाने भवति । अस्य साम्नः गायनम् उद्गातृनामकः ऋत्विक् करोति । अस्य उद्गातुर्विषये निरुक्तकारः यास्कोऽपि लिखति , ' गायत्रं त्वो गायति शक्वरीषु इति । अन्यत्र कल्पसूत्रेऽपि अस्य सामवेदिनः उद्गातुः विनियोग उपलभ्यते यथा- ' सर्वैरग्निष्टोमः [2] ' एवं चाहम् ऋत्विजो [3] वृणीते इति । अनेन प्रकारेण साम्नः महत्त्वं शास्त्रेषु [4] वर्णितमस्ति । साम्नो लक्षणं शास्त्रेष्वेवमुपदिश्यते - ' ऋगु वर्णो ' ' गीतिषु [5] सामाख्या ' चेति ।

यद्यपि कर्मकाण्डे ऋग्वेदीयमन्त्राणामुपरि गायनमेव नाम सामेति प्रायशः लोके प्रसिद्धम् । तथापि सामशब्देन गीयमानानामृचां संकलनमेव संहिता एवाभीष्टा। बृहदारण्यकेऽस्य निरुक्तिः भिन्नाऽप्यस्ति [6] । क्व सा , अम् इति पदद्वयमत्वा निर्वचनं कृतमस्ति । सा इति ऋक् , अम् शब्दश्च गान्धारादिस्वरवाचकः । अनेन प्रकारेण अन्याऽपि साम्नः, परिभाषाश्च सन्ति ।

सामवेद संहितायाः द्वौ भेदौ स्तः -

(१) आर्चिकभागः ।

(२) गानभागश्चेति ।

आर्चिकभागस्यापि द्वौ भागौ समुपलभ्येते -

(१) पूर्वार्चिकम् ।

(२) उत्तरार्चिकम् च ।

१- श्रीमद्भगवद्गीता । २-

२- स्तोत्राणि सामवेदेन शस्त्राणि ऋग्वेदेन ग्रहग्रहणादि यजुर्वेदेन । तत्र स्तोत्राणि

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पूर्वार्चिके षट्प्रपाठकाः सन्ति, प्रपाठकाश्च अध्यायपर्यायोऽस्ति । प्रपाठकाः खण्डेषु विभक्ताः सन्ति । खण्डाश्च दशतीषु विभक्ताः सन्ति । दशानामृ-चांसमूहो दशतिः । दशतीषु क्वाचित्कं वैषम्यमपि भवति । क्वचिदधिका संख्या क्वचिच्च न्यूनाऽस्ति । तथा दशत्याः संकलनं देवतानिर्देशाधारेणास्ति । प्रपाठकानामपि नामानि अनेकानि सन्ति । तेषां नाम प्रपाठकान्तर्विषय-मनुसृत्यैव कृतमस्ति । पूर्वार्चिके आग्नेयैन्द्रपावमानारण्यकानि चेति गानक्रममस्ति । पूर्वा-र्चिके मंत्राणां संख्या (६५०) पञ्चाशदुत्तरषट्शतमस्ति । उत्तरार्चिके प्रपाठकानां संख्यायां वृद्धिः संजाता तेषां संख्या नवास्ति । तत्र पूर्वेषु पञ्चप्रपाठकेषु भाग-द्वयमस्ति । इदं तु राणायनीयशाखायां व्यवस्थितं, परन्तु कौथुमशाखायाम् अव्यवस्था दृश्यते । अत्र कौथुमशाखायां मंत्राणां संख्या पञ्चविंशत्युत्तरद्वादशशतम् (१२२५) वर्तते । उभयत्र मिलित्वा मंत्राः पञ्चसप्तत्युत्तराष्टादशशतम् (१८७५) ।

यद्यपि इदमेव प्रसिद्धं यत् सर्वेमंत्राः ऋग्वेदादेव गृहीतास्तथाप्यन्वेषणेन वैदिकसाहित्यावलोकनेन च ज्ञायते यत्केचन मंत्राः न्यूनाः अपि साम्संहितायां स्वीयाः स्वतन्त्राश्च सन्ति ।

वैदिकसाहित्येतिहासे सामवेदीयसंहितागत मंत्राणांपरीक्षणं विभिन्नैः साधनैः आधारैश्च कर्तुं शक्यते ।

अत्र साम्संहितायां नैव सर्वे मंत्राः गानबुद्ध्यैव निर्मिताः प्रत्युतास्ति सांस्कृतिकं महत्त्वमपि । इमानि सामानि वैदिकयुगस्य मंगलकार्यसम्पादनावसरे विभिन्नेषु स्थलेषु गीयन्ते स्म इति प्रतीयते । अस्य गानप्रकारावलोकनेनैवं ज्ञायते यदर्वाचीना संगीत-प्रक्रिया पूर्णरूपेण साम्नः परम्परया प्रभाविता स्ति ।

२- उद्गाता, शस्त्राणि होता, ग्रहग्रहणादीन्यध्वर्युणा कर्त्तव्यानि ।
– डा० कं०मा०का० सं० सु० द्र० पृ० ६३।

३- का० सं० सू० ७।१।७।

४- निरुक्तम् ।

५- वै० न्या० मा० ।

६- सा च अमश्चेति तत्साम्नः सामत्वम् । (सा=ऋक् अम=गान्धारो) स्वरः यत्र वर्तते तत्साम । डा०वे०सा०सं० पृ०१३६।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सप्त स्वरा: अंगुलीनामुपरि समाश्रिता: सन्ति । सामवेदस्य गानं चतुर्धा सामवेदस्य गानं चतुर्धा[1] विभक्तमस्ति - ग्रामगेयगानं (वेयगान), आरण्यकगानम्, ऊहगानम् ऊह्यगानञ्चेति ।

एतद्विषये जैमिनीयशाखायां गानमधिकृत्यमस्ति ।

<u>सामशाखा:-</u>

सामवेदस्य शाखाविचारविमर्शे पुराणादीनां ग्रन्थानामाश्रय: एव प्रमाणम् । अस्यां परम्परायां जैमिने: प्रथमं स्थानमवलोक्यते । जैमिनि: एव पुत्रमिमां शाखाम् अध्यापयामास, ततश्चास्या: प्रचारोऽशिष्यरूपेणाभूत् । प्रचारकेषु सुकर्मनामकस्याचार्यस्योल्लेख: मुख्यरूपेण ग्रन्थेष्वायाति ।

मत्स्यपुराणानुसारमस्य सामवेदस्य[2] चतुर्विंशति: सहस्र शाखा: सन्ति पतञ्जलिमतानुसारं[3] सहस्रं शाखा: सन्ति । चरणव्यूहग्रन्थसंख्यांकिता:[4] तावत्य एव । इदानीं तिसृणामेव[5] शाखानामुपलब्धिरस्ति ।

सामगानप्रकारे वैशिष्ट्यमस्ति तस्मात् कारणादेव साम्न: विभागा: जायन्ते । गानप्रकार: ऋत्विगनुसारमेव भवन्ति यज्ञेषु । यथा- प्रस्तावं प्रस्तोता उद्गीथम् उद्गाता प्रतिहारं प्रतिहर्ता, उपद्रवम्, उद्गाता, निधनं च सर्वे ऋत्विज गायन्ति ।

- -

१- पु० वै०सा० सं० उपा०व्हा संहिताभाग ।

२- चतुर्विंशतिधा येन प्रोक्ता वै साम संहिता । स्मृतास्ते प्राच्यसामान: कर्तानामेव सामगा: ॥

३- चत्वारो वेदा: सांगा सरहस्या बहुधाभिन्ना: । एकशतमध्वर्युशाखा: सहस्रवर्त्मा सामवेद: एकविंशतिधावाह्वृच्यम् । नवधाऽथर्वणोवेद: । वै०सा० सं० पृ० ११३।

४- राणायन शाट्यमुग्र्य व्यास भागुरि औलुपि गौल्गुलविमानु मानौपमन्यव काराटि: मशक, गार्ग्यवार्षगण्य कौथुमि, शालिहोत्र जैमिनि श्यापिनी मे समाचार्या: ।
- वै०सा०सं० पृ० १५०।

५- कौथुमीय- राणायनीय- जैमिनीय । विष्टुति: त्रिशोकस्तुति । सामस्तोत्रगानस्य प्रकारो नाम विष्टुति: ॥ पु० वै०सा० सं पृ० १५७। २४१

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषयः:

भारतीय संगीत शास्त्रस्य परम्परा सामगानः परम्परातः जाता इति मन्यते । मनोरंजनसाधनत्वात् सांस्कृतिककार्यक्रमस्य समाजे महत्त्वं भवति । अतः कल्प्यते यत् वैदिक समाजेऽपि यथावसरे पारिवारिकोत्सवेषु मंगलार्थं च सामगानस्य परम्परा आसीत् । अस्माकं शास्त्रीयसंगीतानुकूलाः स्वराः सामवेदीय मंत्रेषु अंकिताः दृश्यन्ते । साम्प्रतिकाधुनिकसंगीतपरम्पराऽपि सामप्रभाविता प्रतीयते । सामवेदीय स्वरांकनमंगुलिग्रन्थिभिर्निर्दिष्टं भवति। अद्यापि पारम्परिकं सामगानं श्रुत्वा श्रुत्वा तथैव हृदयमानन्दितं भवति यथा वेण्वादिवाद्यमन्द्रध्वनिश्रवणात् ।

संस्कृतसाहित्यस्यावलोकनेन वैदिकसाहित्यैतिहासावलोकनेन च रहस्यमिदं पुष्टं भवति यत् सामवेदस्य (गायनम्) प्रयोगः न केवलं यज्ञार्थमपि तु लौकिकोत्सवे-ष्वपि अस्य परम्पराऽऽसीदिति[1] ।

आधुनिकसंगीतशास्त्रस्य मौलिकसिद्धान्तावलोकनेन स्वरादि स्वरूपावलोकनेन च उभय (लौकिकवैदिके) साम्यं परिदृश्यते । स्वामीनां[2] विष्णुना स्वाधारेण पुरा सर्वेषां गानारागादीनामाविष्कारोऽभूदिति अनुमीयते । संगीतशास्त्रस्य स्वरैः सह नारदीयशिक्षागतस्वरमण्डलस्य तुलनात्मकाध्ययनेनोभयत्र साम्यं प्रतीयते । प्रथमस्वरा[3]-त्सप्तमपर्यन्ताः स्वराः क्रमशः सा - रे-ग-म-प-ध-नि इत्येषामभिधायकाः सन्ति इति प्रतीयते । ब्राह्मणपुराण ग्रन्थानामध्ययनेन सामगानां[4] संख्या अतः पुरा अधिका-सीदिति ज्ञायते ।

१- द्र० वै० सा०सं० सामवेद ।

२- २४ पृ० द्र० टि० ।

३-

साम	वेणु	साम	वेणुः
१ प्रथम	मध्यम।म	४ चतुर्थः	षड्ज। सा
२ द्वितीय	गान्धार।ग	५ पंचमः	निषाद। नि
३ तृतीय	ऋषभ।रे	६ षष्ठः	धैवतः। ध
		७ सप्तम्	पंचम।प

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उपलब्धशाखाः-

१. कौथुम शाखा-

इयं शाखा सामवेदस्यैव प्रसिद्धा अस्ति । पूर्वनिर्वर्णितं अध्यायेषु संहितायाः सम्पन्नत्वं । अस्याएव नाम ताण्ड्यशाखाऽपि उपलभ्यते । शंकराचार्याः ताण्ड्याख्यां अस्याः शाखायाः नाम मूलतः स्मरन्ति । पञ्चविंशतिकाण्डात्मकं ताण्ड्यब्राह्मणमस्याएव शाखायाः वर्तते । छान्दोग्योपनिषद् अपि अस्याः एव सम्बद्धास्ति ।

२- राणायनीयशाखा-

कौथुमशाखा तुल्यैव मुच्चारणे एव वैभिन्न्यमावहति । यथा कौथुमीयाः हाउ- राइ इति उच्चारयन्ति , परन्तु राणायनीयाः हावु - रायीति ।

३- जैमिनीयशाखा-

अस्याः शाखायाः संहिता ब्राह्मणाभ्यां सह श्रौतगृह्यसूत्रेऽपि समुपलभ्यते । अस्यां मन्त्रसंख्या सप्ताशीत्यधिकषोडशशतम् एक (१६८७) अस्ति । कौथुम शाखातः त्र्यशीत्युत्तरशतम् (१८२) मंत्राः अधिका सन्ति । परन्तु जैमिनीय सामगानानि कौथुमशाखातः एकसहस्राधिकानि सन्ति । जैमिनीयगान संख्या (एकाशीत्युत्तराष्टशतत्रिसंख्यकम् (३६८१) अस्ति ।

- -

(क)
४- ऋग्वेदीय मन्त्राः: १५०४।
पुनरुक्ताः + २६७ नवीना + १०४ सामसंहितायाः सम्पूर्णाङ्कः: १८७५।

४-(ख) ऋग्वेदीयमन्त्राः: १५०४ सामान्य रूपेण ७५ मंत्राः अधिकाः मन्यन्ते परन्तु संख्या ततोऽधिकाऽस्ति । द्र० वै०सा०सं० पृ० १३७।

४-(ग) अष्टौ साम सहस्राणि छन्दोगार्चिकसंहिता ।
गानानि सप्तदशानि सहस्राणि चतुर्दश ।।
अष्टौ शतानि ज्ञेयानि दशोत्तरं शतैव च ।
ब्राह्मणं चोपनिषदं षडङ्गं मिश्रं तथा ।।

- द्र० चरणव्यूहे ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कौथुमीयायां द्वाविंशत्यधिकसप्तविंशतिशतं गानानि (२७२२)। जैमिनीया-न्तरीया शाखा तवलकारशाखा । तवलकारः जैमिनेः शिष्यः आसीत् । तासां गानानां संख्या अधस्तात्लिख्यते -

	कौथुमीयगानम्	जैमिनीयगानम्
१- वेयगानम्	११९७	१२३२
२- आरण्यगानम्	२९४	२९१
३- ऊह गानम्	१०२६	१८०२
४- ऊह्यगानम्	२०५	३५६
योग-	२७२२	३६८१

नारदीयशिक्षानुसारं सप्त स्वराः त्रयो ग्रामाः एकविंशतिः मूर्च्छनाः एवञ्च एकोनपञ्चाशत् तानानि सन्ति ।

वैशिष्ट्यमिदमवधार्य केचन स्तोभानां[1] महत्त्वं गानेषु[2] अर्थोल्लासपरकमिति स्वीकुर्वन्ति । सामान्यः वैशिष्ट्यम् यौगिके आचार्याः कथयन्ति यत् सामगानकाले गर्भस्थानां ध्वनिः कुण्ठितन्न भवेत् । अस्य कारणैः आपस्तम्बप्रभृति ग्रन्थे प्राप्यते अतोऽनेन सामवेदस्य वेदेषु महत्त्वं स्तवनीयं सिद्ध्यति । यतोऽस्माकं पूर्वजाः ऋषयः यज्ञेषु देवान् प्रसादयन्तोऽभीष्टं साध्यन्तिस्म । अस्यैव गानपरम्परा इदानीमपि जनानुपकरोति ।

विन्टरनित्स महोदयोऽपि तथैव भावमभिव्यनक्ति, यथा-

"The Samveda Samhita is not without value for the history of Indian sacrifice and magic and the games attached to it, are certainly very important for the history of Indian music even though as yet in no way exploited for this propose. As a literary production however this samhita is practically worthless for us. See-History of Indian literature V.I Samveda.

१- अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रम् । प्रगीतमन्त्रसाध्या स्तुतिः स्तोत्रम् ।

२- द्र० वै०वा०का इ० शर्मा पृ० ८६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथर्ववेदः

अथर्ववेदः वेदेषु चतुर्थः सन् वैशिष्ट्यमावहति । इदानीं यावत्पूर्वोक्तानां त्रयाणां वेदानां विवेचनाद्विदितमेव तथ्य प्राप्यते यद् लौकिकफलप्राप्त्यर्थं चतुर्षु वेदेषु विहिता यज्ञास्तेषां फलमदृष्टम् । परन्तु अथर्ववेदस्यालौकिकैः सह दृष्टफलप्राप्त्यर्थमपि अथर्ववेदसंहितादिषु विधानमवलोक्यते यस्य सम्बन्धः लोकेन सह महत्वपूर्णोऽस्ति ।

मानवजीवने नानाविधदुष्कर्मणा सञ्जातप्रवृत्तिजन्यादुष्फलरूपाः बाधाः समापतन्ति , याभ्यो विवशो मानवाः जीवनस्य वास्तविकं सुखं नानुभवन्ति , रोगादिभिःग्रस्ताः पीडिताश्च भवन्ति । यथा कस्यचिज्जनस्य गेहे मातादयः सर्वे पारिवारिकाः गृहे परिपूर्णास्तथापि तेषु कश्चिद्रुग्णः , कश्चिदुन्मत्तः रुग्णा मत्तश्चापदो भवति । अन्यच्च कारणं यद् मानवाः लोभमोह-काम-[1]क्रोधादिभिः प्रभाविताः भूत्वा कर्त्तव्यं प्रति अज्ञा एव प्रवृत्ताः भवन्ति । उक्तं यथा गीतायाम्-

" मायाभिरावृतज्ञानं तेन मुह्यन्ति जन्तवः "

अत उक्तैः कारणैः उत्पन्नानामनिष्टफलानां वारणाय तेषां च शाश्वत-शमनाय , प्रायश्चित्तादीनां विधानमस्माकं वेदे धर्मशास्त्रे च विहितमस्ति । अतोऽथर्ववेदस्य यज्ञानामनुष्ठाने विनियोगातिरिक्तं ऐहिकसुखसमृद्धिफलप्राप्त्यर्थमप्यस्त्यस्य उपयोगः ।

श्रौतयज्ञे त्वस्य विनियोगः सुतरां सिद्ध एव । यथा- अग्निष्टोमेऽध्वर्यु[2]होत्रकानामृत्विजां वरणमध्येऽस्य अध्येतुर्ब्रह्मणोऽपि वरणमुक्तमस्ति । "एकस्यामृचि" ब्रह्मत्वं करोति आथर्वणिकः" इति वचनादपि अस्य विनियोगस्य पुष्टिर्भवति । अन्यत्रापि ब्रह्मणः विनियोगो दृश्यते । आथर्वणिको ब्रह्मा च सर्वेषु भवति ।

१- श्रीमद्भगवद्गीता ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

गोपथब्राह्मणेऽपि ब्रह्मणः प्रशस्तिः प्राप्यते यत् त्रिभिर्वेदैः यज्ञस्यैक एव भागः संस्क्रियते भवति, ब्रह्मा च मनसा परपक्षं[1] संस्करोति ।

ऐतरेयब्राह्मणानुसारं यज्ञस्य मार्गद्वयमस्ति (१) वाक् (२) मनश्चेति ।

तत्र वेदत्रयरूपया वाचा यज्ञस्य एकस्य पक्षस्य संस्कारः ।अपरस्य तु पूर्ति मनश्चिन्तनेन ब्रह्मा एव करोति ।

अथर्वशब्दस्य व्याख्यापि बहुभिराचार्यैः आधुनिकविद्वद्भिश्च कृतास्ति । अथर्वशब्दस्य व्युत्पत्तिलभ्योऽर्थोऽस्ति अचंचल[2] इति ।ब्रह्मकर्मण्यायत्त-[3]त्वाद्वेदस्य ब्रह्मवेदोऽपि नाम सार्थकं प्रतिभाति ।

वायुपुराणेऽपि अथर्ववेदस्य विषये '[1]शिरोरशिरा' इति संज्ञा प्राप्यते ।

<u>अथर्वमन्त्रस्वरूपम्</u>

अथर्ववेदे मंत्राणां प्रकारद्वयं समुपलभ्यते । एकेऽपरद् शान्तिपुष्टिकाराः, अन्ये अभिचारकर्मप्रतिपादकाश्च ।

विन्टरनित्समहाभागः इमं चमत्कार[2]शान्त्यापनं मनुते । ब्लूमफील्डमतानुसारम् अथर्वाङ्गिरसशब्दो ऐन्द्रजालिकमन्त्रस्य वाचकः । अथर्वशब्दः लोककल्याणार्थ-तान्त्रिकप्रयोगपरः । आंगिरसश्च घातकमन्त्रतुल्यमन्त्राभिचारकः ।

तैत्तिरीयब्राह्मणानुसारमथर्व[3] वेदस्य शिवाभिचारकोऽर्थोऽवगम्यते ।

१- वा०पु०, ६५।२७, ब्र०पु० २-१४२६।

2.Atharvaveda means the Veda of the Atharvan or the knowledge of magic formula. See- History of Indian literature.

३- तै०ब्रा० ३-१२-६-१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

करौ विविधप्रकारकैः प्रमाणैरयमेवार्थोऽस्य सिध्यति ,यद् अथर्वाख्य, कल्याणप्रदः, आंगिरसश्चाभिचारकक्रियासाधकः ।

अस्य वेदस्य हि पारलौकिकपुष्टादृष्टसाधनत्वात्[1] ब्रह्मवेद इत्यपि संज्ञा ।

अस्य अथर्ववेदस्य नवशाखाः[2] पतञ्जलिमतानुसारं सन्ति । अस्य वेदस्य एका शाखा शौनकीयाऽस्ति , तदनुसारमेव मंत्राणां संख्या निर्धार्यते । अथर्ववेदस्य संहितायां विंशतिः काण्डानि सन्ति ।प्रायशः अथर्ववेदीयसंहितागतमंत्राः ऋग्वेदेन प्रभाविताः सन्ति । षट् द्वादशशतं (१२००) मंत्राः ऋग्वेदीया एव सन्ति। लान्मैन महाभागानुसारम् अष्टादश(१८) काण्डात्मक एवाथर्ववेदः। अन्यौ द्वौ काण्डौ प्रक्षिप्तौ स्तः ।

अथर्ववेदे सूक्तानां संख्या एकत्रिंशदधिकसप्तशतम् (७३१) अस्ति । आचार्यसायणाचार्यमतानुसारेणापि अथर्ववेदीया संहिता विंशतिकाण्डेषु विभक्ताऽस्ति। मंत्राश्च पुनः सप्ताशीत्युत्तरैकोनषष्टिशतम्(५९८७) सन्ति।प्राक्तनमपि विवेचनम्

प्राचीनताविवेचनम्

अस्य रचनाकालनिरूपणविषये आधुनिक विदुषां विचारविश्लेषणेन निर्णीयते[3] यद् अथर्ववेदः ऋग्वेदादर्वाचीन इति । अस्याथर्ववेदस्य सूक्तनिर्माणकाले आर्याः, गंगाप्रदेशे निवसन्त आसन् । अस्य पुष्ट पुष्टिं विन्टरनित्सोऽपि करोति ।

१- पु० वै० सा० का इतिहास डा० शर्मा । पृ ६१, नवमा अध्यायः ।

२- पिप्पलादाः, स्तौद- मौद- शौनकीय, जाजल जलद ब्रह्मवद- देवदर्श- चारणवैद्य ।

३- A.The songs of magic in the Atharvaveda which according to their main contents are certainly popular and very ancient have no longer ever their original form in the Samhita,but are Brahmanised.
B.It only follow that the latest hymns of the Atharveda are later than the latest hymns of the Rgveda.-History of Vedic Literature- Dr.Sharma.

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ परम्परा वेदव्यासशिष्यात्सुमन्तुमारभ्य: प्राप्यते । एवं सुमन्तो: शिष्य: कबन्ध: आसीत् । भागवतपुराणे सुमन्तो: शिष्यकबन्धशिष्यौ: प्राप्यते । तौ च (१) पथ्य: (२) वेददर्श: इति । एवं च पथ्यस्य त्रय: शिष्या: बभूवु:- (१) जाजलि: (२) कुमुद: (३) शौनकश्च ।

वेददर्शस्य वेददर्शस्य च - (१) मोद: (2) ब्रह्मबलि: (3) पिप्पलाद: (4) शौक्लायनिरिति चत्वारो शिष्या: अभवन् । बभ्रु- सैन्धवायनयोरपि नाम: वेददर्श-शिष्येषु प्राप्यते । एतैरेव हि शिष्यप्रशिष्यै: अथर्ववेद: पृथिव्यां विस्तृतोऽभूत् ।

प्रपञ्चहृदये, चरणव्यूहसायणभाष्येषु च एतेषां शाखाप्रवर्तकानां नामसु वैभिन्न्यमस्ति । देवदर्शस्थाने वेददर्श इत्यपि नामोल्लेख: प्राप्तोऽस्ति ।

अथर्वविषया:

अथर्ववेदे आभिचारिकी क्रिया एव नास्ति, प्रत्युतास्ति, याज्ञिकक्रिया-सहितं मनोवैज्ञानिकं, रहस्यं, वैज्ञानिकं रहस्यञ्च । भैषज्यसूक्तेषु चिकित्साविज्ञानविषयेऽथर्ववेदस्य महत्त्वमधिकमस्ति । चिकित्साविज्ञानस्य मौलिक-सिद्धान्तानां विवेचनं तत्रैव प्राप्यते । अन्यानि च आयुष्यपौष्टिकप्रायश्चित्ता-भिचारकर्माणि, स्त्रीकर्माणि राजकर्माणि च सूक्तानि सन्ति । सर्वेषां सूक्तानां वैज्ञानिकं महत्त्वं वर्तते । भैषज्यसूक्तेषु नानाविधानां रोगाणां वर्णनं, तेषां निवारणोपाया:[१] ,क्रमनिर्देशनेन उपदिष्टा: सन्ति ।

१- द्र० वै०सा० का इति० डा० रा०कु० शर्मा पृ० ६६- ६७ एवं अथर्ववेद १।३।१

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथर्ववेदानुसारं रोगस्याक्रमणं राक्षसानां[1] प्रभावादेवभवति । अस्मिन्नु प्रसंगे तन्त्रशास्त्रस्य प्रयोगः ज्वरार्थं दृश्यते । भैषज्यं ज्वरातिरिक्तानामन्येषामपि बहूनां रोगाणां यथा, कुष्ठ-पाण्डु-यक्ष्मादीनामपि , वर्णनं प्राप्यते । कृत्यादिविषय[2] वर्णनमपि अथर्ववेदे समुपलभ्यते । अथर्ववेदस्य महत्त्वं ज्ञात्वा, वैज्ञानिकीं पद्धतिं चाश्रित्य चिकित्साविज्ञानस्येतिहासविषये अस्य वैशिष्ट्यं प्रतीयते । अथर्ववेदानुसारं ज्वरः रोगाधिपतिरस्ति । ज्वरापशमनार्थं औषध्योऽपि निर्दिष्टाः सन्ति । अनेनानुमीयते यत् वैदिकयुगेऽपि औषधीनां प्रचारः आसीत्, अत एव आर्याः विभिन्नप्रकारकैः रोगैः परिचिता आसन् । पुरा शल्यक्रियाऽपि प्रचलितासीत् । बहूनां रोगाणां शमनं भैषज्यसूक्तपाठेन भवतिस्म । आभिचारिकक्रियया , तान्त्रिकप्रयोगैरपि रोगाणां निवारणं भवतिस्म । अस्यैव तान्त्रिकप्रयोगस्यावशिष्टां रूपमिदानीमपि ग्रामेषु परिदृश्यते । अथर्ववेदाध्ययने आयुर्वेदस्य प्रचारः प्राचीनकाले आसीत् इति ज्ञायते , तथा च आर्याः आयुर्विज्ञानेन परिचिताः आसन् इत्यादि । अथर्ववेदे ज्वराणां प्रकार वर्णिताः, यथा- बलासः, कश्चित्तु ज्वरविशेषोऽस्ति । तथैव अन्येऽपि रोगाः समाजे प्रभूता आसन् । यथा- अपचित् , अस्थियक्ष्मा, विद्रधं , वातीकारइत्यादीनां वर्णनं समुपलभ्यते । शल्यक्रियायाः[3] साफल्यमपि वैदिकयुगे दृश्यते यथा- मूत्राघातरोगेशलाकया मूत्रनिस्सारणं , योनिभेदेन सुखप्रसवात्मिकी क्रिया । कीटाणुभिः रोगाणामुत्पत्तिः, सूर्यरश्मिभिः रोगाणांनिदानं , [illegible] उपचारादीनां वर्णनं समुपलभ्यते । किमधिकं , " विषस्य[4] विषमौषधम् " इत्यस्य- निर्देशोऽपि प्राप्यते , यस्योपयोगः भयासाध्यरोगेषु क्रियते, यथा- सर्पदंशनादिषु ।

- -

१- They are either addressed to the disease themselves imagined as personal beings as demons. The name of diseases at the same time the name of the demon. see History of Indian literature.

२- A one of the cheif part constituent part of the Atharvaveda Samhita consists of songs and spells for the healing of diseases, which belong to the magic rites of healing (Bhaishajya)-History of Indian literature p.128.

३- पु० वैदिक और संस्कृति पृ० १५५(उपा०) ।
४- तदेव ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पौष्टिकानि सूक्तानि जीवनरक्षार्थं, व्यापारे लाभाय चापि च प्रयुक्तानि सन्ति । अत्र वृष्टिः, बीजवपनविधिः , अन्नोत्पादनाय च सूक्तेषु आशीर्वादस्य प्रार्थना वर्तते । कृषिसूक्ते कृषिकर्मविषयकस्याय उपायः अतिरम्येण वेदाद् गृह्णन्ति ।

मानवानामपराधजन्यं यदनिष्टं फलं तस्य दूरीकरणाय प्रायश्चित्तानि विहितानि सन्ति । यथा विवाहादिषु ज्येष्ठं भ्रातरं विहाय कनिष्ठस्य विवाह-प्रसंगे शारीरिकदुर्बलताविषये; मानसिकव्यथायां, दुःस्वप्नदर्शनेषु प्रायश्चित्तानि क्रियन्ते स्म । प्रायश्चित्तसम्बन्धीनि सूक्तानि शारीरिकदोषापशमनाय प्रयुक्तानि सन्ति।

स्त्रीकर्मसूक्तानामध्ययनेन ज्ञायते यत्पुरापि "प्रेमविवाहो" प्रचलित आसीदिति। अस्मिन्प्रसंगे आभिचारिकी क्रियाऽपि तत्सम्पादनाय उक्तास्ति। वशीकरणोपायः, तन्निमित्तं सूक्तपाठश्चापि वर्णितोऽस्ति ।

अत्र राज्याधिपतिभिः सह राज्यसम्बन्धितानां सर्वेषां सामग्रीणाम् आयुध-सैन्यबलादिपूर्णविवरणा अपि वर्णनमस्ति। अथर्ववेदस्य बहूनि सूक्तानि अस्मिन् प्रसंगे सम्प्रयुक्तानि सन्ति । अथर्ववेदस्य राजवेदं इत्यपि नाम अनेनैवाधारेण सार्थकत्वं भजते । अथर्ववेदीययुगे राज्ञः चयनं प्रजाः स्वयमेव कुर्वन्ति स्म, तथा ऐकमत्येन राज्याभिषेकादिकी क्रिया तस्य भवति स्म । एतस्मिन् सूक्ते मित्रावरुणाभ्यामग्निसोमाभ्यामिन्द्रबृहस्पतिभिस्सर्वैः चयनाख्यानं समुपलभ्यते । सैनिकसाधनेषु दुन्दुभेर्वर्णनमपि समुपलभ्यते । यतोऽद्यावधि यावत प्रायशः सर्वेषु देशेषु सैनिकसंगठनसामग्रीषु वाद्यांशस्य व्यवस्था दृश्यते । अथर्ववेदे दुन्दुभेर्वर्णनं यथा-

दुन्दुभेर्वाचं प्रयतां वदन्तीमाशृण्वती[1] नाथिता घोषबुद्धा ।
नारी पुत्रं धावतु हस्तगृह्यामित्री भीता समरे वधानाम् ॥

अतो सैनिकानां मनोबलस्फूर्त्यर्थं दुन्दुभिसूक्तानां पाठो भवति स्म ।

१- पु० वी० टा० सं० सं० भाग ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पृथिवीसूक्तेऽपि[१] दार्शनिकभावनाभिव्यक्तया: विवेचनं विविध प्रकारेण वर्णितमस्ति। पृथिवीसूक्तस्य महत्त्वं सामाजिकदृष्ट्यापि वर्तते ।

अत्र 'वसुधैव कुटुम्बकम्' इति सिद्धान्तस्य प्रतिपादनं दृश्यते ,यथा- माता भूमिः पुत्रोऽहं पृथिव्या' (अ० १२-१-१२) ।

इमान्येव प्रसिद्धानि सूक्तानि अथर्ववेदे सन्ति । ब्रह्म्याणि सूक्तान्यपि अतः परमात्मतत्त्वस्य ब्रह्मणश्च स्वरूपं वर्णयन्ति । ब्रह्म्याणां सूक्तानामपि महत्त्वं दार्शनिक दृष्ट्यास्ति ।

अस्मिन् विषये केचन पाश्चात्त्यविद्वांसमभिमतत्व प्रतिपादयन्ति[२] , यत् ब्राह्मणाः पुरोहिताः स्वजीविकोपार्जनार्थं तान्त्रिकप्रयोगानाश्रयन्ति स्म इति । अथर्ववेदस्य प्रत्येकं विषयवस्तुनस्त्ववलोकनेन तत्रत्यानां सर्वेषां कर्मणां सामाजिकं महत्त्वमेव दृश्यते । वैदिकसंस्कृतेः सभ्यतायाश्च विश्लेषणार्थमिदं सम्यक् तथा करोति । अथर्ववेदकालेऽपि ब्राह्मणादीनां चतुर्णां वर्णानां अस्तित्वम् आसीत् । तत्रापि ब्राह्मणाः कुलगुरवः पूज्याः आसन् । तत्र च ब्राह्मणानां स्थाने आचार्याः प्रधान-मन्त्रिषु । ब्राह्मणाः वेदाध्ययनमनुष्ठानमाचरन्ति स्म , तथा च लोककल्याणार्थं धर्मशास्त्रं समुपदिशन्ति स्म, येन समाजे शान्तिव्यवस्था स्यात् । अथर्ववेदस्य स्थिति-स्वरूपविषये मैकडानलोऽपि स्वमतं प्रकटयति , यथा-

> It is impossible to draw a distinct line of demarcation between sacrifice and sorcery in vedic religion of witch craft is essential eliment. --History of Vedic Literature By Dr.Sharma,p.102.

१- पृ० वै० सा० सं० संक्षिप्तानाम ।
२- तत्रैव ।
३- हि० वैदि० सा० इति डा०रा०कृ० शर्मा ,पृ० १०४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ब्राह्मणभाग विचारः

मंत्रब्राह्मणयोर्वेदनामधेयम् इति वेदपरिभाषा । 'ऋषिः दर्शनात्' एवं श्रुतत्वात् श्रुतिः इति विषयव्याप्ता या श्रुतिः-चतुर्भागेष्व ऋषित्वं वैदिक वाङ्मये कृतम् । अतः स्पष्टमिदं तत्कालीन ऋषिभिः उभयात्मकत्वात् मंत्र-ब्राह्मणयोः अपि अपौरुषेयाः । केचन आमिनन्ति, यद् ब्राह्मणं पौरुषेय-मिति । परन्तु अस्मदादीनां कृते परम्परागतमेव समानत्वं मंत्रब्राह्मणात्मकस्य सम्पूर्णवेदस्य विषये अपौरुषेयता एव अपवार्यं भाति ।

अत्र ब्राह्मणं पौरुषेयमिति कथनेन केचन, अपि पूर्वाचार्यानृताना-गुण दोषैर्वैव, स्वविचारानुकूलविचारानुकल्पयित्वा, कल्पविकल्प वाचायंस्य महत्वपूर्णं अवैव अभिष्टं मत्वा तिष्ठन्ति, परन्त्वत्र सम्यक् परीक्षणेनैव निर्णयस्थापयामि यद् ब्राह्मणभागोऽपि वेद एव, एवञ्च वेदस्यापौरुषेयत्वं इति। प्रथमः परम्परायां प्रथिता आधुनिक विद्वद्भिर्मतेषु यद् स्वाभीष्टं वस्तुमन्विष्य व्याख्यातव्यम्, यतो हि तत्र उक्तं दृष्ट्वा तदेव प्रमाणमुक्तमिति च । तस्मात्तत्र तस्य वस्तुनः, मौलिक परीक्षणं गवेषणं कृत्वैव तस्य सौन्दर्या मूल्यांकनं च क्रियते । यदि विपक्षे एव संख्याकानि मतानि उपस्थापितानि भान्ति परन्तु तावतां किम् प्रमाणसंख्या संकलनीया, अतः प्रमाणैर्ब्राह्मणानामपि परः पुरुष इति मन्यन्ते । परन्त्वनेन वैदिक वाङ्मये क्वापि वेदस्य पौरुषेया-पौरुषेयत्वविषये कार्यं न दृश्यते । आधुनिकमंत्रब्राह्मणभागानामध्ययनमिदानीं पर्याप्तमासीदिति । एकदा: छात्राः अध्ययने भारतीयाः आधुनिकाध्ययन-शालाः छात्राः न पारंगता भवन्ति किन्तु अवैव छात्राणां विषये ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतो यावत्पर्यन्तं जैमिनीयशाखीयानां संहिताब्राह्मणानामध्ययनं तत्व-परिशीलनं च न क्रियते, तावत्पर्यन्तं पूर्वोक्तयाथार्थ्येन मतं स्वीकरणीयम् ।

प्राचीनवैदिकाचार्येषु मतैक्यमेव दृश्यते । यास्को वै यत् सायणाचार्य-प्रमुखः आचार्याः बौधायनापस्तम्बादयः मंत्रब्राह्मणयोर्वेदत्वमेव स्वीचक्रुः ।

पूर्वमीमांसायामपि- अथातो धर्मजिज्ञासा, चोदनालक्षणोऽर्थो धर्मः- इत्यादिं व्याख्याय भाष्याचार्येण ब्राह्मणभागस्य वेदत्वविषये स्पष्टीकृतं, यत् कृत्स्नवेदाध्ययनानन्तरं धर्मस्य जिज्ञासा कर्तव्या अत्र कृत्स्नशब्दः नैव मंत्रात्मकभागस्याभिप्रायो । प्रत्युतोभय मंत्रब्राह्मणयोः प्रवृत्तिरस्य शब्दस्य । यदि कृत्स्नशब्दस्यार्थः मंत्रमात्रमेव उच्येत तदा विचारशास्त्रप्रवृत्तिरेव नोपपद्येत । अतो न सम्पूर्णस्य वेदस्य कथं जिज्ञासा यं यद् वेदस्य उभयत्र प्रवृत्तिः मंत्रभागे [illegible] ब्राह्मणभागे च । मंत्राः मननात्, ब्राह्मण-मभिधानात् । मंत्रे देवतास्तुतिः परन्तु मंत्रस्य इति कर्तव्यता ब्राह्मणभागस्य । स्वक्रियासम्पादनाय लोकायत्तप्राप्त्यर्थं, यथा- [illegible] देवेति सन्निधाने निर्णयार्थं ब्राह्मणं प्रवर्तते । प्रवृत्तेश्च भेदाः - स्तुति-निन्दा-प्रशंसा पुराकल्पादिविधिविषयाः ब्राह्मणस्यैव । एवं च विधानं तस्यैव भवति यस्य अर्थवादादिना प्रशंसा भवति । यथा 'स्तुवीत च विधीयते' इति । स्तुतिरपि तस्यैव भवति यस्य वैशिष्ट्यं भवति यतो -'तेजो वै घृतमित्यनेन 'घृतेन जुहुयात्' इत्यस्य विधेः प्रशंसा भवति यतो च घृतस्य होमार्थं विधीयते । इदं कार्यं ब्राह्मणभागस्यैव । अस्मात् कारणात् ब्राह्मणभागो पि वेद एव स्वतन्त्र अपौरुषेयो पि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मंत्रभागमात्रस्यैव वेदत्वस्वीकारे ब्राह्मणभागः निरर्थको भवेत् कर्मा यज्ञक्रियाः विधयश्चापि निरर्थकाः भवेयुस्ततो व्यवस्था ध्वंसेत्, ततश्च भारतीय परम्परायां संस्कृतौ च दोषः आपतेत् । अतस्तन्निवारणेन ब्राह्मणभागस्य वेदत्वापौरुषेयत्वविषये च दोषाभावम् अनुमिनोमि ।

अपि च आदावुक्तरीत्या श्रुतिप्रमाणस्वीकारात् ब्राह्मणभागमपीदानीं वदिते। सायणाचार्येण ब्राह्मणभागस्य वेदत्वे अर्थवादाधिकरणन्यायमपि मायतो जैमिनेः राद्धान्तेन स्थापितम् ।

एवं नूनं च वक्तुमिच्छामि स्वीकर्तव्यं यत् यथा- मानवाः स्वादृष्टं न विदन्ति तथैव श्रुतिवाक्यैः (वा श्रुतिवाक्यं ब्राह्मणाभिधायकम्) पि -स्वीकर्तव्यं अलौकिकस्य वेदस्य ज्ञानाय यो यः पदपदार्थसंयोगाभ्याः तस्यं धान्यद् नास्ति इति धार्मिकाणामुपपादनार्थं मतम् ।

तस्मान्न ब्राह्मणारण्यकोपनिषदां श्रुत्यां विवादः । केनापि हेतुना वेदत्वमपौरुषेयत्वमपास्य ब्राह्मणभागस्य विभाति ।

श्रुत्यन्ते नाहितान् वेदान् ऐतिहासान् ऋषयः ।
ऊचिरे तथा पूर्वं पूर्वाचार्यविपश्चितः ॥

इत्थम् इतिहासपक्षमवधार्य यदि कश्चिद्वादी भवेत् यत् पुराणानामादि-क्रमेण इतिहासानुग्रन्थो यं ब्राह्मणभाग इति कल्प्यताम् । तस्य उत्तरं ब्राह्मणाः कपालव्याख्यानानाः ऋषयः वेदस्वरूपनिरूपणार्थे ग्रन्थे स्वरूपार्थः - यद् येन (पूर्वोक्तेन) आर्षेयत्वं मन्त्राणां पि ऐतिहासिकत्वमापतेत् । अतो

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नित्यः मंत्रब्राह्मणात्मको वेदः भूत-वर्तमान-भविष्यत्कालिकविषयोपपादकः ।

ब्राह्मणभागे मंत्रव्याख्यानं कर्मव्याख्यानं च वर्तते[१] । यथा स्वर्गकामो ज्योतिः ष्टोमेन यजेत - इत्यादिविधिवाक्यानि मंत्रात्मके ग्रन्थे (संहितादिषु) प्राधान्येन नोपलभ्यन्ते, ब्राह्मणभागे तु उपलभ्यमानत्वात्, अतो ब्राह्मणभागोऽपि वेदः ।

अन्यच्च - 'शेषे ब्राह्मणशब्दः' - अस्य सूत्रार्थे परम्परायां कथितवन्तः यान् मन्त्रान् समूहान् मंत्रत्वेन कथयामासुः तान् विहाय निर्वचनादरादिषु हेत्वादिवर्णनविधानादिवाक्येषु च शेषः शब्दः स च ब्राह्मणशब्दवाचकः । अतो मंत्रब्राह्मणयोर्वेदनामधेयमिति परिभाषा जाता सा । अर्थात् यो वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः इति कथितम् । तत्र विचारणीयो यं विषयः यत् 'वेदो नित्यो धर्ममूलम्' तत्र वेदप्रतिपाद्यं यागादिषु वर्तते । तस्मात् यागादिरेव धर्मः । अतो यागस्य प्रतिपादनं पूर्णरूपेण इतिकर्तव्यतया सह ब्राह्मणग्रन्थेष्वेव उपलभ्यते । यागादिस्वरूपज्ञानं मंत्रमात्रेण न भवति । यतो हि यागस्य स्वरूपमुक्तम् - 'द्रव्यं देवता त्यागः' इति । द्रव्यम् आज्यादि, देवता इन्द्राद्याः, त्यागस्य देवतोद्देश्येन हविषः अग्नौ प्रक्षेपः स च वषट्-कारादिना । एषु देवतास्वरूपमात्रविधानमेव मंत्रागमनम् । द्रव्यं त्यागप्रकारश्चेति पदार्थद्वयं ब्राह्मणग्रन्थप्राधान्येन । भावनांशस्फूर्तिं व्याख्यानपुरःसरं ब्राह्मणमेव करोति अर्थवादादिना प्रेरयति, च, यथा - 'यदरोदीत् तद्रुद्रस्य रुद्रत्वम्' इत्यत्र देवताव्याख्यानम्, द्रव्यं - 'आयुर्वै घृतम्' इत्यादिषु ।

१- ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यान ग्रंथः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यथा- 'अग्निर्वै सर्वा देवता', इत्यादयो विधयः ब्राह्मणभागगता एव । 'वेदा हि यज्ञार्थमभिप्रवृत्ताः' इत्यस्य पुष्टिं यज्ञव्याख्यायकत्वात् ब्राह्मणभाग एव करोति । अतो अस्य वेदत्वमपौरुषेयत्वञ्च युक्त्यैव । अस्य प्रत्यक्षप्रामाण्यार्थं कृष्णयजुर्वेदस्यालोकनमावश्यकमस्ति । तत्र किं वेदत्वं नास्ति ? अत एवम् अनुमीयते यत् अन्यतो विशेषेण न वदन्तो यदिदं ब्राह्मणमपि च मंत्रः इति । याज्ञिकव्याख्या स्वानुभवैः । उक्तं यथा-

अन्यतो हि पदार्थानां नान्यं वाऽस्ति पृथक्त्वतः ।
उपायेन तु विज्ञानानन्दं वाऽस्ति विनिश्चितः ॥

अतो यं मंत्रः, स्वयं ब्राह्मणमित्यत्र पूर्वाचार्यादिभिरेव मतं स्व कर्तव्यम् । ते यौगिकत्वेन वेदत्वं स्वीकृतवन्तः ।

अथ ब्राह्मणशब्दार्थविषये मतान्तराणि प्रस्तूयन्ते -

१- स्वामिदयानन्दवर्यः - ब्रह्मणां वेदानां[१] इमानि व्याख्यानानि ब्राह्मणानि ।

२- आचार्यः शबरः:- मंत्रो मननात्, ब्राह्मणमभिधानात्[२] ।

३- मेदिनीकोषः - ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम् ।

४- वैदिकवाङ्मयेतिहासे- ब्राह्मणग्रन्थभागे - 'मंत्राणामर्थव्याख्यातृ- ब्राह्मणं ब्रह्मणो भवात्' ।

१- ऋग्वेदभाष्यभूमिका (५०)

२-५० आपस्तम्ब १२ दर्शपूर्णमासप्रकाशः

CC.O Sampurnanand University Collection. Digitized by eGangotri

५- बौधायनश्रौतसूत्र - "योऽपि विधिब्राह्मणमुच्यते"[1]

६- मंत्रा: ब्राह्मणा: प्रोक्ता[2] स्तुत्यं ब्राह्मणं स्मृतम् ।
कल्पना च यथा कल्पा:,कल्पश्च ब्राह्मणस्तथा ॥

७- <u>महाभारते</u> -
ये के ब्राह्मणा: प्रोक्ता[3] मंत्रा वै प्रोक्षणे गवाम् ।
स्वेप्रमाणं भवत उताहोनेति भारत ॥

पुरुष्यविशेषैष्ट्वा पुराणैः ब्रह्म: पुरः ।
यमिति ब्राह्मणे पच्छेदिति वै ब्रह्म: श्रुति: ॥

पूरोहणं रोहति तस्योक्तं[4] ब्राह्मणम् ।

८- वाचस्पतिमिश्र:- नैरुक्त्यं यस्य मन्त्रस्य विनियोग: प्रयोजनम्- - -
ब्राह्मणं तदिहोच्यते ॥

९- उवट - 'श्रुतिब्राह्मणम्'[5]

१०- कतिपये विद्वांस[6]: द्विविधं ब्राह्मणं प्राचीनमर्वाचीनञ्च मन्यते ।
प्राचीनेषु यथा पुराणप्रोक्तेषु ब्राह्मणकल्पेषु -
भाल्लव-शाट्यायन, ऐतरेया:
अर्वाचीनेषु- याज्ञवल्क्य: (शतपथ ब्राह्मणम्)

१- बौ०श्रौ०सू० १।७-१० पृ० २
२- वैदिक वाङ्मय का इतिहास पृ० २ टि० १०-११
३- क- महाभारत शान्तिपर्व २७।६
ख-ज्ञानपिण्डत्यागशान्तिपर्व ३४-१८
४- पंजिका ३।२४।६ ऐतरेयब्राह्मण पृ० आनन्दाश्रम १९११
५- वै०वाङ्मय का इति०
६- ब्राह्मणम् ... ब्राह्मणानीति । ... (ब्रह्मनाथ) १।८८।१

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

११-चत्वार: पक्ष: विधिब्राह्मणं अर्थब्राह्मणम् कल्पब्राह्मणं च ।

१२- अत तृतीय पक्ष:-अष्टविध ब्राह्मणानि[1] ।

यथा- ब्राह्मणस्याष्टविधाभिन्नम् । वेदास्तु पाचकोपिविराद्भावनी इतिहास:पुराणं, विद्या, उपनिषद्, श्लोका:, सूत्राण्यनु व्याख्यानानि व्याख्यानानीति -

अथ प्रसङ्गात् आधुनिकभारतीयानां पाश्चात्यविदुषां च ब्राह्मणविषयकाणि मतानि उद्ध्रियन्ते -

१-विन्टरनित्स[2]-

The word Brahman means first a single 'explanation of utterance of a learned priest of a doctor of the science of sacrifice upon any point of ritual" used collectively the word means secondly, a collection of such utterance and discussions of the priests upon the science of such sacrifice.

२- आप्टे[3] -

That portion of the Vedas which states rules for the employment of the hymns at the various sacrifices their origin and detailed explanation, which sometimes lengthy illustrations in the shape of legends and stories is distinct from the Mantras portion of the Veda.

१- तैत्तिरीयारण्यक सायणभाष्यम् ।

२- वै०सा०का इति०(डा०राममूर्ति शर्मा)

३- आप्टे कोष: ग्रंथ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१८२ ३- ब्रैब्लाणट:[१] - The main object being to explain the sacred significance of the ritual to those who are already familiar with the sacrifice, the descriptions, they give of it, are not exhaustive, much being stated only in outline or omitted altogether.

४- ब्राह्मणभूमिका-

ब्राह्मणग्रन्थः यज्ञानां वैज्ञानिका धार्मिका आध्यात्मिक-व्याख्यायाः निरूपकः[१] ।

इत्येवं ब्राह्मणविषयकं विविधविषयेषु प्रसिद्धम् । बहुधा विस्तरेणेन ।

अथ उपलब्धानि ब्राह्मणानि[२] प्रदर्श्यन्ते -

(१)ऋग्वेदीय ब्राह्मणम्

अ- ऐतरेय ब्राह्मणम् ।

ब- शांखायन ब्राह्मणम् ।

(२)शुक्लयजुर्वेदीयब्राह्मणम्-

अ- शतपथ ब्राह्मणम् (माध्यन्दिनीयम्)

ब- शतपथ ब्राह्मणम् (काण्वम्)

१- वैदिक सा० का इति० (डा० शर्मा)

२- वैदिक सा० का इति० पृ० १८० (डा० गैरोला)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(३)सामवेदीयब्राह्मणम् -

(क)ताण्ड्यब्राह्मणम् (ख) षड्विंशब्राह्मणम् (ग) सामविधानब्राह्मणम्
(घ)आर्षेयब्राह्मणम् (ङ)देवताध्यायब्राह्मणम्(च)उपनिषद्ब्राह्मणम्
(छ)संहितोपनिषद् ब्राह्मणम्, (ज)वंशब्राह्मणम्, (झ)जैमिनीयब्राह्मणम्
इत्यादि ।

(४)अथर्ववेदीयब्राह्मणम्-

गोपथब्राह्मणम् ।

अनुपलब्धानि ब्राह्मणनामानि इमानि कथ्यन्ते -[१]

१- शाट्यायन ब्राह्मणम् ।
२- भाल्लवि-ब्राह्मणम् ।
३- आह्वरक-ब्राह्मणम् ।
४- खाण्डिक-ब्राह्मणम् ।
५- कंकति-ब्राह्मणम् ।
६- कालबविब्राह्मणम् ।
७- चरकब्राह्मणम् ।
८- छागलेयब्राह्मणम् ।
९- जाबालिब्राह्मणम् ।
१०- पैङ्गायनिब्राह्मणम् ।
११- माषशरावि ब्राह्मणम् ।
१२- मैत्रायणी ब्राह्मणम् ।
१३- रौरुकि ब्राह्मणम् ।
१४- शैलालिब्राह्मणम् ।

१- Written by Bat Krishna -Collection of fragments of Lost Brahmanas. Calcutta 1935.

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१५- श्वेताश्वतर-ब्राह्मणम् ।
१६- हारिद्रविकब्राह्मणम् ।

उपसंहारे स्वकीयमेवं वक्तुं शक्यं यदा विपक्षकृतानामाचार्याणां पाश्चात्यपण्डितप्रभृतीनां विदुषां ब्राह्मणभागस्य वेदत्वापौरुषेयत्व-संस्थापकानां प्राचीनपरम्परापालकानां विपश्चिद्वरेण्यानां प्रमाणानामुपलब्धा-नाञ्च मतं मीमांसयित्वा, कल्पनापेक्षया, आप्तवाक्यप्रमाणप्राबल्यात् पौर्वापर्य-पर्यालोचनयाऽऽचार्याणाम् मन्त्रब्राह्मणयोर्वेदनामधेयमित्येवपक्षः प्रबलः । तदनुसरणे च नैवकाऽपि निरूपणावसरः निरस्यत्वात् ।

यद्यपि यावदद्यापि अनुसन्धानं वैदिकवाङ्मयनिरूपकाणां विदुषां वर्तते, नास्ति तावत्कश्चित्प्रतिभाप्रदर्शनावसरः तथा हि -

यद् यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

इति मन्वादिमेवस्वीकृत्य आपस्तम्बप्रभृतीनां सायणादीनां पक्षः प्रति-किञ्चिदपि अस्माकं स्यादिति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदाङ्ग साहित्यम्

अङ्गशब्दस्य व्युत्पत्तिलभ्यो ऽर्थः उपकारक इति भवति यथा-

अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अंगानि ।

वैदिकसाहित्यैतिहासावलोकनेन ज्ञायते यद् वेदस्य रक्षार्थं एव वेदाङ्गानि ऋषिभिः समाम्नातानि। उक्तं यथा निरुक्ते[1]-

साक्षात्कृतधर्माणः ऋषयो बभूवुः । ते ऽवरेभ्यः असाक्षात्कृतधर्मभ्यः उपदेशेन मंत्रान् संप्रादुः। उपदेशाय ग्लायन्तः अवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुः । वेदं च वेदांगानि च ।

वेदाङ्गानां प्रयोजनं न केवलं ग्रन्थात्मकानां प्रकारेण रक्षणकौशलमपितु वेदार्थस्य सम्यक्परिज्ञानपूर्वकं स्वाध्यायपाठनमप्यस्ति । वेदान्तसारेऽपि वेदान्तकारः अधिकारिप्रकरणे वक्ति अधिकारी तु विधि[2]-वदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गत-निखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता इति ।

१- निरु० १

२- वेदान्तसार अधिकारी तु ---

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतो वेदांगानामध्ययनेनैव सम्यगर्थपरिज्ञानं सम्भवति यज्ञादिकार्यं च निष्पाद्यते। ततश्च कर्मणि प्रवृत्तिः अनुष्ठानं निवृत्तिश्च संभवा ततः सदसत्पदार्थ-विवेकोदयः ततः ज्ञानप्राप्तिः ततो मोक्षः। अतएषां सूत्राणां महत्त्वमपि। एवं कल्पस्य वेदांगत्वमस्तीति भावः। वैदिकसाहित्येतिहासविदिषु एवं सूत्रसाहित्यं वेदांगं मन्यमानः वेदस्य तृतीयमवस्थां समावेशयति[1]।

वेदांगानि षट्संख्याकानि सन्ति। तत्र च तेषां परिचयः -

<u>शिक्षा-</u>

वेदांगेषु शिक्षाग्रन्थं मंत्राणां शुद्धोच्चारणार्थं प्रमुखम्[2]। शिक्षायाः अभावे वेदाध्ययनमसंभवम्। अतः शिक्षा निखिलवेदार्थं परमावश्यकी। शिक्षायां नैवकेवलं उच्चारणस्यैव महत्त्वं प्रदर्शितमस्ति, प्रत्युत अध्ययनकारिकाः अपि सामान्य-विशेषविषयाः शिक्षायां ज्ञाप्यन्ते। यथा- अध्ययनसंहो, वेदाध्ययने-शारीरिकोस्थितिः, अध्येतृणां कृते आहारव्यवहाराचरणानां च समुचितं ज्ञानमित्यादि। वर्णदोषनिवेकार्थं तु प्रातिशाख्यग्रन्थाः अस्य शिक्षाग्रन्थस्य उपजीव्यत्वं भजन्ते एव। शिक्षाग्रन्थाः अध्येतृणां परिमितरूपं अनुस्यूताः।

१- The third youngest stage of Vedic literature is the Vedangas also called - sutra. -See. Life in ancient India.

२- वैदिक सा० का इतिहास उपा० पृ० १५१।

CC.O Sampurnanand University Collection. Digitized by eGangotri

अन्यच्च वैशिष्ट्यमस्या अस्ति यत् उच्चार-कण्ठ-स्वरादि विषये शिक्षाया: महत्त्वमस्ति । यथा उक्तं पाणिनीयशिक्षायाम् -

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो पराधात्[1] ।।

शिक्षा ग्रन्थानामध्ये: नारद-व्यास-वसिष्ठ-याज्ञवल्क्यादीनां प्रसिद्धास्ते: अत्र प्राप्यते । व्यासशिक्षाया: सम्बन्ध तैत्तिरीयप्रातिशाख्येन अस्ति ।

तैत्तिरीयोपनिषदनुसारेण[2] शिक्षायाः षडङ्गानि सन्ति -

वर्णः, स्वरः, मात्रा, बलं, साम, सन्तानश्च ।

वैदिकवाङ्मये प्रवेशाय शिक्षायाः ज्ञानं परमावश्यकमिति मम धीः । शिक्षाग्रन्थाः सरलेन प्रकारेण वर्णोत्पत्तिं[3] निरूप्य च वर्णोच्चारणमाश्रित्य स्वरोच्चारणपद्धतिं स्पष्टयन्ति। तथा च बालानां कृते विषयवस्तु सुबोध्यमपि भवति। शिक्षायाः अध्ययनपूर्वकं गुरुमुखोच्चारणानन्तरमनूच्चारणं वेदस्य सरलं भवति ।

१- पा०शिक्षा ५२

२- तै०उ०शिक्षा हरिदास उपा० पृ० १७३, वर्णः, मात्रा बलम् साम, सन्तानः इत्युक्तः शिक्षाध्यायः ।

३- पा०शि० ५६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतः शिक्षातत्त्वं वेदाङ्गेषु प्रथमेन प्रविष्टम् इति प्रातीतिकेन प्रतीयते। अन्यानि वेदाङ्गानि अविद्यया पूर्णानि न सन्ति अपितु स्वकीयम् अंगं वा गृहीत्वा अनुदिष्टानि, परन्तु शिक्षाग्रन्थेषु प्रायशः सर्वे आवश्यकनियमाः वेदोच्चारणबोधकाः व्याख्याताः सन्ति।[1] भाषानिर्वचनम् हस्तस्वरादिनियन्त्रणं शरीरावयवानामवस्थितिः - इत्यादिविषयाः अत्रत्यास्त सन्निबद्धाः सन्ति। प्रातिशाख्यम् उदात्तादिस्वराणां, व्याकरण-प्रक्रियासहित-पदपाठादीनां वर्णनं च कृत्वा सार्थकं भवति। निरुक्तं तु निर्वचनप्राधान्यम्। परन्तु निरुक्तस्य देवताविषयं शिक्षाग्रन्थो ऽपि प्रतिपादयति, प्रातिशाख्यस्य उदात्तादिस्वराणां विशेषेण व्याख्यानं शिक्षाग्रन्थस्यापि विषयः, सन्धीनां वर्णनमपि शिक्षाग्रन्थे कृतमस्ति। अनुस्वारादीनां गुंकारत्वादिका वैदिकोच्चारणप्रक्रिया शिक्षया इति शिक्षायाः महत्त्वं स्पष्टम्।

प्रधानशिक्षाग्रन्थानां परिचयः

१- व्यासशिक्षा- व्यासेन प्रणीतत्वादयं शिक्षाग्रन्थः तन्नाम्ना प्रथितः।

२- नारदीयशिक्षा- अयं शिक्षाग्रन्थः तैत्तिरीयशाखया सम्बद्धो ऽस्ति।

१- प्रा० शि० ८। १०-१२-१५

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

३- <u>पाणिनीय शिक्षा</u>-अस्मिन् शिक्षाग्रन्थे ६० श्लोकाः सन्ति।
अस्य प्रणेता कश्चित् वैयाकरण स्यात्।
पाणिनेः कर्तृत्वविषये विवादो स्ति ।

४- <u>याज्ञवल्क्यशिक्षा</u>- अस्य शिक्षाग्रन्थस्य सम्बन्धः शुक्लयजुर्वेदस्य
वाजसनेयिसंहितया स्ति।अस्मिन् शिक्षाग्रन्थे
लोपागम-विकार-प्रकृतिभावाद्यो विषयाः
उल्लिखिताः सन्ति ।वर्णस्वरूपं वर्णानां व्यस्त-
संयस्तत्वाद्यौ विषयाश्च सम्यग् वर्णिताः सन्ति

५-<u>वासिष्ठीशिक्षा</u>- अस्याः शिक्षायाः सम्बन्धो ऽपि वाजसनेयिसंहितया
वर्तते ।तदनुसारं शुक्लयजुर्वेदस्य मन्त्रसंहितायां
ऋग्वेदमन्त्राः १४६७ सन्ति।यजुषां संख्या
२,८२३ अस्ति ।

६- <u>कात्यायनीशिक्षा</u>-अस्मिन् शिक्षाग्रन्थे त्रयोदश श्लोकाः सन्ति ।

७-<u>पाराशरीशिक्षा</u>- अस्मिन् शिक्षाग्रन्थे १७० श्लोकाः सन्ति।
स्वर-वर्ण-सन्ध्युच्चारणाद्यो विषयाः अस्याः
शिक्षायाः विषयाः सन्ति ।

८-<u>माण्डव्यशिक्षा</u>- अस्य शिक्षाग्रन्थस्य सम्बन्धः शुक्लयजुर्वेदेन वर्तते ।
अस्यां शिक्षायाम् ओष्ठ्यवर्णानां विचारः कृतो स्ति

९- <u>अमोघानन्दिनीशिक्षा</u>- अस्मिन् शिक्षाग्रन्थे १३०श्लोकाः सन्ति,
विषयास्तु: स्वरवर्णोच्चारणादिनियमाः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१०–<u>माध्यन्दिनीशिक्षा</u>– अस्यां शिक्षायां द्वित्वविधानमेव वर्तते । अयं
शिक्षाग्रन्थः गद्यपद्यात्मकरूपेण द्विधा विभक्तो स्ति।

११–<u>वर्णरत्नप्रदीपिका</u>– अस्यारचयिता भारद्वाजवंशीयः कश्चित् अमरेशनामको
विद्वान् स्ति।अस्यां शिक्षायां २२७श्लोकाः
संकलिताः सन्ति।

१२–<u>केशवीशिक्षा</u>– अस्याः शिक्षायाः प्रणेता दैवज्ञकेशवो स्ति।
गद्यपद्यात्मकेयं शिक्षाद्विधा वर्तते ।

१३–<u>मल्लशर्मशिक्षा</u>– अस्याः शिक्षायाः प्रणेता कश्चित् मल्लशर्मनामकः
विद्वान् आसीदिति ज्ञायते ।

१४–<u>स्वरांकुशशिक्षा</u>– अस्यां शिक्षायां २५ पद्येषु स्वराणां विवेचनमस्ति
अस्याः रचयिता जयन्तस्वामिनामा कश्चित् विद्वान्-
स्ति ।

१५–<u>षोडशश्लोकीशिक्षा</u>– अस्याः शिक्षायाः प्रणेता रामकृष्णो स्ति ।
अस्यां शिक्षायां १६ पद्येषु वर्ण-स्वराणां वर्णन-
मस्ति ।

१६–<u>अवसाननिर्णयशिक्षा</u>– अस्य शिक्षाग्रन्थस्य लेखकः अनन्तदेवो स्ति।शुक्ल
यजुर्वेदीयं ग्रन्थः प्रकाशितः ।

१७–<u>स्वरभक्तिलक्षणशिक्षा</u>–अस्याः शिक्षायाः रचयिता कात्यायनमहाभागः
सन्ति ।

१८–<u>प्रातिशाख्यप्रदीपशिक्षा</u>– अस्य लेखकः कश्चित् बालकृष्णो स्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१९-<u>नारदीयशिक्षा</u>- इयं सामवेदीयशिक्षा नारदप्रणीता स्ति । गौतम लोमशेति द्वौ शिक्षाग्रन्थावपि सामवेदेन सम्बन्धितौ स्तः ।

२०-<u>माण्डूकीशिक्षा</u>- अथर्ववेदस्य इयं शिक्षा १७९श्लोकान्विता स्ति। अथर्ववेदस्वरादिविवेचनम् प्राधान्येन विवेचितमस्ति ।

एतदतिरिक्तं गरुड शिक्षा क्रमसंधान शिक्षा, मनःस्वार शिक्षा इत्यादीना-मपि उल्लेखः प्राप्यते ।

प्रातिशाख्य ग्रन्थानामपि गणना शिक्षा ग्रन्थेष्वेव भवति, परन्तु अत्र मुख्यत्वेन पूर्वोक्ता एव ग्रन्थाः शिक्षाग्रन्थत्वाख्याः सन्ति ।

व्याकरणम्

कस्याश्चिदपि भाषायाः सामाजिक-व्यावहारिक - दार्शनिक-तत्त्वानामन्वेषणाय वास्तविकस्वरूपस्य ज्ञानाय च तद्गतस्य व्याकरणस्य ज्ञानं परमावश्यकमेव भवति ।

'मुखं व्याकरणं स्मृतम्' इति शिक्षावचनेन मुखस्थानीयत्वात् व्याकरणं भाषायाः मूलभूतं तत्त्वमुद्घोषति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

"व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्" इति करणव्युत्पत्त्या शब्दनिष्पत्तिः । शब्दानामर्थाभिज्ञानार्थं, स्पष्टं च मूलप्रकृतिप्रत्ययज्ञानार्थं प्रकृतिप्रत्ययविच्छेदनमावश्यकम्, तच्च व्याकरणशास्त्रादेव ।

अस्याभावे दुर्बोधः भवति वेदशब्दराशिः । अतएव "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"[1] इत्युक्तं व्याकरणस्य भाष्यकारेण । महर्षि शाकटायनानुसारं अपूर्वां वाक् अव्याकृतासीत्, तां चेन्द्रः प्रकृतिप्रत्ययविभागेन व्याकृतां चकारेति शास्त्रम् (ब्राह्मणम्) । अपूर्वं व्याकरणं कृत्वा बृहस्पतिमध्यापयामास । बृहस्पतिः इन्द्रमध्यापयामास, ततश्चेन्द्रः भारद्वाजं, भारद्वाजः ब्राह्मणास्तु अधीतवन्तः इति । अतः पूर्वं प्रकृतिनिर्णयरहिता अव्याकृता वाक् आसीत् ।[2]

अस्मिन् विषये अस्मत्प्रमाणशास्त्रज्ञाः श्रीमन्तः पं० रामप्रसादत्रिपाठिनः गुरवः बहुसूत्राणां विषये वैज्ञानिकं तथ्यं समुद्घोषयन्ति । यद्यपि नैव तैः लिखितं परन्तु अस्यार्थं मया पृष्टे श्रुतमिदं तेषां मुखात् यद् व्याकरणस्य सूत्राणां वास्तविकमहत्त्वमस्ति । तानि संज्ञारूपाण्यपि सूत्राणि सिद्धिप्रापकाणि सन्ति । वृद्धिरादैजादिसंज्ञावस्थानार्थेऽपि सुस्पष्टोऽस्ति कर्णेन्द्रियप्रत्यक्षं तथ्यम् ।

१- पृ० पस्पशाह्निक ।

२- इन्द्रश्चन्द्रः काशकृत्स्नः पिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।। पं०गा०व०ति०पृ० १२३-२४
पूर्वं पद्मभुवा प्रोक्तं कुलेन्द्रेण प्रकाशितम् ।
तद् बुधेभ्यः वररुचिः कुमारादिन्द्र नामकम् ।।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्यां परम्परायां पाणिनेः[1] व्याकरणस्य वेदाङ्गत्व विषये विशेषत्वेन निर्देशमाप्तोऽस्ति । पाणिनिकात्यायनपतञ्जलिप्रणीततयैतत् त्रिमुनि-व्याकरणम् । पाणिनेः कालः ईसवीयात् पूर्वं षष्ठशतकमिति निर्णीतम् । तदनन्तरं वार्तिककारस्य कात्यायनस्य कालः ईसवीपूर्वं चतुर्थशतकम् । ततश्च भाष्यकारः । एवं क्रमकल्पना ।

अस्य वेदाङ्गस्य प्रयोजन विषये मतद्वयं दृश्यते-

१- वररुचिसंहितानुसारेण रक्षोहागमलघ्वसन्देहाः, इति भेदात् पंच प्रयोजनानि ।

२- पतञ्जलिमतानुसारेण त्रयोदश प्रयोजनानि व्याकरणस्य । यथा-अपभाषणम्, दुष्टः, शब्दः, अर्थज्ञानम्, धर्मलाभः, नामकरणम्, इत्यादयो विस्तरेणात्र वर्णिताः सन्ति ।

सर्वेष्वेषु प्रयोजनेषु कतिपयानां प्रयोजनानां[2] पुष्टिः वैदिकेष्वपि शास्त्रेषु भवति । निरुक्तशास्त्रेऽपि स्फुटं प्रशंसा अधीतानां वर्णितास्ति । अर्थज्ञानञ्च वेदाङ्गेषु मुख्यतया व्याकरणेनैव भवति । अनर्थज्ञानामपि निन्दा तत्र वर्णितास्ति । यावद्व्याकरणस्य अधीतितया ज्ञानं न भवति तावदपूर्णमध्ययनं

१- वै०सा०का इति० पृ० २२६ (उपा०)

२- स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
-निरु० १

CC.O Sampurnanand University Collection. Digitized by eGangotri

संस्कृतव्याकरणस्य ।व्याकरणपद्धतौ यद्यपि मुख्यरूपेण पाणिनेः अष्टाध्यायाः ग्रहणं वेदांगत्वेन भवति, परन्तु मुख्यत्वात् प्रातिशाख्यस्यापि गणना वेदांगत्वेन वैदिकव्याकरणशास्त्ररूपेण कर्तव्या इति प्रतीयते । "स्वर-संस्कारयोश्छंदसि नियमः" इत्यत्र छन्दसि वेदे स्वरसंस्कारयोः विषयवर्णनं प्रातिशाख्येषु कृतमस्ति ।संस्कारशब्देनप्रकृति-प्रत्यय- विभागपूर्विका व्याकरणप्रक्रियैव गृहीता स्या व्याकरणमन्तरा न छन्दसि स्वरसंस्कारौ भवितुमर्हतः[1] ।

स्वरत्वेन उदात्तानुदात्तस्वरितानां ग्रहणम् । संस्कारस्य-लोप-आगम वर्णविकार- प्रकृतिभाव- लक्षणः ।वर्णविकार,लोपागमादिविषयाः पाणिनेः व्याकरणेन अस्पष्टं भवति । अतो व्याकरणेषु वैदिकसम्पूर्णमिदं प्रातिशाख्यं नाम व्याकरणम्।

वेदस्य रक्षणे वैदिकशब्दस्वरूपप्रतिपादने च प्रातिशाख्यानां महत् उपादेयत्वमस्ति । प्रातिशाख्यं विना वैदिकप्रकृतिप्रत्ययैः ,विकृत्यादिभेदानाम्, उदात्तानुदात्तस्वरितादीनां स्वरलक्षणानाञ्च ज्ञानमसंभवम् । पाणिनेः व्याकरणे[2] "बहुलं छन्दसि" इत्यस्य सूत्रस्य पौनःपुन्येन पाठो भवति,सौनिश्चरछन्दसि वैकल्पिकाः ।"दृष्टानुविधिश्छन्दसि" इत्यादिभिः सूत्रैः परिज्ञायते यत् वैदिक-पदनिष्पत्तौ लक्ष्यानुसारेणापि लक्षणानि भवन्तीति ।लौकिकवैदिकयोरेव वैभिन्न्यम् । अपि च पाणिनिसूत्रैः वैदिक-पदानां निष्पत्तिर्भवितुं नार्हति ।प्रातिशाख्यैव तत्पदानां निष्पत्तिं कर्तुं शक्नोति अर्थ भवति ।

१- ऋग्वेद प्रा०शाख्यम् १० पटलम् ।

२- सि०कौ० वैदिक प्रक्रिया ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतः प्रातिशाख्यग्रन्थाः प्राचीना एव । यतो हि पाणिनेः सूत्रेषु प्रातिशाख्य ग्रन्थस्य साम्यत्वं प्रतीयते । यथा- "अन्त्यात् वर्णात् पूर्व उपधा, ऋटुरषाणां, षटौ मूर्धनि, रौ जिह्वामूले, दुर्लिङ्गदन्तौ, अः विसर्जनीयाः कण्ठे, मुखनासिकाकरणोऽनुनासिकः" - इत्यादीनि बहूनि सूत्राणि पाणिनिसूत्रैः सह साम्यमावहन्ति । अनेन प्रतीयते यद् व्याकरणस्य मूलाधारभूताः प्रातिशाख्यग्रन्था एव आसन्निति । कालान्तरे ऐन्द्रादिव्याकरणग्रन्था लोके प्रसिद्धाः । प्रातिशाख्यानि च वेदमनुसृत्य प्रणीतानि प्रतीयन्ते । एवं रीत्या स्वरसंस्काराः स्वरूपनिष्पत्ति-र्यादृक् प्रातिशाख्यग्रन्थेषु प्राप्यते न तथा व्याकरणग्रन्थेषु[2] । कात्यायनादयो महर्षयः एव प्रातिशाख्यानां प्रवक्तारः आसन्निति ग्रन्थोपक्रमे उल्लेखेन ज्ञायते । अतो वेदाङ्गत्वेन यथा व्याकरणं तथैव तत्सहायकानि प्रातिशाख्यानीति मे मतम् । अष्टौ विकृतयः जटादिकाः प्रातिशाख्यज्ञानमन्तरा अज्ञाता भवन्ति । नैव केवलं व्याकरणवत् सन्धिकार्यमेवास्य, अपितु वर्णानां देवतादिविचारः गोत्रादिविचारश्चापि अत्र क्रियते । अस्यैव पूर्णसाम्यत्वात् निरुक्तेऽपि व्याकरणत्वमापतति, परन्तु निरुक्तस्य[3] प्रयोजनं भिन्नमस्ति । यथा- स्वमन्त्रेण पदविभागो न जायते इत्यादि परन्तु प्रातिशाख्यस्य सिद्धान्तः भिन्नः । पदविभागस्थलेषु प्रातिशाख्य-निरुक्तयोः साम्यत्वं प्रतीयते । यथा-

---

१- तुलनीय- संज्ञाप्रकरणम् (सि०कौ०)

२- इत्थं स्वरसंस्कारं प्रतिष्ठापयिता भगवान् कात्यायनः । शु०य०प्रा०८।३८

३- यथा स्वरसंस्कारयोः स्वरूप प्रतिपादने प्रातिशाख्यमस्ति तथैव तद्रूपाणां व्याख्याने तेषां स्वरूप प्रतिपादने च निरुक्तशास्त्रं प्रवृत्तमस्ति । यत व्याकरण-शास्त्रं स्वल्पस्य पारतन्त्र्यात् वैदिकपदनिर्वचने दुर्बलं भवति तस्मादस्ति निरुक्त शास्त्रस्य महत्त्वम् । अत एव भगवता भाष्ये स्पष्टमेव समुद्घोषितं "तस्मादिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम् स्वार्थसाधकञ्चेति"

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रातिशाख्ये- 'नामाख्यातोपसर्गनिपाताः[१]'

निरुक्ते - 'चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च' इति ।

कतिपये प्रातिशाख्यीयविषयाः पुरुषोत्तमायामपि दरीदृश्यन्ते । अतो व्याकरणस्य शक्तिः वेदे तथा उपकारिणी यथा काव्ये 'शक्तिः' उपकारोऽपि भवति । व्याकरणस्य वेदाङ्गत्वविषये[२] 'विन्टरनित्ज' महाभागेन अवश्यमन्तव्येण प्रकाशितम् ।

१- प्रातिशाख्य अध्याय ८।१२ ।

२- व्याकरण परम्परागत ग्रंथ अथवा लुप्त हो चुके हैं। प्रारंभ में व्याकरण विज्ञान की रचना भी वैदिक परिषदों के अनुसार वेदार्थ को सुगम करने के लिए हुयी होगी, क्योंकि आरण्यक ग्रन्थों में भी व्याकरणशास्त्र की थोड़ी-बहुत परिभाषाएं जहाँ-तहाँ बिखरी मिलती हैं। व्याकरण शास्त्र के प्राचीनतम ग्रंथ पाणिनीय अष्टाध्यायी वैदिक प्रकरण को बहुत ही कम छुआ गया है। पाणिनि का सम्बन्ध न किसी वैदिक संहिता से है, न किसी संप्रदाय से है। इसकी रचना भी किसी ऐसे युग में हुई थी जब की व्याकरणशास्त्र धार्मिक संप्रदायों से अथवा पृथक् हुए, स्वतंत्र परम्पराएं निर्धारित हो चुकी थीं और भारत में अध्ययन अध्यापन की यह एक राष्ट्रीय विशेषता रही है कि एक विज्ञान (या उस विज्ञान के एक अंश का) सूत्रपात किसी युग में एक धार्मिक अध्ययन का अंग बनकर हुआ तो आगे चलकर उसका विकास प्रायः एक स्वतंत्र दिशा ही पकड़ गया ।

३- प्राचीन भा०का० इति० विन्टरनित्ज- वेदवेदाङ्गभाग ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निरुक्तम्

निरुक्तशब्दस्यार्थावबोधकानि विभिन्नानि मतानि सन्ति । तत्रान्यतमस्तु "व्युत्पत्तिः" इत्येव अर्थः प्रतीयते । निरुक्तमिति शब्देन तत्पदनिर्वचनपूर्वकं पदव्याख्यानात्मकस्य निघण्टोर्व्याख्यानग्रन्थः, निर्वचनशास्त्रम् इति बोधो भवति। निरुक्तस्य पंचविधत्वं कथयन्ति पूर्वाचार्याः[1] । प्रायः केषांचित् अविज्ञातार्थानां वैदिकशब्दानां निर्वचनं, तथा च निगूढार्थकानां अनेकार्थानाम् शब्दानां प्रायशः निघण्टौ समावेशः कृतो ऽस्ति । तेषां च निरुक्तशास्त्रे विस्तरेण व्याख्यानं[2] यास्काचार्येण कृतमस्ति । प्राधान्येन अपौरुषेयस्य वेदस्यातीन्द्रियकानां शब्दानां दुर्बोधत्वदूरीकरणार्थमेव निरुक्तस्याविर्भाव इति । अतो वेदस्य रक्षार्थं वेदाङ्गेषु निरुक्तस्य प्रमुखस्थानमस्ति । निरुक्तशास्त्रं मूलरूपेण द्वादशाध्यायात्मकमेव, परन्तु चतुर्दशाध्यायात्मकं[3] भवति, परिशिष्टद्वय समावेशेन । केषांमते परिशिष्टस्य कर्ता ऽन्यः कश्चिद् यास्कशिष्यः । परन्तु भारतीय परम्परायां तु सम्पूर्णस्य निरुक्तस्य कर्ता यास्काचार्यः स एवेति सुविदितं सर्वेषाम् । यास्काचार्यः स्वकीये निरुक्तशास्त्रे द्वादशसंख्याकानां निरुक्तकाराणामुल्लेखं करोति । एवं रीत्या निरुक्तशास्त्रप्रणेता वा यास्कस्त्रयोदशतमो ऽस्तीति सिध्यति ।

१- वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम् ।।

२- समाम्नायः समाम्नातः । स व्याख्यातव्यः ।

३- निरुक्तं चतुर्दशप्रभेदम् । दुर्गवृत्ति १-१३ वें०सा०ए०सि०पृ० ३२८

CC.O Sampurnanand University Collection. Digitized by eGangotri

निघण्टुकालानन्तरमस्यारम्भस्य कालः । पुराणार्थानुसारेण निरुक्तशास्त्रस्य प्रणेतारः बहवः सन्ति ।

निघण्टोः कर्ता प्रजापतिः[1] कश्यप इति विविध पुराणेषूक्तम् ।

यास्कप्रणीतं निरुक्तशास्त्रं काण्डत्रयात्मकमस्ति । अत्र त्रिकाण्डात्मके निघण्टौ गवादिदेवपत्न्यन्तो वैदिकशब्दराशिः समाम्नातो ऽस्ति । तस्यैव शब्दराशेर्व्याख्यानं काण्डत्रये आनुपूर्व्येण कृतमस्ति । यास्काचार्यस्य समय एव निरुक्तस्य समयः सो ऽपि पाणिनेः पूर्वम् । महाभारतानुशीलनाधारेण यास्कस्य समयः विक्रमपूर्वं सप्तमशतकं वा वर्षाणि इति निश्चितम् । यास्काचार्यं विन्टरनित्सप्रभृतयः पाश्चात्यविद्वांसः पूर्ववर्तित्वेन स्वीकुर्वन्ति । निरुक्तपरिशीलनपरम्परायाः समयः वैदिकसाहित्यविकासावलोकनेन विक्रमपूर्वमेव निर्णीतो भवति ।

निरुक्तशास्त्रस्य वैशिष्ट्यं महत्त्वं चोपस्थाप्यते । निरुक्तशास्त्रं वेदानिर्वचनशास्त्रमस्ति । यास्काचार्यैः स्वनिरुक्तशास्त्रे प्राचीनानां निरुक्तकाराणां मतान्युपस्थाप्य स्वाभिमतं व्याख्यानपद्धतिं निर्वचनशैलीं च विस्तरेण प्रकटितम् । यास्काचार्यस्यैव वैशिष्ट्यमस्ति यत् वेदार्थस्य विविधनिरुक्तं निर्वचनस्याधाराद्विश्लेषणात् । अतएव शब्दानां निर्वचनपूर्वं प्रायः सर्वं स्वपदार्थानां यास्कः कृतवानस्ति । निरुक्तशास्त्रं च वेदविषयकमेव

१- वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत ।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम् ॥
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः ॥
—महाभारत मोक्षपर्व ३४२।८६-८७

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रस्तुतानां विज्ञानवतोऽपि तत्र महत्त्वमस्ति । दुर्बोधत्वादस्य ग्रन्थस्य, यास्काचार्यः 'नावैयाकरणाय' इति निर्देशेन निरुक्ताध्ययनार्थं व्याकरणस्य महत्त्वं द्योतयति। निरुक्ते वैज्ञानिकदृष्ट्या सह ऐतिहासिकं,आलंकारिकं,दार्शनिकं च तत्त्वं दरीदृश्यते । यथा दायादादिप्रकरणम् । निरुक्तशास्त्रे प्राधान्येन शब्दानां निर्वचनम् आलंकारिक भाषायां प्राप्यते,येन पाठकानां छात्राणां,मानसे नोदेति । यावन्मात्रायां शब्दाह्लादप्रेरणमिच्छन्ति पाठकाः तावत् नूनं तत्रैव गृह्णन्ति। व्युत्पत्तिषु वैज्ञानिकी व्याख्याप्रणाली वर्तते । यास्काचार्यस्य शास्त्रार्थप्रक्रियायाः कौशलेन मनः प्रसीदति । पूर्वपक्षमाश्रित्य तत्र खण्डनं तदनु समन्वयदर्शनमाचार्यस्य वैशिष्ट्यमस्ति ।

<u>निरुक्तगतानां प्रमुखविषयाणां वर्णनम्</u>

निरुक्तस्य प्रथमाध्याये प्राधान्येन निरुक्तशास्त्रस्वरूपस्य निघण्टोः लक्षणं पदानां भेदाः शब्दानां धातुजसिद्धान्तः एतस्य शास्त्रस्योपयोगितादयो विषयाः वर्णिताः सन्ति ।

द्वितीयाध्याये निर्वचनसिद्धान्तप्रतिपादनम्,शब्देषु प्रकृतिप्रत्ययलोपागम-विकारादिविचारः,वैदिकलौकिक-शब्दसम्बन्धश्च ।

तृतीये शब्दानां निर्वचनेन सह दायादनामवर्णनं उत्तराधिकारवर्णन-मित्यादयो नैके विषयाः उपलभ्यन्ते ।

चतुर्थे ऐकपदिकाख्यानां जहा, निधा, इत्यादिप्रभृतीनामपदानां वर्णनम् । एते च विषयाः षष्ठाध्यायपर्यन्तं वर्णिताः । सप्तमाध्यायादारभ्य अवशिष्टेषु अध्यायेषु दैवतकाण्डीयप्रतिपाद्यविषया अंकिताः सन्ति। एभ्यः अन्येऽपि विषयाः उपाख्यानादयः वर्णिताः सन्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्थलविशेषेषु दार्शनिकतत्त्वान्यपि विद्यमानानि सन्ति ।

मंत्रस्य सार्थकतासिद्ध्यर्थमप्यस्य निरुक्तशास्त्रस्योपयोगिता महत्त्वञ्च प्रतिष्ठितमस्ति । अस्मिन् ग्रन्थे कौत्सस्य सिद्धान्तखंडनपूर्वकं यास्केन सिद्धान्तपक्षे मंत्राणां सार्थकत्वं सम्यक् संस्थापयति । यास्कमतानुसारेण सर्वे शब्दाः धातुजाः[1] सन्ति ।

निरुक्तकृत् आचार्यः यास्कः सर्वेषां वैदिकशब्दानां निर्वचने युक्तिं-प्रतिपादयति । तस्य मुख्यसिद्धान्तोऽयं यत्- न त्वेव न निर्ब्रूयात् इति।अर्थात् सर्वेषां वैदिकशब्दानां निर्वचनमवश्यं कर्त्तव्यमिति भावः । अन्यच्च वैशिष्ट्य-मस्य शास्त्रस्य षड्भावविकारविवेचने प्रतिभाति ।अत्र सम्पूर्णस्य जगतोऽनन्तस्य जीवनस्य षट्सु अवस्थाविशेषेषु विभाजनं निश्चितमेव वैज्ञानिकं रहस्यमावहति। अन्यान्यपि वैशिष्ट्यानि निरुक्तशास्त्रे दरीदृश्यन्ते ।

दैवतकाण्डस्य महत्त्वमनिर्वचनीयमेव प्रतीयते । अनेन भारतीयसंस्कृतौ बहवो चमत्काराः दृश्यन्ते । देवतानां वर्णनं,प्रकाराः,तेषां स्वरूपभेदानामुल्लेखः देवानामाकारविधानं,वैदिक-देवानामुल्लेखं,तेषां नामतो रहस्यं,स्तुतिवाक्य-मधिकृत्य प्रायशः देवानां गुणकर्मव्याख्यानपुरस्सरं स्वरूपव्याख्यानमत्यन्तं महत्त्वपूर्ण-मस्ति ।

1.(Yaska maintains that)every noun is derived from a verbal root and meets the various objections raised against it, a theory on which the whole system of panini is based, and which is infact,the postulate of modern-philology. -History of ancient sanskrit literature. p.161.

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

देवानां विभागं आचार्यो यास्क: त्रिधा करोति पृथिवीस्थानीया: अन्तरिक्षस्थानीया: द्युलोकस्थाश्च ।

पृथिवीस्था देवता- अग्नि:
अन्तरिक्षस्थानीयो वायुरिन्द्रो वा ।
द्युस्थानीय: आदित्य: ।

अनेनैव प्रकारेण त्रिविधा: मन्त्रा: विवृणोति, प्रत्यक्षकृता:, परोक्षकृता:, आध्यात्मिकप्रश्नेतिभेदेन ।

अस्मिन् देवताविभागेऽपि मतमतान्तराणि सन्ति। तत्र पाश्चात्या: मैक्डानलप्रमुखा: मुख्या: सन्ति। ते: तन्मतानुसारं देवताविभागं प्रस्तुमो -

१- <u>स्वर्देवता:</u> - द्यौ, वरुण:, सूर्य:, मित्र:, सविता, पूषा, विष्णु:, विवस्वान्, आदित्यगण, उषा: अश्विनौ,

२- <u>अन्तरिक्षदेवता:</u>- इन्द्र:, त्रित:आप्त्य:, अपांनपात्, मातरिश्वा, अहिर्बुध्न्य:, अज एकपात्, रुद्र:मरुद्गण:, पर्जन्य:, आप:,

३- <u>पृथिवीस्था:</u> - सरस्वती(नद:) पृथिवी, अग्नि:, सोमश्च ।

४- <u>भावात्मकदेवता:</u>- सविता, धाता, त्वष्टा, धर्ता, विश्वकर्मा, प्रजापति:, मन्यु:, श्रद्धा, अदिति:, दितिश्च ।

५- <u>देव्य:</u>- उषा, वाक्, पुरन्धि:, धिषणा, इळा, सरस्वती, राका, पृश्नि:, इन्द्राणी: वरुणानी अग्नायी, सूर्या, देवपत्न्य: ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

६-युग्मदेवता: -मित्रावरुणौ, इन्द्रावरुणौ, द्यावापृथिवी, (रोदसी) इन्द्रवायू, इन्द्राग्नी, इन्द्राबृहस्पती, इन्द्राविष्णू:, इन्द्रापूषणौ, सोमरुद्रौ, अग्नीषोमौ ।

७-देवतागणा:- मरुद्गणा:(२१ वा १८०) रुद्रगणा:, आदित्यगणा:, ७ वा ८ विश्वेदेवा: ।

८- क्षुद्रदेवता: - ऋभुगणा:, अप्सरोगणा:, गन्धर्वगणाश्च, ।

ध्वनिविज्ञानविषये पि निरुक्तकारस्यं प्राधान्यमापद्यति । तथापि निर्वचने यास्क: वर्णविकृतिप्रक्रियाया: प्रदर्शनं करोति । सा प्रक्रिया अतीव वैज्ञानिकी प्रतिभाति ।यद्यपि राजवाडे[१]प्रभृतय: केचन अर्वाचीनविद्वांस: अवैज्ञानिकमिति मन्वाना: निरुक्तं गर्हयन्ति यथा-

Nirukta method is a strange one it hardly deserves the name of Shastra or science.

Nirukta of etymologes in the Nirukta seems senseless, they are based on a wrong theory of derivation on account of this theory numbers of derivations are really invention.

Sidheshwar- Shows that he(Yaska) has a passion, a craze for etymology.

१- पूर्वोद्धृतग्रन्थ पृ० २५

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

परन्तु विन्टरनित्स प्रमुखाः वैदेशिकाः विद्वांसः वैदेशिका अपि तं प्रशंसन्ति । अत्र केवल आलोचकानां उपालोचनान्यन्य वाक्यानि प्रदर्श्यन्ते -

Yaska was so much of an etymologist that his craze for etymology over powered controlled and crushed his imagination for poverty of his imagination is remarkable, owing to this serious defect he is drive not only to offer superfluous and unnecessary but also loose unsound and even wild etymologies. It does not seem to have occured to him that the meaning of a word could be Metaforically extended. Even with a metaforically meaning he felt the need of a separate etymology. "p.5"

-History of Indian literature
by- Winternitze.

छन्दः

वेदाङ्गेषु छन्दसां स्थानं विशिष्टदृष्ट्या सर्वे छन्दोमुक्ता एव ।

छन्दः शब्दार्थे ब्रुवन्तो नैके आचार्याः अनेकविधाः परिभाषाः कुर्वन्ति । छन्दः शब्दोऽयं 'छदि' आच्छादने इत्यनेन धातुना भवति । छन्दः आनि मंत्रानावृणोतीति । सर्वेषां मंत्राणां पृथक् पृथक् छन्दो भवत्येव । अस्मिन्नपि प्रश्ने कात्यायनेनोक्तं यन्नैव छन्दो विना मंत्रः भवन्तीति । लोके पद्यकाव्येषु एव छन्दो भवति, किन्तु वेदे नियमो नास्ति । यतोऽत्र गद्ये पद्ये च छन्दांसि भवन्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

छन्दांसि छादनादिति[1] छन्दःशब्दस्य व्युत्पत्तिः यास्काचार्येण प्रदर्शितास्ति। दुर्गाचार्योऽपि स्वभाष्ये मृत्युकात् निरुक्तिं प्रदर्श्य छन्दःशब्दस्य छादनार्थत्वमुक्तवान्। यथा- यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यतः तच्छन्दसां छन्दस्त्वम्" इति।

छन्दसः परम्परा अति प्राचीनतमा वर्तते। यथा-

छन्दोज्ञानमिदं[2] भवाद् भगवतो,
लेभे सुराणां गुरुः

तस्माद्दुश्च्यवनस्ततो सुर गुरुमाण्डव्यनामा ततः
माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गलः
तस्येदं यशसा गुरोर्भुविधृतं प्राप्यास्मदाद्यैः क्रमात्॥

अस्य परम्परा संक्षेपतया परम्परा एव वर्तते। अपौरुषेयाणां वैदिकस्वराणां मूलाधारं छन्दःशास्त्रमेव। वैदिकछन्दसां प्राधान्येन द्विविधं विभाजनमस्ति। देवप्रकार गणनानुसारं[3] पादाक्षरगणनानुसारं च। यद्यपि छन्दोगणना विषये मतैक्यं नास्ति तथापि वैदिकसाहित्येतिहासानुसारेण छन्दसां षड्विंशतिः संख्यां निश्चितास्ति। गायत्री पञ्चसंख्याकानि छन्दांसि नैव वेदेषु प्रयुज्यन्ते। अवशिष्टानि छन्दांस्याचार्याः सप्त स्रोतेषु विभजन्ति तेषु गायत्री प्रथमं[4] छन्दः। गीतायामपि भगवता कृष्णेन स्वात्मानो गायत्रीछन्दो

१- नि०७।७

२- वे०छ०भा०

३- वै०सा०का इतिहास पृ०३४६(बलदेव उपाध्याय)

४- छन्दांसि वै पुरो गो स्थानः। अन्नं वा पशवः तान्यस्यां वाच्यादयस्तस्मा-च्छन्दांसि। श०ब्रा० ८-५-२-१

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्यैव स्वीकृतम्, यथा गायत्र्यादिच्छन्दसामपि इति । छन्दः शास्त्रवृत्तिः वैदिककालादेव अस्ति इति ज्ञायते। कात्यायनप्रभृतिभिः ज्ञायते यत् मन्त्रादिषु छन्दोविरहितमन्त्राणां प्रयोगेण सुकरं न भाति । कात्यायनोक्तानुक्रमण्यां परिभाषया च इदं स्पष्टं भवति यत् अक्षरपरिमाणेन छन्दो भवति । छन्दःसु क्वचित् नियताक्षराणि भवन्ति परन्तु कस्यचिदपवादः । वेदाङ्गस्य प्रतिनिधिः पिङ्गलः छन्दःसूत्रैरिदानीं प्रसिद्धो वर्तते । षट्सु वेदाङ्गेषु विभक्तो यं ग्रन्थः छन्दःशास्त्रे सर्वत्र गौरवं स्थापयति । छन्दःसु सप्तच्छन्दांसि वैशिष्ट्य-मर्हन्ति यथा-

१–सप्तसङ्ख्या छन्दांसि वेदे[१] गायत्र्यादीनि । प्रथमच्छन्दांसि ।

२– गायत्र्येव त्रिष्टुप् च अनुष्टुब्जगती तथा ।
पङ्क्तिश्च बृहती चैव उष्णिक् चैव तु सप्तमम् ।।

छन्दःशब्दस्य[२] व्युत्पत्तौ अनेके भावाः परिदृश्यन्ते । अक्षराणां प्रावृत्ति-क्रमादपि छन्दांसि तु पठितानि भवन्ति नियतानि भेदात् ।

१– छन्दोविमर्शः वा०पृ० ४२–४५

छन्दोऽपि च वैदिकं प०पृ० १२५–४२

वेदानां गायत्र्यादि छन्दो नियतम् [illegible] छन्दांसि च छादनार्थं वेदस्याप्यपि ज्ञायते इति कथितम् । पु०–प०इ०म०पृ० ६–७ ।

२– क– छन्दांसि च्छादनात् । नि०७।१२
वेदानां गायत्र्यादि छन्दो नियतम् पुनश्छन्दांसीति
ख– छन्दः पदे निरोधे तु च । अमरकोषे ३।३।२२१
ग– गायत्री प्रमुखं छन्दः २।७।२२
घ– इच्छायां छन्दोऽपि च छन्दसि । काशिका १–२–३६
ङ– गायत्रीप्रभृति छन्दो वेदेऽप्यारोहति (शब्द)४०१
च– छन्दः पद्ये अभिलाषे (हेमकोश)४०१
छ– छन्दः पद्ये तु वेदे च स्वैराचाराभिलाषयोः । मेदिनि ३२
झ– छन्दोहीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम् । भरतमुनि।
ट– छन्दो भाषितं वाङ्मयस्याभिधानतः । छन्दोऽनुशासनम्
ठ– न छन्दांसि न्यायपूर्वं पादशो ब्रूते ।
ड– छन्दो वाङ्मयं न किञ्चिच्छन्दसां विना । छन्दोऽनुशासनम् १–२

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

छन्दसां प्रयोगं नैव केवलं माधुर्याभिवृद्धिप्राप्त्यर्थमेव प्रत्युतास्ति यथादृष्टाधिकारेऽपि । नियतछन्दोयुक्ता मन्त्राः एव देवताह्वाने, यज्ञे विनियुक्ता भवितुमर्हन्ति। छन्दःशास्त्रमधिकृत्य ऋषिभिः बहूनि लक्षणानि उक्तानि ।

भरतमुनिमतानुसारं दिव्य-दिव्येतर-मानुषभेदेन त्रिविधं छन्दः भवति। केचन पंचधा इति मन्यन्ते ।

छन्दःशास्त्रे प्रमुखं पिंगलछन्दःशास्त्रमेव वेदांगत्वमावहति यतो ह्यत्र वैदिक लौकिकादिच्छन्दसामुपदेशत्वात् । पिंगलस्य परिचयः यद्यपि सम्यक्तया नैव प्राप्यते, तथापि वैदिकसाहित्येतिहासग्रन्थानुसारेण प्रतीयते यत् पाणिनिनः अनुजः आसीत् पिंगलः । वैदिक-लौकिकछन्दसोर्विषये पृथक् पृथक् विधानमस्तीति पिंगलछन्दःसूत्रेषु दृश्यते । लौकिकसंस्कृतकाव्यस्य छन्दोविधानार्थं गुरुलघ्वोर्विचारः क्रियते, परन्तु वैदिकसाहित्ये अयं नियमो नास्ति ।

प्राच्यविदां छन्दः वेदांगत्वात् अपौरुषेयत्वमतो न तत्र छन्दसां विषये रचनाकालस्य कल्पना क्रियते । परन्तु पाश्चात्याः अवश्यमेव तत्संख्यापयन्ति यदेतस्य शास्त्रस्य रचनाकालः सूत्रकालानन्तरमेवेति ।

शौनकः चतुर्विंशत्या[1] छन्दसां स्वीकरोति । छन्दःसु प्रसिद्धानि छन्दांसि निरूप्यन्ते -

---

१- ऋषीणां कविभिः पुराणैश्छन्दांसि दृष्टानि कारितानि ।
ह्यन्यानि दृष्टानि तु संहितायामन्यानि निर्दिश्यपरेण सन्ति ।।
—बृ०दे०अ० ८५

CC.O Sampurnanand University Collection. Digitized by eGangotri

गायत्री:- प्रमुखतया पादत्रयम् भवति, परन्तु पञ्चपदा, चतुष्पदापि गायत्री उपलभ्यते। मुख्यतया त्रिपदा गायत्र्या एव प्राचुर्येण प्रयोगो क्रियते। अस्याः पादत्रयेषु यदा क्रमेण एकैकाक्षरेण वृद्धिर्भवति तदा सा वर्धमाना गायत्री उच्यते। अस्या च विपरीता गायत्री प्रतिष्ठागायत्री इति नाम्ना प्रसिद्धास्ति। यदा च पदाक्षराणां क्रमः ७-१०-७ = २४ संख्या भवति तदा यवमध्या, अतिनिचृदा गायत्री पिपीलिका गायत्री भवति।

उष्णिक्- अष्टविंशतिःअक्षराणि(२८) त्रीणि चात्र पदानि भवन्ति। अस्या एव भेदाः: उष्णिक्ककुबुष्णिक् पुर उष्णिक् पिपीलिकमध्या उष्णिक् चेति।

अनुष्टुप्- चतुष्पदात्मिका ३२ अक्षराणि अत्र भवन्ति। अस्यापि भेदाः: विराट् अनुष्टुप्, चतुष्पादानुष्टुप् इत्यादयः।

बृहती- चतुष्पादयुक्ता ३६ अक्षरान्विता। भेदाश्च पुरस्ताद्बृहती, पथ्याबृहती, उपरिष्टाद्बृहती स्कन्धोबृहती इति।

पंक्ति: - ४०अक्षरान्विता चतुष्पदात्मिका पंक्तिः। अस्यैव प्रभेदाः: विराट्पंक्तिः विपरीतापंक्तिः, आस्तारपंक्तिः, संस्तार-विराडादिभेदाः सन्ति।

त्रिष्टुप्- चतुष्पदात्मिका चतुश्चत्वारिंशदक्षराणि।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यथा- ३२ अक्षरान्वितं चतुष्पदात्मकमिदं छन्दः ।

एवं रीत्या पूर्णं रहस्यात्मकं छन्दःशास्त्रं वेदस्य पादौ,पूर्णौ,चतुष्टयीं पोषकारकम् ।वैदिकानां मंत्राणां ऋषि-देवता-छन्दो-गोत्र विज्ञानस्य महत्वं विस्तरेण शास्त्रेषु विविधग्रन्थेषु च दृश्यमस्ति ।छन्दसा व्याप्तौ कि-त्वादस्ति दार्शनिकं महत्वमपि ।वेदार्थस्य ज्ञानविशेषेणापि प्रभावितो भवति ।

अतो निर्विवादमिदं यत् वेदस्य पठनप्रक्रियायाः,यज्ञस्य च परम्परायाः पोषकं शास्त्रं छन्दः शास्त्रमस्तीति ।

ज्योतिषम्

वेदाङ्गेषु कालनिरूपणशास्त्रस्य ज्योतिषस्य महत्वमधिकमस्ति ।[1] उक्तं च ज्योतिषामयनं चक्षुः इति ।वेदेषु यज्ञस्य प्राधान्यम् यज्ञानुष्ठान-विषये शुभमुहूर्तादिविचारे ज्योतिषशास्त्रस्यैव प्रवृत्तिरस्ति । नैव केवलं यज्ञानुष्ठानेनादृष्टफलस्यप्राप्तिः,प्रत्युतात्र कालचक्रग्रहादीनामपि प्रभावः परीक्षणं च महत्वपूर्णमिति दृष्टमेव ।यज्ञादीनामनुष्ठाने ऋत्विग्व्यवस्था-नाम्न विधानं यज्ञांशेन भवति ,अतो नियतकाले वेदाङ्गानां अनुष्ठानेनादृष्टोत्पत्तिर्जायते ।एवं च नियतकाले यज्ञादीनामनुष्ठानाय कालनिरूपकशास्त्रस्य ज्योतिषस्य आवश्यकता भवति ।

१- वेदा हि यज्ञार्थमभिप्रवृत्ताः कालाभिपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविज्ञानशास्त्रंयो ज्योतिषं वेदवेद यज्ञम् ॥
-वे०ज्यो० इति ज्योतिषवचः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्य शास्त्रस्य परम्पराविषये किञ्चित् स्पष्टं मतं नैव प्राप्यते । तथापि – तदिदं व्याकरणेऽपि भवति यत् पुरा ब्राह्मणग्रन्थादि[1]गतानां ज्योतिषज्ञानाधारेणैव यज्ञाः याज्ञिकक्रियाः अनुष्ठीयन्ते स्म । कालान्तरे तत्रापि पृथक् व्यवस्थायाः आवश्यकतायां ज्योतिषशास्त्रस्य पृथगेव निर्माणमभूदिति अनुमीयते । वेदानां रचनाप्राचीनपरम्परायाश्च प्रतिपादने ज्योतिषशास्त्रस्य महती आवश्यकता अपि निरनुभूता, अतो वेदाङ्गत्वेनास्य प्रतिष्ठां सुलब्धः ।

ज्योतिषशास्त्रेणैव चतुर्णां वर्णानां संस्कारमुहूर्तः परिज्ञायते । वसन्ते ग्नि-ष्टोमः वसन्ते ब्राह्मणोऽग्निमादधीत, शरदि वैश्यः, वसन्तादिषु ऋतुषु कालविचारः उक्तः । अतो वेदाङ्गभूतस्य ज्योतिषस्य वेदप्रतिपादितकर्मणामनुष्ठाने उपयोगः महत्त्वपूर्णः भवति ।

ज्योतिषशास्त्रस्य मुख्यो विषयः कालादि[2] विचारः वर्तते । सूर्यचन्द्र-मसोः स्थितिः नक्षत्रराशीनां पुनः वक्रगतिनिरूपणानां सम्यग्विचारश्च ।

१– नक्षत्रे: फल्गुन्योरग्निमादधीत । एषा वै जघन्या रात्रिः संवत्सरस्य, यत्पूर्वेफल्गुनी । पृष्ठित एव संवत्सरस्याग्निमाधाय पापीयान् भवति । उत्तरयोरादधीत । एषा वै प्रथमा रात्रिः संवत्सरस्य यदुत्तरे फल्गुनी । मुखत एव संवत्सरस्याग्निमाधाय वसीयान् भवति । –तै०ब्रा० १।१।२–

२– वेदाङ्गज्योतिषम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ज्योतिषशास्त्रप्रतिनिधिभूताः ग्रन्थाः वेदाङ्गज्योतिषम्' इति नाम्ना प्रथिताः। अस्य रचनाकालः[1] ई०पू० १४०० वर्षाणि। तत्र अथर्ववेदसम्बद्धो ग्रन्थः आथर्वणज्योतिषम्।

यजुर्वेदेन सम्बन्धितस्य याजुषज्योतिषम्।
ऋग्वेदेन सम्बन्धितो ग्रन्थः आर्चज्योतिषम्।

अन्त्ययोरेव क्रमेण ४४, ३६ श्लोकाः सन्ति। वेदाङ्गज्योतिषविषये पाश्चात्यविदुषां कान्यपि प्राप्यन्ते। थीबोप्रमुखाः पाश्चात्यविद्वांसः भारतीयो विद्वान् बालगङ्गाधरतिलकमहाभागः च अत्र श्लोकानां व्याख्याने प्रयत्नं कृतवन्तस्तथापि अत्र लिखितानां गूढार्थानां समस्यापूर्तिरूपेण नैव समाधानमुपलब्धम्।

अस्य कर्ता[2] लगधाख्यः कश्चित् ज्योतिर्विदासीत्। तत्परकं प्रमाणं न प्राप्यते। अस्य ग्रन्थस्य प्रतिपाद्यं कति प्रकारं अस्मिन् ग्रन्थे दृश्यते। ज्योतिष शास्त्रस्यानुसारेण नक्षत्रादिभिरेव गणना भवति, परन्तु विचित्रमिदं तथ्यं यद् वेदाङ्गज्योतिषग्रन्थे तेषां नक्षत्रसंख्यानां राशिनामुल्लेख एव नास्ति।

१– एके अस्य रचनाकालं १२ ई०पूर्वं मन्यन्ते। –प्रभा० ज्यो० का इति०
'कल्प' वेदाङ्गज्योतिष में यह बताया गया है कि विषुव (जब दिन रात बराबर होते हैं) के अवसर पर तारों के सापेक्ष सूर्य कहाँ रहता है? देखने की बात है कि यह स्थिति सदा एक सी नहीं रहती और विषुव के स्थान की अयन चलन करती हैं। प्रभा० ज्यो० का इतिहास पृ० ५५।

२– प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः। –पृ० आर्च ज्यो० पृ० ६

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ज्योतिषशास्त्रे मूर्धस्थिता[1] स्वच्छन्दानां पुस्तकानां कल्पकारस्तु विश्वप्रसिद्ध-एव । कस्यचिदपि वस्तुनः स्वरूपं दृष्ट्वा तस्य फलस्य विकासकारणस्य शास्त्रस्य मुख्यो विभागः । सिद्धान्तज्योतिषशास्त्रं स्वीयं महत्त्वं संक्षेपेण स्थापयति । सिद्धान्तज्योतिषशास्त्रस्य अन्येऽपि महत्त्वपूर्णाः विषयाः वर्तन्ते । ग्रहनक्षत्राणां गणनाकाशमण्डलस्य स्थितिः, दूरीभावनम्, पंचाङ्गनिर्माणादिकं कार्यं सिद्धान्तज्योतिषस्यैव विषयः । अस्य शास्त्रस्य महत्त्वप्रतिपादनविषयो वेदांगज्योतिषशास्त्रेऽपि कृतः । प्राचीनज्योतिषशास्त्रे संवत्सर, परिवत्सर इडावत्सर अनुवत्सर इद्वत्सराणां पञ्चविधवत्सराणां उल्लेखः । वेदांग ज्योतिषे, अन्येष्वपि ज्योतिषग्रन्थेषु वेदाः प्रतिपादिताः सन्ति । तेषामुल्लेखः तैत्तिरीयब्राह्मणग्रन्थेऽपि[2] उपलभ्यते । अनेन प्रमाणेन अनुमीयते यत् आचार्यलगधः तैत्तिरीयशाखाध्यायी आसीदिति ।

तैत्तिरीयब्राह्मणपाठकालेन अवगम्यते यत् वर्षं माघमासादेव प्रारभ्यते स्म। सूर्यसिद्धान्तानुसारेण ज्योतिषशास्त्रस्य याज्ञवल्क्यवेदनात् आदित्यपरम्परा वर्तते ।

१- यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद् वेदांगशास्त्राणां गणितं मूर्धनि स्थितम् ॥
–वेदांग ज्योतिष पृ० ४

२- द्र०- वै०वा०का इति०(उपा०) वेदांगप्रकरण (ज्योतिष)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्य परम्परा विषये बहूनि मतानि सन्ति।तेषु प्रामाण्यं मतमस्ति यत् कश्चित् मयनामकः असुरः सूर्यं आराधयामास।तस्य योगतपोबलात् स इदं शास्त्रं प्राप्तवान्।कालान्तरे भास्करः प्रसन्नो भूत्वा तं ज्ञापितवान्।ततः पश्चात् भास्करः तिरोहितः तत एवं परम्परा भुवि प्रचलिता।

<u>वैशिष्ट्यं ज्योतिषशास्त्रस्य</u>

ग्रहादिविचारः अनेनशास्त्रेण भवति।

मास-दिवसानां हेतुः अत्र सम्यक्तया प्रतिपादितोऽस्ति।

वैदिककर्मणां कालस्य ज्ञानं अनेन भवति तथा,कालान्तरे च तस्य स्वरूपं विस्तृतमिति लोकानां विषयाणां सम्यक् प्रतिपादनमत्र वर्तते।

१- अल्पावशिष्टे तु कृते मयनामा महासुरः।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम्॥
वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम्।
आराधयन्विवस्वन्तं तपस्तेपे सुदुश्चरम्॥
तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने।
ग्रहाणां चरितं प्रादान् मयाय सवितास्वयम्॥
विदितस्ते मया भावस्तोषितस्तपसा ह्यहम्।
दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं महत्॥
न मे तेजः सहः कश्चिदाख्यातुं नास्ति मे क्षणः।
मदंशः पुरुषोऽयं ते निःशेषं कथयिष्यति॥
इत्युक्त्वान्तर्दधे देवः समादिश्यांशमात्मनः।
स पुमान् मयमाहेदं प्रणतं प्राञ्जलिस्थितम्॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

जैनानां तथा चीनानां कुलेषु सम्राटसिद्धान्तानां पञ्चानां ज्ञानमावश्यक-मासीत् । जैनानां ज्ञानं कृषकाणामपि कृते आवश्यकमासीत् । संवत्सर-काल-गति-ज्ञानाधारेणैव कृषकाः धान्यबीजवपनादि कार्याणि कुर्वन्ति स्म । तथैवाचार्याणां अनुमानसिद्धान्तोऽप्युपलभ्यते । अनेन कारणं यद् अस्माकं भारतीयैः आधुनिकयन्त्राणा-मभावेऽपि अनेन, कृषकाणां सर्वं कार्यं सम्पादितम् । अतिप्राचीनकाले दिना-न्यासन्नवेति[1] अत्र विवादो वर्तते । ज्योतिषशास्त्रस्य इतिहासावलोकनेन ज्ञायते यत् पुरा पञ्चाङ्गमासीत्[2] । तथैव अनुमानविज्ञानाद्व्याख्यातम् ।

–पुण्यर्षिकल्पानां पडुक्तं ज्ञानमुत्तमम् ।
युगे युगे महर्षीणां स्वयमेव हि कल्पिता॥
शास्त्रमाद्यं तथैवेदं संस्थितं प्राक्तनाकरः ।
युगानां परिवर्तेन कालभेदो न केवलम् ॥
सूर्यः पितामहो व्यासो, वसिष्ठोऽत्रिपराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरंगिराः ॥
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशश्चैते ज्योतिः शास्त्रप्रवर्तकाः ॥

–पुरा०ज्यो०का इति० पृ० १३०

१– पुरा०ज्यो०शास्त्र का ऐतिहासिक कालनयन, दिन विचार
२– पञ्चाब्दो स्वाहा, माघाय स्वाहा, पञ्चाब्दसौरात्पिण्डाकाराः।
इति ज्योतिषपरी । पु०– वाज०सं०अ० २२–२६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

कालान्तरे तेषां दिनानां नामकरणं नक्षत्रानुसारेण[1] जातम् । मासानां नामान्यपि[2] तथैव अतिप्राचीनकाले पक्षयोरपि[3] उपविभागाः कल्पिताः । अत्र चानुमीयते यत् एकाहस्थाने उपविभागा[4] एव जाताः । तिथि दिनात्मकमपि[5] अस्यैव शास्त्रस्य विषयोऽभूत् । दिनविभाजनमपि सूर्योदयात् अस्तमनं याम-कोणवशेन शास्त्रस्य विकासकालमिति प्रतीयते । अथ प्रयोगः गाणितिकैश्च गणितविषये ये जाता प्रसिद्धाः मानं, गृहः[6] सूर्यचन्द्रमसौ विषये विशेषतः न च ज्योतिषशास्त्रस्य महत्त्वं प्रकाशयति । किन्तु प्रसिद्धाः गणितज्ञाः वैज्ञानिकाश्च गणितस्य प्रारम्भं भारतवर्षे एव स्वीकुर्वन्ति । अन्यथा रेखागणितम् इत्यादीनां तदेतान्येषां गणितशास्त्रीयकोविदानां जनकाः भारतदेशीया इति निर्णयः मन्यन्ते । अभिप्रायोऽयं यत् तुलनात्मकाध्ययनेन अस्माकं शास्त्रस्य गुरुत्वस्य च तारत-म्येन आधुनिक-गणितशास्त्रीयरीति अपि स्वीकरणीयं भवति । अतः अस्ति वैशिष्ट्यमस्य ज्योतिषशास्त्रस्य वेदाङ्गं राजते ।

१- नक्षत्रशब्दस्य प्रयोगे तारकार्थे पि दृश्यते यथा अपत्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः सूराय विश्वचक्षसे –ऋ० १।५०।२

२- नक्षत्र नामान्यारभ्य ज्ञेयाः कल्पिताः । पृ०–भार०ज्यो०शा०इति०पृ०२०

३- पृ०भार०ज्यो०का अति०शा० नक्षत्र दिन विचारः ।

४- सवनं, सितानं, दर्शं दृष्टेति । तत्सम्बन्धात् पूर्वपक्षस्याहोरात्राणां नामधे-यानि । प्रस्तुतं विष्टुतं, सुता, सुन्वती इति । तत्सम्बन्धात् अपरपक्षस्याहोरात्राणां नामधेयानि ।

५- यां पर्यस्तमियादभ्युदियादिति सा तिथिः।

६- पृ०भार०ज्यो०शास्त्र का इतिहास ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कल्पः

वेदाङ्गसाहित्ये 'कल्प' इति अंगस्य स्थानं महत्त्वपूर्णमस्ति । तदु-

"वेद-विहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्"

अतिप्राचीनकाले वैदिकयुगे वा नैवावश्यकता आसीदेषां कल्पादीनां ग्रन्थानां अपितु आचारपरम्परा एवा आसीत् गुरुमुखोच्चारणानुच्चारणरूपा, परन्तु कालप्रभावात् विद्वज्जनानां स्मरणधारणशक्तिह्रासमुपगता । अतएव वेदाङ्गसाहित्यानामितरेषामिव कल्पादीनामपि पृथक् प्रणयनमावश्यकम् । परम कारुणिकाः महान्तः महर्षयः कण्वः अतुल्यप्रज्ञाः दूरदृष्टि-प्रवणाः कालान्तरे कीदृशं भविष्यतीति विचारमवलम्ब्य च कल्पादीनां ग्रन्थानां सम्यक् सूत्ररूपेण प्रणयनमकुर्वन् । साधुत्वपरिमाणात् यद्यपि आचार्यविशेषादिकेषां विषये परिष्कृता अस्मान्महामुनिकेषु पाश्चात्यविद्वान्निवृत्तत्वमपि नैव अन्वेषणमनुसन्धानं मनो रमयति ।

१– कल्पशब्दस्य प्रयोगः । प्रयोगस्य बहुत्र प्रयोक्तृ बहुत्वेऽपि निःसंशयमनुष्ठेयं कदाचिदेकत्र विदुषे वदतो व्याख्यानानां शाखास्थेषु महर्षिषु नानाशाखास्थ सविशेषयज्ञानुष्ठानप्रकारं प्रचारयत्सु विनैवाचारं व्याकुलीभवति । ततश्च गृहेषु सूत्रेषु च प्रचरत्सु अनुष्ठाने वैयग्र्यादिदोषान् सम्भाव-यद्भिः महर्षिभिराधिकारिकैर्विधायकं संक्षेपविस्तरप्रक्रियया सहानुष्ठानक्रमानु-विधायका नानाशाखास्थविशेषेण संक्षेपेण सूत्रम् इति प्रणाविधिना सूत्रनिबन्धा इति ।

ब्राह्मणानां बहुत्वात् एकस्यां शाखायां परिसमाप्तत्वात् दुर्बोधत्वात् च बहु-बोधत्वात् तेषां विवरणार्थं गुरु बहुधा कर्माण्यनुष्ठाय कल्पं प्रापुरिति कल्पशास्त्रं प्रवर्तितम् इति प्रवर्तितम् ।

अत्र गुरुपरम्पराप्रसिद्धशौनकादिभिराचार्यैः कल्पाः प्रणीताः इति ।

१०– आपस्तम्बकल्पसूत्रभूमिका) कल्पसूत्रवृत्तिः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पाश्चात्य विद्वज्जनानां कृतिषु संस्कृतसाहित्येतिहासग्रन्थेषु च निगदितं तथ्यं रहस्यं वा विषय प्रायशः प्राचीनाचार्याणां नानाग्रन्थेभ्य एवोपलभ्यते । ऐतिहासिकत्वेन गवेषणार्थं कल्पादि विषयकंज्ञानमनेन (कल्पादिग्रन्थ) माध्यमेन वैज्ञानिक प्रणाल्या भवति । वेदाङ्गानां ज्ञानार्थं सूत्रग्रन्थं ब्राह्मणयोः ज्ञानमावश्यक-मस्ति तस्मात् पुराणाद्यध्ययनमपेक्षितं काठिन्यमतो वेदाङ्गानामपि निहितरहस्यानां ज्ञानमनुसन्धानार्हमिति ।

यद्यपि यज्ञस्येतिकर्तव्यतापूरकं ब्राह्मणं तत्र तन्निमित्तसूक्तमुक्तं फलं च तथैव मन्त्रभागस्यापि देवतास्वरूपादि कार्यं प्रतिपादितं तथापि क्रमबद्धं विधानं कल्पनं, यज्ञस्थानवास्तुकर्मविधानं व्याख्यानं बहुत्र नियमं प्रतिपादनाया स्फुटं यत्नात्कृतादि कार्यं कल्पस्यैवेति कल्पो वेदाङ्गम् ।

कल्पसूत्रग्रन्थानि चतुर्धाः श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-शुल्बसूत्ररूपा ।

<u>श्रौतसूत्र</u>- श्रुतेः इदं श्रौतं तस्य सूत्रं श्रौतसूत्रमिति सामान्यव्युत्पत्त्या ज्ञायते प्रत्यक्षेण कर्म इति निर्वचनेनास्य महत्त्वं स्पष्टं भवति । श्रौतयागादिको क्रिया कलाप श्रुतौ आख्यायिकायां मन्त्रभागे च उपलभ्यते । यज्ञेषु देवता विधानं क्रियाविधानं दर्शपूर्णमासादिप्रकरणपठितासु क्रियासु प्राय इत्थं विधान विशेषणेन च, दर्शपूर्णमास पिण्डपितृयज्ञ- चातुर्मास्य-अग्निष्टोम पुरुषमेध-अश्वमेध अग्निहोत्रादीनां प्रसिद्धानां मुख्यभूतानां यज्ञानां वर्णनं प्रायशः समुपलभ्यते । श्रौतसूत्रे नैव कश्चिदलौकिकः ग्रन्थः प्रत्युत वैदिकानां ज्ञातानां ब्राह्मणविहि-तानां विधीनां, क्रमेण व्यवस्थितत्वेन च सूत्ररूपत्वं च । यद्यपि ब्राह्मण ग्रन्था-नामेव विषयमनुधावति, तथापि ब्राह्मण ग्रन्थेषु विस्तरेण अर्थवादादिप्राधा-न्यात् वैदिककर्मेषु अनुचितानि नैवोपलभ्यते, तथा च ब्राह्मणव्याख्याने कर्मकाण्ड-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नानकेनानिहस्य के प्रवृत्तिः प्रमुख दार्शनिकात्वं रहस्यम्पुरतो करणेन च वैज्ञानिक रहस्यमप्यनुकृतो ।परन्तु श्रौतसूत्रेष्वस्याः प्रक्रियायाः स्वरूपविशेषेषु व्याविल्यमेवदृश्यते । अतः श्रौतसूत्रस्य रचना तस्य च योगदानं कर्मकाण्डे दृष्ट्वा - त्यन्तमेवमहत्त्वपूर्णमस्तीति ज्ञायते ।

ऋग्वेदस्य द्वे श्रौतसूत्रे स्तः

१- आश्वलायन श्रौतसूत्रम् , (२)शाङ्खायन श्रौतसूत्रम् ।

शुक्लयजुर्वेदीय श्रौतसूत्रम्- कात्यायन श्रौतसूत्रम् ।कृष्णयजुर्वेदीय श्रौत-सूत्राणि - बौधायन श्रौतसूत्रं,आपस्तम्बश्रौतसूत्रं, हिरण्यकेशी वा सत्याषाढ श्रौतसूत्रं वैखानस श्रौतसूत्रं भारद्वाज श्रौतसूत्रं, मानवश्रौतसूत्रम् च ।अतः परं-वाधूल,वाराह श्रौतसूत्रमपि उपलभ्यते।

<u>गृह्यसूत्रम्-</u>

चतुर्विधेषु सूत्रेषु द्वितीयमिदं गृह्यसूत्रम् ।श्रौतसूत्रेण अस्य तुलनात्मकाध्ययनेनानैकत्र्यमेव दृश्यते । अस्मिन् गृह्यसूत्रे संस्काराणां वर्णनं प्राधान्येन भवति ।पाकयज्ञादिसंस्थानामुपदेशः अत्र प्राप्यते । लौकिकसंस्कारनिमित्तं गार्हस्थ्यसंस्कारादीन्य वैवता, ते गृह्यसूत्रेषूपलभ्यन्ते ।श्रौत यागः स्मार्तयागस्या-धारभूतः ।श्रौतयागानां प्रायशः लौपरधिकानां स्मार्तविधा स्वानुष्ठीयन्ते,अत्र च गृह्यसूत्राणां प्रवृत्तिः ।

कतिपयगृह्यसूत्राणां नामानि उल्लिख्यन्ते ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऋग्वेदीय गृह्यसूत्रेषु[1] द्वे एव गृह्यसूत्रे उपलभ्येते ।

(१)आश्वलायनगृह्यसूत्रम्, (२)शांखायनगृह्यसूत्रम् च । शुक्लयजुर्वेदीयगृह्य-सूत्रेष्वेकमस्ति पारस्करगृह्यसूत्रमिति ।

कृष्णयजुर्वेदीयगृह्यसूत्राणि- १-आपस्तम्ब- २-बौधायन- ३-भारद्वाज, ४-हिरण्यकेशी, ५- वैखानस, ६- अग्निवेश्य, ७-वाराह, ८-मानव, १०-काठकादि-गृह्यसूत्राणि कृष्णयजुर्वेदीयानि सन्ति ।

धर्मसूत्रेषु-

सामान्यमानवाधिकारा: उपदिष्टा सन्ति । प्रायोगिकशिक्षाविषयकसदा-चारविधानमुक्तम् । वर्णाश्रमव्यवस्थाया: सामान्यविशेषधर्माश्च समुपदिष्टा: । कर्माकरणे प्रत्यवायपरिहारार्थं प्रायश्चित्तोपदेशश्च समुपदिष्ट: ।

अस्मिन् विषये पाश्चात्यपण्डिता: विन्टरनित्सप्रभृतयो यं यद् कर्म कर्मातिरिक्त: । परन्तु डा० राममूर्तिमहोदया[2] मन्यन्ते कौषीतकि ब्राह्मणाधिकरणमेव गृह्यमिति ।

कल्पसूत्रेषु विशेषरूपेण देवयज्ञ-भूतयज्ञ-पितृयज्ञ- ब्रह्मयज्ञ-मनुष्ययज्ञानां वर्णनं उपलभ्यते ।

१- वैदिक साहित्य का इतिहास पृ० १५८-५९-६०

२- ,, पृ०१६० (बलदेवउपाध्याय कृत)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

आचार्यबलदेवोपाध्यायः कल्पसूत्रेषु[1] आचारव्यवहाराणामेव वर्णनं मनुते ।

कतिपयकल्पसूत्राणि-

१-बौधायन-आपस्तम्ब-भारद्वाज-हिरण्यकेशिनां[2] कल्पसूत्राणि उपलभ्यन्ते । आश्वलायन-शांखायन-मानवादि- कल्पसूत्राणामभिधानमनुलेखमात्रमेव ग्रन्थेषु वर्तन्ते ।

शुल्बसूत्रम्-

शुल्बशब्दः शुल्बसूत्रेषु 'मान'[3] वाचकार्थे प्रयुज्यते । शुल्वं करोतीति वचनात् वैदिकसाहित्येतिहासपरिशीलनेन प्रतीयते यत्प्राचीनकाले ज्यामितिरूपेण शुल्बसूत्राण्येवासन्निति । शुल्बसूत्रेषु यज्ञविधानानुष्ठानार्थं मण्डपवेदिकानां मानमु- ल्लिखितमस्ति । अस्य सूत्रस्य शैली अतीव दुर्बोधा प्रतीयते । भाष्ये पारिभाषिक- शब्दानामर्थावगमोऽपि सरलतया न भवति । इयं च वैज्ञानिकी शैली गवेषणीया भवति । अनेन स्पष्टमिदं ज्ञायते यत् वैदिककाले गणितशास्त्रस्यास्तित्वं महत्त्व- पूर्णं वैज्ञानिकं चासीत् । ये च पारिभाषिकाः शब्दाः उपलभ्यन्ते तत्र कल्पनीय- मिदं यदेतैः शब्दैरेव काले गणितस्य कार्यं भवति स्म। शुल्बसूत्रेषु बौधायनापस्तम्ब- कात्यायनमानवमैत्रायणीयानां शुल्बसूत्राणि प्रसिद्धानि सन्ति । 'रज्जुसमासं वक्ष्यामः' अस्यात्र रज्जुसूत्ररूपेण इदं प्रत्यक्षमेव भवति यत् ज्ञानं यत् शंकुसूत्र- स्योपयोगो (परोक्ष इति भाषायाम्) भूमेः मापनार्थं भवति, तस्मिन्काले

१-वै०सा०का इति०पृ० १६० (बलदेवउपाध्यायकृत)

२- ,, ,,

३- तत्रैव ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

रज्ज्वा एव कर्तव्येति । वस्तुत्वपि कात्यायनीयस्य प्राप्तिः ग्रामेषु दुष्करा । 'चतुरस्रं मण्डलं त्रिकोणम्' इत्यादि वाक्यानामपि मीमांसया स्यैव परिभाषा स्पष्टा भवति यत् सिद्धान्तो यंकस्यचिदपि चतुरस्र मण्डलस्य । यद्यपि अस्यैकांश: श्रौतयागवेदिप्रकरणे, परन्तु सिद्धान्तो यं सर्व चतुरस्र मण्डलादिषु सार्वभौमिकरूपेण मन्तव्य: । तत्र श्रौतयागेषु अन्येषाम् उक्तानां यागानां मण्डपमानविशेषाणां वेदिमानविशेषो स्ति । 'कुण्डमण्डपसिद्धि:' इत्यस्य ग्रन्थस्य आधारभूतं शुल्बसूत्रमेव प्रतीयते । आधुनिकयागादीनां जैनां स्मार्तयागादिकानामपि अग्निस्थापनभूतानां कुण्डानां सिद्धिरत्र विशेषेण-प्रतिपादिता स्ति ।

श्रौतसूत्रविचार:

वैदिकसाहित्ये श्रौतसूत्रस्य स्थानमपि वेदांगत्वेन अत्यधिकमस्ति। 'वेदा हि यज्ञार्थमभिप्रवृत्ता:' इति उक्ते सिद्धि: अर्थात् यज्ञसम्पादने स्य श्रौतसूत्रस्य याथार्थ्यं महत्त्वपूर्णं अस्ति ।

श्रौतसूत्रेषु सूक्ष्मरूपेण याज्ञिकी मीमांसा निरूपिता भवति। वेदवेदांगाध्ययने कल्पशास्त्रस्याध्ययनमपि आयोज्यते । वेदस्य त्रिषु ज्ञान-कर्मो-पासनाकाण्डेषु कर्मकाण्डभागस्य व्यवस्थितीकरणं श्रौतसूत्रेणैव भवति । ब्राह्मणग्रन्था अपि यज्ञप्रतिपादका:, विधायकवाक्योपेता, इत्यादि बहुगुणयुक्ता: भवन्ति। तेषाम् उद्देश्यं यज्ञप्रतिपादनमेव । तथापि, कस्मिन् केन क्रमेण कर्माण्यनुष्ठेयानि, कथं च विधातव्यानि, इति तेषां व्यवस्था श्रौतसूत्रमेव करोति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्य श्रौतसूत्रस्य परम्पराविषये न किंचित् स्पष्टं प्रमाणमुपलभ्यते। ब्राह्मणानुसारन्तु अपौरुषेयस्य वेदस्य परम्परागतत्वात् नित्यत्वाच्च वाक्य-परम्परायाश्चापि कल्पसूत्रस्य परम्परा अप्यभिमतोऽस्ति इति अनुमीयते । कालान्तरे मानवानां स्मृति ह्रास[1]मुपगते बौधायनः प्रभावात् वैदिककर्मकाण्डस्यान्धकारं विनिवर्तयितुमनाः, श्रौतसूत्राणां प्रणयनं पृथक् ग्रन्थरूपेण अकरोत्, येन एवं परम्परा चिरकालं यावत् प्रचलेत् ।

केचन आधुनिकाः विद्वांसः श्रौतसूत्रमेव पृथक् रूपेण स्वीकुर्वन्ति। अतो तत्कालादेवास्य कल्पसाहित्यस्य निर्माणः (रचना सृष्टिः) मन्यन्ते ।

सुप्रसिद्धमैक्समूलरस्य[2] विचारानुसारेणापि इदं श्रौतसूत्रं वैदिकवाङ्मये तृतीये स्थाने तिष्ठति ।

१- बौधायनकल्प व्याख्यारम्भे - पृ० ६५

ब्राह्मणानां बहुत्वात् एकैकस्यां शाखायां पठितानामर्थस्य दुर्बोधत्वात् तेषां विवरणार्थं सूत्रं कृत्वा आप्यनुष्ठाय फलं सर्वे प्राप्नुयुः इति कल्पं आरब्धं बौधायनेन इति व्याख्याने ।
एवं आश्वलायनश्रौत वृत्तावपि-

अत एव सर्वेषु पठितमनुष्ठेयं शौनकादिभिराचार्यैः कल्पाः प्रणीताः इति ।

२- The third and youngest stage of vedic literature is the Vedangas also called Sutra. "Life in ancient India.

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रायश: केचित् एतदेव कारणं[1] मन्यन्ते यत् वेदस्य रक्षणार्थं वेदाङ्गानां रचना-
भूदिति । अयेषां श्रौतसूत्राणां परिमाणावलोकनेन एवं प्रतीयते यत्
प्रायश: श्रौतयागेषु: सिद्धान्ता: श्रौतसूत्रकर्तॄणां समान एव ।

अस्य रचनाकालविषयेऽपि तथैव विवाद:, यथा वैदिककालनिर्णये ।
प्रायश: प्राचीनेषु ग्रन्थकारेषु आत्मनामोल्लेखनपरम्परा नोपलभ्यते । तेषु
ग्रन्थरचनासु अंशमात्रादपि प्रवृत्तिरेव नासीत् एव, अस्मात् कारणात् कतिपय-
प्राचीनश्रौतसूत्रग्रन्थानां देशकालस्य विषये ज्ञानं न भवति, अस्य कालविषये
वैदिकसाहित्येतिहासकारादयोऽपि सुस्पष्टं मतं न प्रकटयन्ति अतो
निश्चितसमयस्य ज्ञानमसंभवमेव परन्तु सम्यक् परीक्षणेन, पूर्वाचार्याणां
विदुषां च मतेन एवं निश्चितमेव प्रतीयते यच्छ्रौतसूत्राणां प्रणयनं पाणिने:
कालात्पूर्वमेवाभूदिति ।

कात्यायनापस्तम्बश्रौतसूत्रयो: प्रवृत्ति- परिशीलनात् कात्यायनस्य
मुने: समय: पाणिने:पूर्वम् इति सिध्यति । तत्रापि वार्तिककार: कात्यायन:
श्रौतसूत्रीयकात्यायन: प्रातिशाख्यकात्यायनश्चैको एव न वेति विवादास्पदमेवा-
स्ति ।पाणिने: काल: षष्ठशताब्दीति निश्चितम् ।अत: कात्यायनप्रवृत्ति-
श्रौतसूत्रकर्तॄणां समय: अत: पूर्वम् सोऽपि सिद्धिमनुमीयते ।अस्मिन् विषये पाणिने:

१- ततस्ततो नृषिषु कुर्वाणेषु च प्रकारेषु अनुष्ठान वैगुण्यादिदोषापत्तिसंभावना
धर्मिन: महर्षिभिराधिकारिविधियार्थं संक्षेप विस्तारभेदभिन्नाश्चास्त्वनुष्ठातुकामा-
नुपयुक्तया नानाशाखास्थ तदुक्तविधेन कृतेन सूत्रग्रन्था इति प्रणायिषत् सूत्र
निबन्धा इति ।आप० श्रौ०सू०भूमिका ।

कल्पसूत्राणां अन्यदपि हेतुं मन्यन्ते भाष्यकारादय: ।दर्शपूर्णमासौ
व्याख्यास्याम इत्यत्र व्याख्याया वक्तव्यत्वोपपादनाय तत्रकश्चित्सूत्रात् मन्त्र
ब्राह्मण व्याख्यातत्वाद्दर्शपूर्णमासौ: अनर्थकसूत्रकारवचन इति तन्न न, दुर्ज्ञान-
त्वात्कृत्स्नवेदस्यात्यन्ते: अनेकविध्युपसंहारस्य च अतो नानार्थक इति धूर्तस्वामी
आप०श्रौ०सू० पृ१०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पूर्वमेव प्रामाण्यमिति शक्यते । आपस्तम्बश्रौतसूत्रभूमिकायामपि श्रौतसूत्रस्य कालः पाणिनेः पूर्वमेवोक्तमस्ति ।

वैदिकसाहित्यकारेषु उपाध्यायबलदेवानां अष्टाध्यायाः व्याकरण-ग्रन्थस्य कालकल्पनानुसरणीया वर्तते । तेषां मतानुसारं अस्य कालः ई०पू०[1] षष्ठशताब्दी अस्ति । अतो वार्तिककारस्य कात्यायनस्य समयः ई०पूर्व ४ शताब्दीति तेषां दिक् तस्य पतञ्जलिः । अनेन प्रमाणेन अनुमीयते यत् वार्तिककारः कात्यायनः ई०पूर्वषष्ठशताब्दीतः प्राचीनकालिकः इति । अत्र च पाणिनेः 'तेन प्रोक्तमिति'[2] सूत्रपाठेण एतस्य विचारस्य मतमस्ति, यत् तेन प्रोक्तमिति प्रकरणोक्तपदेन तित्तिरि प्रभृतीन् वेदप्रवक्तृनिव कल्प-प्रवक्तृनपि इति ज्ञायते । यद्यपि पुराणानि कल्पान्' इत्याभ्यासात् कल्प-शब्दः पूर्वे पि प्रयोगपरः वेदभाग इति । अस्य च प्रवचनमध्यायमत्र एव स्वारसिकमिति वक्तुं शक्यते, तथापि पाराशर्य- शिलालिभ्यां भिक्षुनट-सूत्रयोः इति सूत्रे कल्पसूत्र निबन्धानुसारिणौ मीमांसादर्शनप्रवर्तकस्य जैमिनेराचार्यं बादरायणं निर्दिश्य कल्पसूत्रप्रवचनपरम्परायाः प्राचीनतां साक्षात्सूचयति पाणिनिः । पुरुषं तत्रं - काश्यप कौशिकाभ्यामृषिभ्यां णिनिः कल्पे नियमार्थं' इति वदन् वार्तिककारः कात्यायनस्य स्पष्टं स्यात् तत्प्राचीनताम् । कल्पसूत्रनिबन्धेषु च आपस्तम्बीयो ग्रन्थराजोऽस्ति । निबन्धोऽयं पाणिनेरतिप्राचीन इति निश्चीयते

१- वैदिकसाहित्य इतिहास पृ० ३२४ (डा० बलदेव उपाध्याय)

२- आप०श्रौ०सू०भू०रामाग्निचित् धूर्तस्वामीभाष्यसहितम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भाष्यकृतमपि दर्शयामः । तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रे सन्मार्गे च इनि दर्शनात् इति वार्तिकम् । तत्र च भाष्ये सन्मार्गे च इनिदर्शितं मधुमत् 'यममतोऽभिषूयं प्रोषतीति' इति । एवं च वाक्यं आपस्तम्बकृते दर्शपूर्णे कामकण्डे नवमे सूत्रे 'बौधायनं ग्रामं पूर्वं निधाय' इत्यारभ्य सूत्रं प्रजात्यार्थं कामाग्निः प्रोषति' इति दृश्यते । अस्मिन्विषये आपस्तम्बसांख्यायन कात्यायन श्रौतसूत्र दृश्यते । अस्मिन्विषये स्वकृतमतमेव वस्यातिप्रायोनित्यमेव प्रतिभाति ।

सूत्रेषु ब्राह्मणशैली समानतया दृश्यते । यथा अहनि चायं मंत्री[1] पठेत्[2] । अत्र विशेषणीयः विषयः यत्रमें प्रकृतिविकृतिभागाः- ब्राह्मणानुसरन्ति । अन्येभ्यः व्याकरणादिसूत्रेभ्यः विभिन्नार्थेनानि सूत्राणि सन्ति ।

अस्य श्रौतसूत्रस्य (वेदाङ्गेषु कल्पः) रचनाकाल विषये पि नैकमत्यं नास्ति ।

१- का०श्रौ०सू० २।८-१७

२- The certain sections of the sankhyayan srauta sutra are similar in style and character to Brahmanis. (History of Indian literature p.27)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१-नीलकण्ठशास्त्रिणः – एवं सूत्रवेदगीषु श्रौतकर्माणि स्वीकरोति, अतो प्राक्तन कालान्तर्गतोऽस्य समयः । मैक्समूलर महाभागानुसारेणास्य समयः वि०पू० ६०० वर्षमस्ति ।
पुनश्च रैनो- अस्य सूत्रस्य कालः पुष्कलतः किंचित् पूर्वमिति स्वीकरोति । जैन कल्याणितः ४७ वर्षाणि इति स्वीकृतानि ।

अत्र प्राचीनानां श्रौतसूत्रादिग्रन्थकाराणां परम्परायां केषांचिदाचार्याणां नामानि स्मर्यन्ते । यथा-

येषां बौधायनो वै पितरश्च ऋषिः आपस्तम्बशिष्यः
यस्यापस्तम्ब एको विख्यातगुणां पारतीमुख्यशिष्यः ।
तुर्ये पादे०काकानेकशाखिकि निपुणा सत्सूत्रानुप्रीणः,
व्याख्यातानेष्यनुशरस्कृटकृत्तवन प्रौढंकर्म गम्यम् ॥

उक्ते पिक्नये अस्य श्रौतसूत्रपरम्परा संक्षेपेण निगदितमस्ति । अनेन प्रकारेणैव अस्य श्रौतसूत्रादिसाहित्यस्य प्रचारो भूत् ।

प्रसिद्धानि (कल्पसाहित्ये) श्रौतसूत्राणि-

(१) आश्वलायन श्रौतसूत्रम्[2] -

द्वादशाध्यायात्मकम् एवं श्रौतसूत्रमस्ति । अस्य रचयिता आश्वलायन ऋषिरेवास्ति ।

१- It can be noted that the Srauta rites has been more numerious during the time of the Guptas. See- Destiny of Veda p.13.

२- वैदिक सा० एवं सं० उपा० (कल्पसूत्र)

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुरो नुवाक्या-याज्यौ यज्ञानुष्ठानप्रकारः तस्य देशकालकर्तृविधानं स्व-प्रतिग्रह-प्रभृतेः प्रायश्चित्तादीनां विधानञ्चास्ति ।

(२)शाङ्खायनश्रौतसूत्रम् -

अष्टादशाध्यायात्मकं शांखायनब्राह्मणेन सम्बद्धं यज्ञानां सम्पन्नियमैर्युतं, शांखायनमुनिप्रणीतमस्ति ।

(३)शुक्लयजुर्वेदीयं श्रौतसूत्रमेकमेव कात्यायनश्रौतसूत्रं षड्विंशत्यध्यायात्मकं, श्रौतयागप्रतिपादकं बृहत्कायं कात्यायनमुनिप्रणीतं शतपथ ब्राह्मणेन सम्बद्धमस्ति।

(४)कृष्णयजुर्वेदीयं- बौधायनश्रौतसूत्रम् बौधायनमुनिप्रणीतं श्रौतयागप्रतिपादकं अतिप्राचीनमस्ति ।

आपस्तम्बश्रौतसूत्रम् -अध्यायात्मकं,आपस्तम्बप्रणीतं तैत्तिरीय-ब्राह्मणेन सम्बद्धमस्ति ।

हिरण्यकेशि(सत्याषाढ) श्रौतसूत्रं- चतुर्विंशति प्रश्नैर्युतं हिरण्यकेशिमुनिप्रणीतमस्ति ।

(४) वैखानस श्रौतसूत्रं एकत्रिंशदध्यायात्मकं तैत्तिरीयशाखीयैर्युतं श्रौतयागविषयोपेतं, वृहदाकारमस्ति ।

(५)भारद्वाजश्रौतसूत्रं - तैत्तिरीय शाखासम्बद्धं पञ्चदशप्रश्नात्मकं दर्शपूर्णमास-अन्वाधेय अग्निहोत्राग्रयण निरूढपशुबन्ध-चातुर्मास्य वैश्वदेवपर्व साकमेध-शुनासीरीय-काम्यचातुर्मास्य पञ्चावत्तादिक पुनःप्रायश्चित्त-ज्योतिष्टोम-ज्योतिष्टोमप्रशस्त-कर्म-विधान-संयुतञ्चास्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(६)मानवश्रौतसूत्रं -मैत्रायणीशाखासंबद्ध,अस्य व्याख्यात्मकं पूर्वोक्तविषययुक्तमस्ति ।

(७)वाराहश्रौतसूत्रं -मैत्रायणीशाखासंयुक्तं,अस्य व्याख्यात्मकं दर्शपूर्णमासाग्न्याधान-पुनराधान-चातुर्मास्याग्निचयन-वाजपेयराजसूयाश्वमेध-सोमयागविधानमेवास्ति ।

(८)काठकश्रौतसूत्रम् अपूर्णं खण्डरूपं उपलब्धमस्ति ।

(९)वाधूलश्रौतसूत्रं तैत्तिरीयशाखायामवान्तरस्थितमस्ति ।

श्रौतचन्द्रिकाव्यपदेशमूलम्

नाटकलक्षणे गुरुदेवपादैरुक्तं यथा-

नामसु स्थितो भावो हि न नामास्ति निरर्थकम् ।
नान्यत्र भावान्नामानि तस्मात् सर्वाणि सार्थतः ॥ इति

भावो यं यस्यकस्यचिदपि पदार्थस्य नाम धारकं भवति,गुणक्रियाश्रयत्वात् प्रायशः ग्रन्थकाराणां स्वाभिप्रायमेव विशिष्टं रूपं भवति।तत्र च रूपमेतत् ग्रन्थकार्यं स्व ग्रन्थस्य विशिष्टं नाम बोधयति ।अतो ग्रन्थनाम्ना स्व ग्रन्थगत-वैशिष्ट्यं प्रकटं भवति ।नामानि च पुनः गुणकाराणि भवन्ति।अतःस्वमेव भावमङ्गीकृत्य अस्य ग्रन्थस्य लेखकोऽपि ग्रन्थनामकरणे प्रवृत्तः ।

श्रौतचन्द्रिकायामपि त एव विषयाः संश्लिष्टाः ये च श्रौतसूत्रेषु प्रतिपादिताः सन्ति । श्रुतेः इदं श्रौतं,तस्य चन्द्रिका श्रौतचन्द्रिकेति व्यपदेशः व्युत्पत्तिलभ्यः सार्थकश्चास्ति ।श्रौतत्वेन यद्यपि सूत्रादीनां ग्रन्थानां ग्रहणे बाधस्तथापि स्वकविशेषेषु प्रयोगादिषु श्रुतेरंशत्वात् तानपि गृह्यन्ते ।किञ्च, श्रुतिं स्मृतिरनुसरति।यथा कालिदासोऽपि- श्रुतेरिवार्थं स्मृतिरन्वगच्छत् इति ।श्रौतस्य प्रतिपादकत्वात् सूत्रादीनामपि वेदत्वमिति धिया ग्रन्थकारेण ग्रन्थादौ श्रौतसूत्राणां विवेकं प्रस्तुतम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्मिन्नपि ग्रन्थे श्रौतयागविषयकपदार्थानां परिष्कृतमस्ति ।
परन्तु सम्पूर्णस्य श्रौतपदार्थस्य नैवसमावेशः अपि तु भागमात्रम् अस्ति इति निबन्धे अपेक्षितानि एव श्रौतकर्माणि अत्र दर्शपूर्णमासाग्न्याधान-पुनराधानादीनि संकलितानि सन्ति । श्रौतशब्दः अत्र सामान्यः (याज्ञिकः) प्रयोज्यते । ऐतिह्यस्य तथ्यान्वेषणेन ज्ञायते यत् श्रौतशब्दस्य प्रयोगः प्रायशः प्रसिद्धानां प्राचीनश्रौत-सूत्राणां तुलनात्मकाध्ययनार्थः कृतो स्ति । अतः श्रौतसूत्राणां अभिलषित-पदार्थाः (दर्शपूर्णमासाग्न्याधेयपुनराधेयप्रभृतिविषयाः) एव चन्द्रिका यस्य ग्रन्थस्य स ग्रन्थः श्रौतचन्द्रिका इति संघटते । चन्द्रिकाशब्दः सर्वश्रौतसूत्रसारवाचकः । भावो यं यदत्र केषां श्रौतसूत्राणां संकलितविषयाणाम् समावेशः* । यथा-दर्शपौर्णमासयागनिर्णये बौधायनप्रभृतिभिराचार्यैः सह भारद्वाजकात्यायनादीनां दाक्षिकाणि पांचभाष्याणि च मतानि अपेक्षितानि ।

अतः सामान्यरूपेण श्रौतचन्द्रिका केषां श्रौतसूत्राणां आश्रयः स्पष्टेन भवति । यथा चन्द्रिकाशब्दः आह्लादवाचकः । अत्र नैव केवलम् श्रौतसूत्राणां लघुनिबन्धानामपि प्रकृतास्विस्तृतिपरा एव । अतः श्रौत-कर्म-गूढ-सूक्ष्म-स्फुटितार्थः प्रतीयन्ते इति अपरो नाम हेतुरनुमीयते ।

मीमांसा विधया अपि अस्य ग्रन्थस्य नाम संबन्धी व्याख्याः सन्ति । अतः किंचिद्गूढं रहस्यमेवोररीकृत्य लेखकेन श्रौतचन्द्रिका इति नामोट्टंकितम् । सर्वविधरहस्यानां सम्यादिकृतिर्गणां च पक्षाक्षयो एव दरीदृश्यते । अतो ऽस्य श्रौतचन्द्रिकेति नाम अन्वर्थम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गीतचन्द्रिकाटीका: महादेववाजपेयी

प्राचीनविद्वद्ग्रन्थानामनुसन्धानाञ्च विषये व्यवस्थित: परिचय: सामान्यतोऽपि शोधकानां कृते काठिन्यमावहति ।प्रायश: संस्कृतसाहित्यस्यावलोकनेनैवैव निश्चीयते यत्प्राचीनाचार्या: ग्रन्थाध्ययनप्रविष्टा, अक्षर-व्याख्याने, धर्माचरणे, कृत्यानुष्ठान एव च नितरां निमग्ना: बभूवु: न तु साहित्यसन्दर्भेषु स्वपरिचयदानेऽपि रता: ।एतावतैवानेक नृपाना विपश्चिद्वेष्याश्च विविधविभागविभूषितानां विभिन्नग्रन्थानां कृते परिचया, यतो सन्देहसिन्धुसंतरणसमर्था नैव जायन्तेऽपि ।अथ प्राचीनेषु ग्रन्थेष्वेषु स्वपरिचयस्य परम्परा एव नासीदिति अनुमीयते ।

तथापि गीतचन्द्रिकाग्रन्थस्य टीकाविषये स्वल्पैव आस्था समापतति । अस्या: टीकाया नाम ग्रन्थस्योपोद्घातप्रकरणस्य गीतावरणश्लोके महादेव-वाजपेयी इति ज्ञायते ।परन्तु नामातिरिक्तम् अन्य:कश्चिदपि आधारो नाधिगम्यते येन टीकाया पूर्ण: परिचय: प्राप्येत् ।संस्कृतसाहित्येतिहासग्रन्थेष्वप्यस्य नाम नावलोक्यते ।बहुविधपुस्तकान्वेषिन्विषये यतीकृतानि परन्तु पुष्टं प्रमाणं टीकाया स्थान-देश-काल-विषये न प्राप्तम् ।गीतगोविन्दव्याख्या-कृतं वैदिकसाहित्येतिहासे महादेवनाम्ना कश्चित् गीतसूत्रव्याख्याकारो दृश्यते ।परन्तु तस्यापि देशकालस्योल्लेखो नास्ति ।अस्मिन्प्रसङ्गे पं० गोपीनाथ कविराजकृतं 'काशी की सारस्वत साधना' इत्यपि पुस्तकं दृष्टवान् परन्तु तत्राप्यस्य परिचयो नास्ति । महादेवकूटनामधेया: ज्योतिर्विद:अस्मिन्ग्रन्थे-उल्लिखिता: सन्ति परन्तु तेष्वेक: नैयायिक: अपरश्च,कवि:,अन्यश्च ज्योतिष-शास्त्रमर्मज्ञश्चेति क्रम: । गीतगोविन्दव्याख्यानभागानामपरस्मिन्पुस्तकेऽपि (काशी की पाण्डित्यपरम्परा) ये क्रम एव उल्लिखितस्य टीकाया पुष्टं प्रमाणं नोपलभ्यते ।उपर्युक्ते ग्रन्थे प्रो० रामवर्मणा रचितस्य 'बिब्लियोग्राफी'

CC.O Sampurnanand University Collection. Digitized by eGangotri

बाक थुत इण्डिया" इतिवृत्तकर्त्ताऽसौ स्ति । अत्र कुत्राप्यस्य कालिकानां कार्यालयस्थानां विदुषां परिचयो स्ति । अत्र कान्यकुब्जार्थ-मतोऽध्यानां वर्णनमुपलभ्यते । तेषामयं काल: १८२६ त: १८७७ ई० मध्ये लिखितोऽस्ति । कालकाठेषु निबद्धेऽप्येक: महादेव नामकोऽपि कविरासीदस्ति, परन्तु तस्योपाधि: नावगम्यते । कुतश्चिदितिविदुषां मध्य: गौतमचन्द्रिकाग्रन्थस्य प्रतिलिपिकाले रामचन्द्रमहात्मना गोपालो धृत् १८२६त: १८७७ई० पूर्णमभूत् इति । अस्य गौतमचन्द्रिकाग्रन्थस्यान्ते संवत् १८८०मुल्लिखितमस्ति ।

विलियमबटरफ्लाई बाक थुत इण्डिया इति ग्रन्थस्य प्रकाशनं क्लाटिक पब्लिशिंग हाउस, बम्बई स्थानात् सन् १८३३तमवर्षे जातम् । अस्य ग्रन्थस्य तृतीय परिशिष्टभागस्य ४३३: १६५ पृष्ठं यावत् "संस्कृत राइटर्स बाक दि थुत पीरियड" इति शीर्षकस्य वर्णनं मिलति, तत्र कालीस्थानां विदुषां नामानि लिखितानि सन्ति । कालस्था: प्रायेणैकेषिकविद्वांस: अत्र सम्प्रति तथा द्विवेन पूर्वं भवति अत्र महादेवाचार्यो दाक्षिणात्यो ब्राह्मण: आसीत् । अस्य वालानिष्ठावे तु ग्रन्थावलोकनेनैव ज्ञानं भवति अत्र कृष्णयजुर्वेदिशाखाया: विद्वान् आसीत् । तेनैव सम्पूर्णो विल्पग्रन्थे कुत्रापि स्वजीवनपरिचयार्थ-मन्य: कोऽपि न दत्त: ।

पाण्डित्यम् – अस्य लेखकस्य पाण्डित्यविषयेऽस्य मनागपि निश्चयो न भवति एकैकविषयग्रन्थेऽस्य न पाण्डित्यपूर्ण: परिचयो नैव कृत इति । अस्यान्यै-ग्रन्थेरपि कार्यम् । सूत्रग्रन्थानां ज्ञानं ग्रन्थावलोकनाद् दृश्यते । कल्प-साहित्ये त्वस्याद्वितीयं पाण्डित्यमस्तीति ज्ञायते ।

शैली– अस्य लेखकस्य वर्णनशैली वैशिष्ट्यं नापद्यते, कतिपयानां प्रकाराणां पद्धत्याद: उद्धृतानि सन्ति । क्वचित्तु सूत्रकाराणां सूत्रात्मकव्याख्यानं प्रकिया ति यथा कुर्यात् इति बौधायन: न कुर्यादिति शातातप: । इत्यादि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

तथाप्यस्य वैशिष्ट्यं विपुलपाण्डित्यप्रकाशकत्वमस्ति । अत्र शौनकं विदुषां मतानि संगृहीतानि सन्ति । कात्यायनस्य सामिप्रायमप्यस्यावलोक्यते ।

अतो न्ये वक्तुं शक्नोति यत्लेखकः पं० महादेवो वाजपेयी स्व शाखाया एव अशोकलघुत्वेऽपि प्रामाण्यमङ्गीकृत्यासीत् । वेदाङ्गानां ज्ञानमपि सूक्ष्मतया: निरूपितो दरीदृश्यते, अत: कर्मकाण्डस्य प्रामाणिकोऽयं लेखक इति धी: ।

श्रौतसम्बन्धिकागत श्रौतसूत्राणां
परिचय:

यद्यपि श्रौतसूत्राणां विषये सामान्य: परिचय: प्रस्तुतस्तथापि श्रौतसम्बन्धिकायां प्रायश: प्रसिद्धानां श्रौतसूत्राणामुल्लेखनीयेषां सूत्राणामपि विषये किञ्चिद् विस्तृतं वर्णनं प्रस्तूयते -

(१)आश्वलायन-शांखायन श्रौतसूत्रे-

ऋग्वेदस्य द्वौ: श्रौतसूत्रौ ऐकमाश्वलायनश्रौतसूत्रम्, अपरं च शाङ्खायन-श्रौतसूत्रम् । आश्वलायन श्रौतसूत्रं द्वादशाध्यायात्मकमस्ति । आश्वलायन: शौनकस्य शिष्य: आसीत् । शांखायनप्रणीतं श्रौतसूत्रं अष्टादशाध्यायात्मकं अस्ति । तथा आश्वलायनश्रौतसूत्रमैतरेयब्राह्मणमनुसरति शांखायनं च शांखायन-ब्राह्मणम् । उभयत्र प्रतिपाद्य विषया: समाना: सन्ति । यथा-

पुरो नुवाक्या, याज्याश्च । एवं अत्र होतृकर्मविधानादीनां कर्मणां, प्रवर-प्रतिहार-न्यूङ्ख-प्रायश्चित्तादीनां विधानञ्च संकलितमस्ति । शांखायनश्रौतसूत्रं आश्वलायनश्रौतसूत्रापेक्षया किं व्यापकम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१७-१८ अध्यायौ ब्राह्मणस्य सामीप्यं भजेते । यतो ह्यन्त्यौ इमौ तौ अध्यायौ ब्राह्मणेनाधिक्येन प्रभावितौ स्तः । अस्य शांखायनश्रौतसूत्रस्य शैली ब्राह्मणशैल्या प्रभाविता प्रतीयते । शांखायनश्रौतसूत्रे क्रमेण दर्शपूर्णमास-वाजपेय- राजसूय- अश्वमेध-पुरुषमेधसर्वमेधादीनां यागानां विधानं विस्तरेण विहितमस्ति ।

(२)बौधायन श्रौतसूत्रम् -

इदं श्रौतसूत्रमत्यन्तप्राचीनमस्ति । अस्य श्रौतसूत्रस्योपरि भवस्वामि-महोदयस्य भाष्यमुपलभ्यते । 'कालेण्डमहाभागेन सम्पादितमिदं श्रौतसूत्रं कृष्ण-यजुर्वेदेन सम्बद्धमस्ति । अस्मिन् श्रौतसूत्रे एकोनविंशत्प्रश्नाः सन्ति। प्रश्नाः कण्डिकासु विभक्ताः कण्डिकाश्च सूत्रेषु विभक्ताः सन्ति। प्रश्नाश्च अध्याय-पर्यायरूपाः ज्ञातव्याः । ब्राह्मणशैलीमनुसृत्येदं श्रौतसूत्रं सृष्टम् । अतो ऽस्य प्राचीनत्वं सुस्थिरमेव भवति ।

(३)आपस्तम्ब श्रौतसूत्रम् -

चतुर्विंशति प्रश्नेषु (अध्यायेषु) विभक्तमिदं श्रौतसूत्रं प्रमाणदृष्ट्या, परिमाणदृष्ट्या च अन्येषु श्रौतसूत्रेषु कल्पसूत्रेषु च महत्त्वमत्यधिकमावहति । प्रश्नाः कण्डिकासु एवं कण्डिकाश्च सूत्रेषु विभक्ताः सन्ति ।

(४)हिरण्यकेशि: (सत्याषाढ)श्रौतसूत्रम् -

इदं श्रौतसूत्रं कृष्णयजुर्वेदेन सम्बद्धमस्ति । अस्मिन् श्रौतसूत्रे चतुर्विंशतिः प्रश्नाः स्वीकृताः सन्ति । आपस्तम्बश्रौतसूत्रेणेदमत्यधिकं प्रभावितमस्ति। भारद्वाजसूत्रादप्यनुवाद अत्र प्रतीयते तथा चास्य स्वकीयवैशिष्ट्यं सुरक्षितमस्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

(५) भारद्वाजश्रौतसूत्रम्-

महर्षिभारद्वाजेन रचितमिदं श्रौतसूत्रं कृष्णयजुर्वेदस्य तैत्तिरीयशाखया सम्बद्धमिति तैत्तिरीयसंहितागतानां मंत्राणामुल्लेखात् ज्ञायते । अत्र च मैत्रायणी-काठकसंहितयोरपि मंत्राः गृहीताः सन्ति । भारद्वाजश्रौतसूत्रस्यापस्तम्बहिरण्यके-शिश्रौतसूत्राभ्यां तुलनात्मकाध्ययनेनेदं ज्ञायते यत् आपस्तम्बापेक्षया इदं श्रौतसूत्रं प्राचीनत्वमावहति । अत्र पितृमेधसूत्राणां संकलनं व्यवस्थितं दृश्यते । वस्तुतः-परिशीलनेनेदं निश्चीयते यत् भारद्वाजः दाक्षिणात्य इति । भारद्वाज-श्रौतसूत्रं पञ्चदशप्रश्नेषु विभक्तमस्ति । विषयास्तु-दर्शपूर्णमासावग्न्याधेयाग्नि-होत्राग्रयण निरूढपशुबन्ध-चातुर्मास्य- प्रायश्चित्त- ज्योतिष्टोमाः(सन्त्यत्र) प्रवर्तन्तेति । भारद्वाजश्रौतसूत्रस्य प्रश्नद्वये, प्रेतसंस्कारः, श्मशानक्रिया, दाहविधिः, पात्रचयः, अस्थिसंचयः, श्मशानविधिः, इत्यादीनां कर्मणां विशदेन वर्णनं लभ्यते । भारद्वाजीयपरिशिष्टसूत्राणां संख्या २२२ अस्ति ।

७- कात्यायन श्रौतसूत्रम् -

माध्यन्दिनीयशाखायाः इदं श्रौतसूत्रं श्रौतसूत्रेषु सर्वविशिष्टं पृथक्त्वमावहति । षड्विंशत्यध्यायात्मकमिदं श्रौतसूत्रम् अतीव सूत्राकाररूपत्वात् सर्वेषां श्रौतयागानां व्यवस्थितरूपेण विधानं क्रमेणानुष्ठानप्रक्रियां च निदधाति ।

षड्विंशत्यध्यायाः अस्मिन् ग्रन्थे सन्ति । अध्यायाः कण्डिकासु विभक्ताः सन्ति । षड्विंशत्यध्यायेषु प्रथमः अध्यायः पारिभाषिकोऽस्ति । द्वितीयतृतीयाध्याययोर्दर्शपूर्णमासः । चतुर्थाध्याये पिण्डपितृयज्ञस्य विधानं, तदनु दाक्षायणाग्न्याधानपुनराधानाग्रयणाग्निहोत्रादीनां क्रमेण वर्णनमवलोक्यते । पञ्चमे अध्याये त्रयोदशकण्डिकात्मके, चातुर्मास्य मित्रविन्देष्ट्यादीनां वर्णनं सम्यक्तया प्रतिपादितमस्ति । षष्ठाध्याये(दशकण्डिकात्मके) निरूढपशुबन्ध यागस्य विवेचनं समुपलभ्यते । आसप्तमं द्वादशं यावदग्निष्टोमस्य वर्णनं

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विधिविहितमस्ति । एकादशे ब्रह्मणः कर्त्तव्यविवेचनं, द्वादशे द्वादशाहयाग-विवेचनं, त्रयोदशाध्याये गवामयनयागस्यैव निरूपितः । चतुर्दशे वाजपेययागः पञ्चदशे च राजसूयः । षोडशादष्टादशपर्यन्तेषु त्रिष्वध्यायेषु अग्निचयन निरूपणं एकोनविंशे अध्याये सौत्रामणीयागस्य निरूपणं विंशे अध्याये अश्वमेधयागविधानं, एकविंशे अध्याये पुरुषमेध सर्वमेधपितृमेधानां विधिव्याख्यानं वर्णितमस्ति । द्वाविंशाध्यायादेकविंशाध्यायपर्यन्ताः विषयाः सामब्राह्मणस्य बहूनां काण्डानां स्मरणं कारयति । तदनन्तरं क्रमेण एकाहाहीनौ: वर्णितम् । २२-२४ अध्याययोः आधारः ताण्ड्यब्राह्मणमेव । पञ्चविंशेऽध्याये प्रायश्चित्त-वर्णनं तथा षड्विंशे अध्याये प्रवर्ग्यविधानमस्ति ।

कात्यायनश्रौतसूत्रं श्रौतानां वैदिककर्मकाण्डानां ज्ञानाय श्रौतयागानाम-वबोधाय च परमावश्यकम् अस्ति ।

श्रौतसूत्रग्रन्थस्योपयोगिता-

कस्यचिदपि वस्तुनः उपयोगित्वं देशकालपरिस्थित्यनुसारं भवति । यद्यपि देशस्य भावनया संवादकः पूर्णरूपेण परिचितो न भवति, तथापि प्रयत्नेन तस्य विचारं विधाय अनुपस्थापयति । अनेनैव प्रकारेण श्रौतसूत्र-ग्रन्थस्योपयोगिताविचारे एवं वक्तुं शक्यते यत् पुरा श्रौतसूत्रकाले यां परिस्थितिं समालोच्य वैदिकसंस्कृतेः रक्षणार्थं याज्ञिकपरम्परायाः संरक्षणार्थं च ऋषयः कल्पसूत्राणां रचनामकुर्वन् । तथैव अद्यापि अनुमीयते भावो यं यत् पुरा मानवानां आलस्यप्रवृत्तत्वात् वैदिकब्राह्मणानां विषये मीमांसकानां विस्मरणेन अतस्तस्यानं दुष्करमूलका ऋषिमुनयः परमकारुणिकाः कात्यायनप्रमुखाः आचार्याः स्वां स्वां शाखामवलम्ब्य श्रौत-गृह्य-धर्म-शुल्वसूत्राणि संरचयामासुः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तथैव लोकेऽपि अस्मिन् युगे गणितागमानामभावात् तत्राप्य ज्ञानेच्छावति-विद्वज्जनानां प्रवृत्ति: गणितविषये स्यादेवेति अतोऽस्य गणितकुण्डानां वैदिकसिद्धान्तस्य संरक्षणार्थमस्य ग्रन्थस्य उपयोगिता सिध्यति ।

पूर्वाचार्यप्रणीतानां गणितकुण्डानां एक कालावच्छेदेनाध्ययनमसंभवमिति अनेन एकत्रावलोकनेन द्वैधानां गणितगणितविषयाणामावश्यक: सिद्धान्त: स्वान्तराणि नैतानि सर्वाणि प्रकटानि भवन्ति ।

अस्य च महत्त्वं न केवलं गणितशास्त्रस्याध्ययनादेव सिध्यति, प्रत्युत वैशिष्ट्यमस्य ग्रन्थस्य भाषा विशुद्धता ऽपि ।

<u>रचनाकाल:-</u>

गणितचन्द्रिकाया: कलेवरावलोकनेनास्य रचनाकालविषये निर्णयं तु न कर्तुं शक्यते, तथा ऽपि अनुमीयते यत् गणितज्ञानां प्राबल्ये सत्यस्य ग्रन्थस्य रचना केनचित् कृता इति । स्वाकृता: अन्य: शुद्धरूपा: भाषाविषयविवेचन-रूपा एव भवन्ति इति ग्रन्थस्य आद्योपान्तावलोकनेन ज्ञायते । अस्य महत्त्वम् ऐतिहासिक दृष्ट्या ऽपि वर्तते । प्राचीनकाले देश:परिचित आसीत्, तं च गणितशास्त्रेषु अस्य महत्त्वं सुविदितमासीत् । प्राचीनकाले गणित-शास्त्रस्य सम्पादने स्व प्रायोगिकी अनुभूतिराधुनिकविज्ञानेन ज्ञायते ।

अनेन प्रकारेण अस्य ग्रन्थस्य महत्त्वं अत्यधिकम् अस्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ग्रन्थकाराचार्याणां परिचय:

धूर्तस्वामी

धूर्तस्वामी कदा कस्मिं भूमिभागके चकारेति विचारे भाष्यं वृत्तिर्वा नास्माकं तदायुक्तमाचरति । तथापि श्री भाष्यकारै: वेदार्थ संग्रहे -

' उपनिषदां स्वरूपाविताथे तात्पर्यं प्राचीनवेदव्याख्यातृ
वैमतो वर्णनीयायात् ' तदेतद् नानाविध , श्रुतिनिकर शिष्ट

परिगृहीतत्व् व्याख्यान-परिभाषयवधारितम् ' इत्यत्र भगवद्--- गुहदेव , क कपर्दिभारुचि प्रभृत्य विगीत शिष्ट गृहीत पुरातन वेदवेदान्तव्याख्यानं सुव्यक्तार्थ श्रुति निकर दर्शितोऽयं पन्था: ' इत्यत्र च कपर्दिन: - एव प्राचीन संप्रतिपन्न वेद-वेदान्त व्याख्यातृतया परिगणनमकारि तद्व्याख्येयसूत्रभाग व्याख्यात्रा धूर्तस्वामिनाऽपि ततोऽर्वाचीनेन भवितव्यमिति निश्चय: । यदाहुर्वं स्वर्गं भवति इति स्वर्गफलानुभव इति व्याख्यातं वर्णयन्ति इति यद्व् कपर्दि स्वामी धूर्तस्वामिभाष्यं तन्नाम निर्दिश्य विनिर्मुक्तं निर्दिशतीति ततोऽपि तस्य तत्पूर्वकालिकता निश्चीयते ।

उक्तमिति श्री गणो प्रमाणानु यथार्थं मीमांसकैरुपपादितं इति धूर्त स्वामिभाष्यम् । (२-२-२८ आप० श्रौ०सू०) ।

(४$\frac{१}{७}$) अधिकरणे च शबर स्वामिना उपपत्तिमत्तुं स्याद्यस्य-स्यमुपपाद्यते । एवं (४-११) खण्डे ' सुब्रह्मण्या तु तस्मैं स्याद् इति मीमांसक मतात् । इति भाष्यम् ।। ' सुब्रह्मण्या तु इति (१२-३-२२) सूत्र मस्यैव सूचनी शबर स्वामिनो वाक्यम् । एवमादि ग्रंथ पर्यालोचनया शबर स्वामिनोऽर्वाचीनो धूर्त स्वामीति - वक्ता तुं शक्यते ।

शबर स्वामिनोऽपि भाष्यं भाष्यान्तरमूलकमिति स्वामिपदान्तनाम-धेयता तत्सम्बन्धं ततोऽर्वाचीनत्वमिति तु न शक्यम् , भवस्वामी केशवस्वाम्यादिषु

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ततोऽर्वाचीनेष्वपि स्वामिपदान्त नामधेया ग्रंथाः ।

अमरस्वामी शाण्डिल्यस्मार्त्याद् पूर्वतनो वत्सराणां सहस्रया इति विनायकरायः ।

धूर्तस्वामी बहुश्रुतामिश्रः" इति (१० प्रश्ने) "अन्यं विधिवस्त्याद् श्रूयमाणाद् शास्त्रस्वदर्शनात्" इति तद्भाष्यादवगम्यते: दशमे प्रश्ने " नीवि-रसीति नीविमनुकल्पयते " इति सूत्रम् । तत्र सोमस्य नीविरसीत्यन्तात् यैष्ट-यति " इति धूर्तस्वामी भाष्यम् ।

अत्र च " यथोपरि न भवन्ति यथा चाधोऽन्ता न प्रकाशा भवन्ति इति रामाण्डार कर्णेन च ग्रंथेण सूत्रस्य वासोधारण- प्रकार निर्दिष्टो भवति। स च वसनधारण प्रकारः अधरीय विषयकस्तु वैदिकैः श्री वैष्णवैश्चापि परि-पाल्यमानो वर्तते ।

धूर्तस्वामीभाष्यवृत्ति परिचयः

धूर्तस्वामी भाष्यस्य षर्पूर्णभाग प्रभृति सोमान्तभागे रामाण्डारवृत्ति र्दृश्यते । सोमग्रन्थान्ते " इति रामाग्निचिद्वृत्ति समाप्ता इति तेन वर्णनाच्च तस्यैव वृत्तिः प्रणीत्येत्यपि निर्णेतव्यं भवति ।

यद्यपि पुरातनकाः षर्पूर्णभागप्रकाश नाम्ना प्रचरति किं न पुस्तकम्। अत्र च भाष्यवृत्तिः सूत्र दीपिका च प्रश्नचतुष्टयी भागस्य प्रकाश्यते , तथापि तत्प्रकाशकस्य भाष्यग्रन्थ वर्तिष्यं भाष्यवृत्तिरूप निबन्ध इव विवेक वर्णिर्व्यां न तथा प्रकाशने निबन्धाभावात्: । यद्यपि भाष्यानुवृत्तो अमुद्रितेनामूल वृत्ति निबन्ध- ठेलनं कोशेषु दृश्यते तत्र एव ग्रन्थ विवरणतवैकल्यादं निबन्ध इति संदिग्धत्वनकारः तथापि (५ पृ० ७ पं०) क्वचित् चतुर्विधं प्रणीतं स्यते -ऽन्वाधानमिति पाठः । (६-१) कचिन्मंत्रेण वेधनं नित्यम् इति पाठः। केवलम्

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विकारन्कुर्म्यात् " इति पाठः ।

(१०-१) पितामह संततिका इति वा पाठः इति पाठ भेदात्(११)" सूत्राणां व्युत्क्रमेण व्याख्यानमनारभ्य लेक प्राप्तानुगा " इति भाष्य शैली परिचय च प्रकाशन् " यदुक्तं भाष्यकारः इत्यादिना भाष्यकारं पृथक् निर्दिश्य रामाण्डार स्वीयांशुग्नि तद्विवरणीयं च भाष्यं विविक्तं मन्यत् इत्यवधेयम् ।

रामाग्निचित्कालः

रामाग्निचित्त्व त्रिकाण्डमण्डन कारात् भास्कर सोम याजिनोऽपि प्राचीनतर इति स्वीय कण्डाकुल्याख्यग्रन्थे -

स हि बौधायने प्रमाणमुक्त्वा वाध- वदानंगो कर्त्रीनं मंत्र ब्राह्मणभाष्यकृत् । अत " च " मंत्र ब्राह्मणभाष्यकृत् - रामाण्डारः" इति तट्टीकाकार आह । एव रामाण्डारग्नि चर्यांस्वपि तत्र तत्रोदाहरत्यपि । भास्कर सोमयाजीन स्वस्य प्राचीनकल्पनिबन्धभाष्य तद्व्याख्यात् के व्याख्यात् सम्मतार्थ प्रकाशकत्वं निगमने स्वयमेवाह -

अनेकाचार्य सिद्धान्ताः,
संक्षेपेण निरूपिताः ।
देशकाल वयोऽवस्था
शक्तिभेदाद्व्यवस्थिता ।। इति

एवं बाचार्य पदेन त्रिकाण्डमण्डन संगृहीतैरामाण्डारैऽपि प्रामाणिक प्राचीन वेदार्थ व्याख्यातृ गोष्ठी गरिष्ठ एवेति निर्णयेनास्त्येव विमर्शावकाशः ।

ग्रन्थेऽस्मिन् लेकेषु स्थलविशेषेषु " इति रामाग्निचितः" , इति शब्देन संबोधितः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

रामाण्डार व्यपदेश मूलम्

धूर्तस्वामी भाष्यवृत्तिकृत् रामाण्डार इति व्यवहारनिबन्ध तस्य एव प्रवरमपि किंमूलकस्यादिति विचारयन्त उपपत्तिकलापैर्व्यवस्थापयाम: । आण्डार: पदं हि द्राविडभाषायां नाथ एव पर्यायतया सम्प्रतिपन्नं भवति , द्राविडभाषायां च रेफान्त निम्ननामत्वादिना आण्डार इत्य अकारान्ततयैव पर्यवसित प्रयोगं च प्रसरति । राम इति च विष्णुकीर्तितं नाम । रामाग्निचिदिति तु अग्निचयनानुष्ठान निबन्धनं प्रतिपदलाभं पूर्वं लिख्यमानं दृश्यते । आण्डार पदं तु विरुदभूतं नाम्ना संघटित व्यवहारमिति युज्यते भट्टभि स्वाभ्याधिपकम्।

आण्डार इति विरुदनामधेयस्य तमिळदेशीयगत महावंश संभूति । निमित्ता समुचिता = पवित्रमुर्वीति। श्रीकृष्णादि व्याख्याकाल लोकादि वर्णनरूप जगत्पावन तत्र्याधा चतुरसौ प्रणेतारो विष्णुचित्ताचार्य पाण्ड्यदेशे श्रीविल्लिपुत्तूर दक्षिणमथुरा नगरे राज्ञो वल्लभ देवस्य विद्वत्सभायां परमतत्त्व निर्णय प्रतिष्ठा परमात्मतत्त्व सुनिरूपण परिभुक्ति विष्णुकारतादिकं भट्टनाथ विरुद विभूषिता मत्तोगजधामवारघुनन्दिनीति च तदितिहास प्रसिद्धं जानाति । इति

रुद्रदत्त

आपस्तम्बीय श्रौतसूत्राणां हारदत्तवृत्तिकार: रुद्रदत्तोऽपि । रुद्रदत्तभाष्यमित्यपि तस्याकृतेः व्यपदेश त्रिकाण्डमण्डनस्य टीकायां दृश्यते । यथा त्रिकाण्डमण्डने (१५ श्लो०) " बहवृचैरपि: परीनिगृह्यमाणत्वं रुध्यमानत्वम् । तदेवावरोधनम् " इति रुद्रदत्तभाष्ये इति । अयं च ग्रन्थ: रुद्रदत्तवृत्तौ पञ्चम प्रश्ने -दश पटले ३ य सूत्रे दृश्यते ।

अत्र च रामाण्डारवृत्तेरपि भाष्यमित्येव व्यपदेशो दृश्यते । अयं च रुद्रदत्त: धूर्तस्वामिनो अर्वाचीन: । तथा हि ग्रन्थारम्भे " अथापस्तम्बसूत्रस्य धूर्त- स्वामिकृतान् संक्षिप्य ।

सूत्र दीपिकया कृत्वा रुद्रदत्त: प्रकाशयति ।" इति प्रतिज्ञानात्

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एव प्राचीनविवरणं मूलकार्यं परि लिलिखयैव एव प्रकाशयेयति। प्रायोऽयं अधिकार: सुविकासुविकं मतान्तरत्यापन्नाय उपनयति । पञ्चाशीच प्रवना: रुद्रदेन व्याख्याता । परिमाणानापि तेन व्याख्यातीति समावयितुमशक्यमकार: । केवल स्वाभिमतानुयायी च रुद्रदत्त इति त्रिकाण्डमण्डने अधिकारि निरुपण-ग्रन्थावलगम्यत इत्यलम् ।

बौधायन:

आचार्य: बौधायन: प्राचीनाचार्येष्वन्यतम: प्रतिष्ठितश्च । अस्य रचितानि , श्रौत, गृह्यधर्म, शुल्बसूत्राणि समुपलभ्यन्ते । अस्य आचार्यस्य अधिकार: सर्वेषु वैदिक वाङ्मयक्षेत्रेषु सामान्य रूपेण दृश्यते ।

अस्य जन्मस्थाननिर्णये मतमतान्तराणि सन्ति । डॉ० बूलर महा-भागानुसारं अस्य जन्मस्थानं दक्षिणभारतमस्ति। परन्तु पुष्टप्रमाणाभावात् भ्रान्तोऽयं विषय: ।

डॉ० बलदेवोपाध्याया महाभागा:[१] एवं आर्यावर्तीयं स्वीकुर्वन्ति ।

अस्मिन् ग्रन्थे बहुषु स्थलेषु बौधायनस्य विरोधि रूपेण शालीकि-राचार्य समुपस्थित अस्य निर्देश: कुर्यादिति बौधायन: , न कुर्यादिति शाली-किरिति वाक्येन ज्ञात: ।

आचार्य बलदेवोपाध्याया: स्व ' वैदिकसाहित्य एवं संस्कृति ' नामधेये ग्रन्थे अस्य आचार्यस्य कालं वि०पू० पञ्चशतीति साधयन्ति ।

कपर्दी:

आपस्तम्बीय शुल्बसूत्रस्य टीका कर्तृषु श्री कपर्दी स्वामी अन्यतम:

- -

१- द्र० वै० सा० एवं संस्कृति ' कल्पसूत्र प्रकरणे ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्राचीनतमस्य । कपर्दिस्वामिनः टीकाऽऽपस्तम्ब- श्रौत, आपस्तम्ब-गृह्य परिभाषा दर्शपूर्णमासस्य भारद्वाज- गृह्यसूत्रेषु वर्तते ।सूत्राणि वैधानि एवं गौतमसूत्रादि विभागेषु । अस्याचार्यस्य मतं एव एव ग्रन्थे गीतमन्तः । अतो तत्कारणात्- वैदिकाचार्यस्य समयः द्वादश शताब्द्याऽपि प्राचीन इति उपाध्यायः ।

गोपाल:

अस्य कृताध्यायेन आपस्तम्बीय गृह्यभाष्यमस्ति । अस्य पितुर्नाम गार्ग्यो नृसिंहसोमयुरस्ति । अनेन एवं ज्ञातुं शक्यते यदिदं कर्णाटके - द्रोण- परिवारे जाता इति ।

भवस्वामी:

भट्टभास्कराचार्यं मतानुसारमस्यापार्थस्वामिं वाक्यार्थे " इति ग्रन्थोपरि भाष्यम् । बौधायन प्रयोगसारे भवस्वामिनः भाष्यनिर्दिष्टमस्ति । अस्य समयः १० पूं शतकमस्ति । तैत्तिरीय संहिता ब्राह्मणयोरुपरि भाष्यं निर्दिष्टमस्ति ।

दर्शपूर्णमासकथन:

अमायां पूर्णिमायां च यथाक्रमं क्रियमाणं कर्म वा अमायां पूर्णिमायां चानुष्ठेयत्वात् अन्वर्थः दर्शपूर्णमासाविति संज्ञा । यद्यपि दर्शपूर्णमासयागस्य स्वर्ग- दृष्टफलकत्वाद्दर्शपूर्णमासाविति नित्यवत्त्वेन कृतं ।

उभयत्र अमायां पूर्णिमायां च त्रयस्त्रयो यागाः भवन्ति । अतो उभयत्र षट्त्वाद्दृष्टैकोत्पादकत्वाद्द्विवचनं कृतं ।

द्रव्य- अमायाम् - (१) आग्नेयः पुरोडाशयागः एकः ।
(२) इन्द्रदेवताकः दधिद्रव्यको यागो द्वितीयः ।
(३) इन्द्रदेवताकः पयोद्रव्यको यागः तृ ।

सरस्वती भवन पुस्तकालय
आगम संख्या 166640
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पूर्णिमायाम्— (१) आग्नेयोऽष्टाकपालः पुरोडाश यागः ।
(२) अग्नीषोमीय उपांशुयागः आज्य द्रव्यकः ।
(३) अग्नीषोमीय एकादश कपालः पुरोडाश यागः इति यागत्रयम् ।

उभयत्र मिलित्वा षट् यागाः सम्पद्यन्ते । एक कालकर्तव्यं यागत्रयमपि एकसमुदायमंगीकृत्य समुदायद्वयरूपेण दर्शपूर्णमासाविति । एवं च यागषट्क : साम्नाय्ययाजिनं प्रति भवति।

पूर्वोक्तौ दधिपयसी द्रव्ये हि साम्नाय्यशब्दाभिधेयौ । तत्र च सोम याजिन एवाधिकारः। अर्थात् आधानानन्तरं यः सोमेन इष्टवान् तस्य साम्नाय्य यागेऽधिकारः, नासोमयाजिन इति वचनात् ।

आधानानन्तरं दर्शेष्टेः काल सान्निध्यादपि तत्र यागः न कर्तव्यः, प्रत्युतागामिन्यां पूर्णिमायामेव प्रारभ्य ततो दर्शेष्टेः क्रमेणानुष्ठानमिति विवेकः । एते षट् यागा एव सर्वासामिष्टीनां प्रकृत्यो[१] भवन्ति । दर्शपूर्णमासौ इष्टीनां प्रकृतिरिति वचनात् । इष्टिषु दर्शपूर्णमासयोः प्रकृतिःत्वाविति स्पष्टीकृतत्वात् । श्रुतौ हि विभिन्नफलोद्देशेन च "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" "यस्याहिताग्नेरग्निर्गृहान्दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं पुरोडाशं निर्वपेत्" इत्यादिना परः शताः इष्टयः विहिताः तासां सन्निधौ तदुपयोगीतानि अंगानि न पठितानि, परन्तु पूर्वनिरूपितेषु दर्शपूर्णमासात्मकेषु षट्सु यागेषु सर्वानंग कलापानभिधाय तत एव तासु तासु विकृतिषु अंगानामतिदेशः कर्तव्यः। अतएव च अपेक्षित सर्वांगोपेतदर्शपूर्णमास यागौ प्रकृतिरिति उच्यते ।

दर्शपूर्णमासयोश्चत्वार ऋत्विजः भवन्ति तदपेक्षिता आग्नीध्रः, अध्वर्युब्रह्मा इत्यादयः ।

१- द० आप० श्रौ० सू० परिभाषा प्रकरणम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विधिक्रमः:-

प्राधान्येन ऋत्विग्वरणम् यथोक्तं गोत्रकुलानुसारम् । अग्निहोत्रं हुत्वा ब्रह्माणं वृणीते ओमिन्द्रं भूपते भुवनपते महतो भूतस्यापते ब्रह्माणं त्वा वृणीमहे इति । ... चन्द्रिकायां तु सर्वेषां आचार्याणां मतानि सम्यक् परिशिलितानि कृत्वा वरणं लौकिकं अर्थात् पूजा मात्रमित्येके, ... । ततश्चान्वाधानादि कर्म ।

यजमानोऽध्वर्युर्वेति विकल्पवचनात् उभयोर्मध्ये एकेन सम्पादनमिति गम्यते । अध्वर्युर्यजमानो वेति वचनात् । ततश्चान्वाधानं पचनम् । यद्यपि दर्शपूर्णमास यागे वरणप्रभृत्युत्तरांगेषु बहवो पदार्था अपेक्षिताः भवन्ति तथापि विस्तर भयात्संक्षेपेणैव कथ्यते ।

पौर्णमास्यां प्रातरग्न्युद्धरणम् । अन्वाधानम् । ब्रह्मवरणम् । प्रणीताप्रणयनम् । परिस्तरणम् । पात्रासादनम् । शूर्पाग्निहोत्रहवण्योः प्रतपनम् । अग्निहोत्रहवण्याम् शकटाद् वा पात्र्यां वा हविर्ग्रहणादिकम् । पवित्रकरणम् । पात्रहविःप्रोक्षणम् । हविषः फलीकरणम् । हविषः पेषणम् । कपालोपधानम् । उपसर्जनीनां हविषश्चाधिश्रयणम् । वेद्यां स्फ्योद्धननम् वेदि निर्माणम् । स्रुक्- स्रुवादि ध्रुवादीनां संमार्गः । पत्नी सन्नहनं, इध्माबर्हिषां प्रोक्षणम् । प्रस्तरग्रहणम् । वेदिस्तरणम् । परिधि परिधानम् । इध्माधारधानम् । विधृत्योः स्थापनम् । स्रुचादीनां वेद्यां स्थापनादिकम् । पञ्चदश सामिधेन्यनुवचनम् । अग्नि संमार्गः । आघारौ । पञ्च प्रयाजाः । आज्यभागौ । प्रधानयागः । स्विष्टकृत् । प्राशित्रावदानम् । इडावदानम् । अन्वाहार्य दक्षिणा । त्रयोऽनुयाजाः । सूक्तम् । सूक्तवाकः । शंयुवाकः । पत्नीसंयाजाः । दक्षिणाग्निहोमः । बर्हिर्होमः । प्रणीता विमोकादि । विष्णुक्रमादि । यजमान- व्रतविसर्गः, ब्राह्मण तर्पणञ्चेति ।

इमौ दर्शपूर्णमासौ यावज्जीवमनुष्ठेयौ , तावत्कर्तुमशक्तश्चेत्त्रिंशद्वर्षाणि

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुर्यादिष्टिम् । दाक्षायण याजिनस्तु पञ्चदशवर्षाणि दाक्षायण- यज्ञः कर्तव्यः। दाक्षायण- यज्ञो नामैकस्मिन्नयागे त्रिरनुष्ठेयौ यागविशेषौ, दर्शपौर्णमास एव पुनः विकृतिभूतौ न कर्मान्तरम् ।

तेन दाक्षायण यागानुष्ठाने पञ्च दर्शपूर्णमासयोर्द्विःक्रिया ।

अथाग्न्याधेयम्

अग्नेः , आधानं (प्रतिष्ठापनं) अग्न्याधेयं (अग्न्याधानं) इत्युच्यते । अग्निरेव सर्वेषां कर्मणां अनुष्ठानाधारम् । नानाविधानां यज्ञानां फलं तेनैव जनाः प्राप्नुवन्ति उक्तं च गीतायां-

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिः ततोऽन्नं ततः प्रजाः ॥

एवं च ब्राह्मणे-

अग्निर्वै सर्वा देवता

निरुक्तेऽपि-

अग्निः अग्रणीर्भवति। इत्यादिभिः शास्त्र वचनैः अग्नेर्महत्त्वं यज्ञेषु मुख्यं दृश्यते , एतदर्थं अग्न्याधानं (अग्निस्थापनं) या कर्म सर्व प्राधान्येन श्रौत-स्मार्त - कर्मसु सामान्येन क्रियते ।

अस्याग्नेः स्थापनानन्तरमेवान्येष्टयागादि क्रियाऽनुष्ठीयते । यागस्वरूप- प्रतिपादने अग्निः मुख्योऽस्ति । यज्ञस्वरूपं मुख्यरूपेण त्रयः पदार्थाः अपेक्षिताः सन्ति यथा-

(१) द्रव्यं = हविरादि । (२) देवता = इन्द्रादयः । ३- त्यागः = देवोद्देश्येनाग्नौ हविषः प्रक्षेपः ।

CC-O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अन्वाधान — काल:-

अत्र अन्वाधान कालविचार प्रसंगे - आचार्याणां अनेकानि मतानि सन्ति। तत्र कात्यायन मते तु-

(१) वसन्ते ब्राह्मणोऽग्नीनादधीत ।

(२) ग्रीष्मे राजन्य: ।

(३) वर्षासु वैश्य: ।

अत्र वर्णानुसारमेव अन्वाधान- समय: श्रौतसूत्रेषूपदिष्टोऽस्ति । एतदतिरिक्तं कामनानुसारं काल: निरूपित: यथा- पौर्णमास्यां च तथा कृत्तिकासु वा रोहिण्यां वा मृगशिर:सि वा पूर्वासु फल्गुनीषु वा ब्रह्मकामस्य ब्राह्मणस्य हस्तनक्षत्रे वा क्षत्रियस्य सोमकामस्य चित्रानक्षत्रे वा वसन्तर्तौ निष्कामस्य श्री कामीनां सर्वेषामपि वर्षासु ~~ब्रह्म~~- प्रजाकामस्य पशुकामस्य च त्रैवर्णिकस्य वैश्यस्य निष्कामस्यापि रथकारस्य च । यदहरेवैनं श्रद्धोपनमेत्तदहरादधीतेति कुमर्यता श्रद्धोत्पत्तौ तदैवाधानम् नात्र कस्यापि कालस्य नियम इति ।

आधानसम्बन्ध-

पौर्णमास्यां तु पूर्वस्मिन्पर्वणि सोष्टिकान्वारंभणीं निरूप्य श्वोभूते पौर्णमासेन यजत इति ।अमावास्यायामाधाने अमावास्यायामुपक्रम: प्रतिपदिमन्थानादारब्धन्त्यात् । अथवा तस्मिन्नेव दिने ऽन्वारम्भणीया पौर्णमासार्थमुद्धरणान्यन्वाधानानुक्रमश्च प्रतिपदि पौर्णमासयाग: ।

अतो क्रमेण प्रायश्चित्तादिक्रियां कृत्वा मातृकार्चनं कुर्यात्तो स्वस्ति- वाचनम् । ततश्चाशी: मंगलाचरणादय: । अरण्योराधानम् । ततश्च यथाशास्त्रं विधिना अग्नि: मन्थनम् । स्थापनं पुनः न्य ॥ गार्हपत्य, आहवनीय, दक्षिणा- ग्नि सभ्याग्नि, चतुष्टय- सम्पादकं तत्तदायतनेषु मंत्रपूर: तदग्निनां स्थापनम् । अनेनैवाधानेन श्रौताग्ने: सिद्धि: भवति ।

१- कु० का० श्रौ०सू०टी० पृ० ३५४-५५ ४।७।२२।

२ का० ,, ,, ,, मूलसिद्धा ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अन्वाधानेऽधिकारिण:

जातपुत्रो कृष्णकेशोऽग्नीनादधीत इत्यादिश्रुत्या पञ्चविंशत्युत्तरं चत्वा-रिंशद् वर्षान्त: पूर्वं सपत्नीकेन पुत्रजेष्ठानुष्ठेयम् । ततो वानप्रस्थधारणा-त् । यदि केनचित्कारणेन मध्ये विच्छेदस्तदा पुनराधान विधिना पुनरग्निं समाध्याय तदवधिपूर्णमायुष्य: पूर्ववदनुष्ठेया:। अग्न्याधाने पितरि जीवति तस्याधिकाराभावात् तस्यैव पुत्रस्याधिकार: ।अन्यथा परिवित्ति परिवेत्तृ दोष: पदि: स्यात् ।पितुरनन्तरं तु अधिकारि भवत्येव । तथाधिकारी भ्रातरि अग्निहोत्रनपरे तस्मिन्नेव विनेऽधिकारनियम:। अनन्तरं च प्रश्नो ऽपि ।

अतो अन्वाधान प्रकरणं सम्पूर्णं पुनराधेयप्रयुक्तमाचरति ।
पुनराधानं नाम कर्मोऽप्युच्यते

पुनराधानम्

पुनराधानं नाम अग्ने: नैमित्तिकमाधानम् । यदा पूर्वकृताऽन्वाधानानन्तरं संवत्सरावधीयेव यस्य यजमानस्य) यजमानस्य धार्मिकमिति च पुनराधेयं करोति ।

" पुनराधेयमाधानाप्रति ष्ठितस्य " । आधानेन लक्षणेन अप्रति-ष्ठितत्वज्ञापकमनुपायतो च आधाना प्रतिष्ठात इति भट्टभास्कराचार्य: । अन्वाधा-धानानन्तरमेव प्रतिष्ठारहितस्य च आधाना प्रतिष्ठात इति कर्क: । एवं श्रुति:-

यस्याधानमपार्थकं स्यात्सपुनरादधीतेति । तदा योऽग्नी आधाय सर्वाणि भोगानि च पुनरादधीतेति ।अतो अन्वाधान समनन्तरं संवत्सरावधावेव विघ्नाद्यैरग्निनाशेनाग्नौ अऽप्रतिष्ठितोऽप्रसिद्ध इव स्यात् अप्रतिष्ठ इव भवेत् तस्येदं दुष्टाग्न्युत्सर्गपूर्वकमदुष्टाग्न्युत्पादकं पुनराधेयकर्म भवतीति भाव: ।

तथा राज्यकामस्य, यशस्कामस्य वा पुनराधेयं भवति ।

विधि:-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विधिः-

पुनराधानानुष्ठानदिनात्पूर्वं त्रिरात्रं चतुरात्रंप्रभृति संवत्सरपर्यन्त-
मग्नीनामुत्सर्गः कर्तव्यः संवत्सरपराध्यमुत्सृष्टाग्निर्भवतीत्यापस्तम्बः ।
अथवा सर्वाऽग्नीनुत्सृज्य पुनराधेयं कर्तव्यम् । तत्र प्रक्रियायां किंचिद्भिन्नं
भवति ।अन्यत्सर्वं अग्न्याधानवत् । त्रीणि अग्न्यागारकरणम् । वपनम् अहतं
वासोपरिधानम् । गार्हपत्ये अग्ने स्थापनम् । यजमानप्रवेशः ।अरणीप्रदानम् ।
स्थापितस्याग्नेः उपशमनम् । मन्थनम् यजमानस्य। पञ्चभूसंस्कारान्तं कर्म
कृत्वा मन्थनादि कर्म । कुशीज्वलतोऽग्नेः स्थापनं, इध्म स्थापने कुशीनाकरणम् ।
सभ्यम् । मंथनादि स्थापनान्तंकर्म भवत्येव अन्यदग्न्यन्तरे होमान्तं सर्वमग्न्या-
धेयवत् । तत्र विशेषः-

(१) प्रवरणाभावः। (२) प्रजाः संमत्रकमामासनसंस्कार पूर्वकमुप-
वेशनम् । प्रतग्रहणं, प्रणीता प्रणयनम् । पात्रासादनम् । पञ्च कपालानि ,
दक्षिणार्थं हिरण्यादि अनड्वान् वा । अष्टादशेध्मकाष्ठानि ।ततश्च क्रमेण
स्विष्ट कृदादि प्राशित्रादिसर्वं भवति। याज्यापुरोनुवाक्यापाठश्च अनुयाजाः उच्चैः
अन्यत्सर्वमुपांशु: कूलवाकु च-

अग्न्याधेयस्य पक्षान्तरे पूर्वेद्यु अपराह्णमैत्रावरुणीं वशामालभ्या-
त्तस्मात्पूर्वं पुरोडाशान्तं कर्मकृत्वा रात्रौ पशु विशसनादि श्रपणान्तं कुर्यात् ।
प्रातर्हुत्वा पुनराज्यमादायारभ्य प्रवरणादि कार्पितान्ता कुर्यात् । ततः सर्वा -
ऽग्न्युत्सृज्य यथोक्तं पुनराधेयमिष्ट्यन्तं कुर्यात् । नात्र त्रिरात्रपरमुत्सर्गोनापूप
इति कर्मः । मैत्रावरुण्यानुवशायां विशेषः। निरूढपशुबद्दत्त्विग्वरणादि कार्पिकर्मान्ता।
मित्रा वरुणाभ्यां जुष्टम् नियुनज्मि, मित्रावरुणाभ्यां त्वा जुष्टं प्रोक्षामि ।
मित्रावरुणाभ्यामनुब्रूयाया वपायैमेदसो नुब्रूहि, मित्रावरुणाभ्यामनुब्रूया अथमेदः
प्रेष्य वपायायाज्यमानौ पशुपुरोडाशमार्गे मैत्रावरुणएकादश कपालः, मित्रावरुणा-
भ्यां पुरोडाशस्यानुब्रूहिमित्रावरुणाभ्या पुरोडाशं प्रेष्य हविषागे मित्रावरुणाभ्यामनुब्रूया
हविषो नुब्रूहि मित्रावरुणाभ्यामनुब्रूया हविः प्रेष्य मित्रावरुणयो वनस्पतेराज्यितम्
मित्रावरुणौ वनस्पतिस्तनपन्नुतिन्त्यति । शेषमनुक्तं निरूढवत् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पूर्वभागः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ प्रथमोऽध्यायः

।। मङ्गलाचरणम् ।।

श्री गुरुभ्यो नमः ।।

श्री गणाधिपतये नमः ।।

अविघ्नमस्तु ।।

स जयति–

कुंजरवदनो देवो यत् पादपंकजस्मरणात् ।
भास्करमणिरिव तमसां राशिं नाशयति विघ्नानाम् ।।
इष्टेर्दृष्टिरुपेति दृष्टयुपनयावन्नानि तेभ्यः प्रजा ।
स्तोम्यो यज्ञाङ्कुरः । पुनरिति प्रक्रान्तचक्र क्रमः ।।
कर्मानुष्ठानरीतिस्तार्थघटनावदाता यो जग-
ज्जन्मादौ मङ्गलत्वस्य पितुः श्रेयोऽपि यज्ञेश्वरः ।।
वेदविद्योर्मिनर्दिष्ट यो दात् कल्पाभिधां सुधाम् ।
विबुधेभ्यो नमस्तस्मै बोधायनमहर्षये ।।
बोधायनाय मुनये मुनिसंघाग्रगण्यये ।
कर्माम्बुधितितीर्षूणाम् कल्प नौकाकृते नमः ।।
नत्वा बोधायनं सूत्रभाष्याव्यवाश्रितम् ।
श्रौति बोधाचरणप्रमाणैस्तत्प्रपंचयम् ।।
नारायणान्वयाम्भोधिसुधांशुस्तत्तु संमतः ।
शिवंकराभिधो लोके बुधानामतसन्मेधी ।।
तत्पुत्रशिवेन याजकेन तदाज्ञया ।
बोधायनीकर्माणि विकल्पानुसारतः ।।
वैतानिकानां संस्थानांमनकानो मतानुगां ० क्रमात् ।।

तत्रादौ धर्मस्य प्रतिपाद्यत्वात्स्वरूप ज्ञानाय च प्रमाणं , को धर्मः ?

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कस्तदपि कार्यमिति च निरूप्यते । चोदना लक्षणो र्थो धर्मः इति जैमिनिः ।

विधिप्रमाणकः श्रेयःसाधनताकोऽर्थो धर्म इति पर्यवसितो र्थः ।

कर्मजन्यो[१] भ्युदयनिःश्रेयस हेतुरपूर्वाख्यः आत्म गुणो धर्म इति कणादः ।।

अभ्युदयः स्वर्ग- पशु- पुत्रादिः, निःश्रेयसं मोक्षः ।
उभयविधफलसाधनं धर्म इत्यर्थः ।

मनुरपि-

विद्वद्भिस्सेवितस्सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यं धर्मं व्यवस्यतीति ।।

आपस्तम्बश्च-

न धर्माधर्मौ[२] चरत आवं स्व[(क)] इति न देवगन्धर्वा न पितर इत्याचक्षते ।

यं धर्मं यमधर्मः यंत्वार्याः क्रियमाणं प्रशंसंति स धर्मो ।
यत्तु गर्हन्ते सो धर्मः ।।इति।।

आवमिति छान्दसं रूपं आवामित्यर्थः यदि धर्माधर्मौ विग्रहवन्तौ आवां स्व इति ब्रुवाणौ चरेतां यदि वा देवादयः प्रत्यक्षा नाचक्षीरन् धर्माधर्माविति तदोपलब्धिः स्यात् तत् तदभावात् । " शिष्टा यत् प्रशंसन्ति स धर्मः, यद्गर्हन्ते सो धर्म इत्यर्थः ।

शिष्ट लक्षणमाह बौधायनः:-

" शिष्टाः खलु विगतमत्सरा निरहंकारा कुम्भीधान्या अलोलुपा दम्भ-दर्प-

- -

१- आपस्तम्ब धर्म सू०(१) उज्ज्वलाख्यावृत्ति ।

२- (१) आप० धर्मसू० सप्तमपटल सू० संख्या ६ ।
प्रत्यक्षादेरगोचरौ धर्माधर्मौ । हरदत्तः ।।

(२) आप० धर्मसू० सप्तमपटल सू० सं०७ ।

(क) " चर्वि " इति सूत्रः । ३- बौ०धर्मसूत्र सं० ५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तेषां गीता- प्रोपनिषद्विता ॥इति ॥

" धर्मशास्त्ररथारूढा[१] वेदखड्गधरा द्विजाः।

क्रीडार्थमपि यद् ब्रूयुः स धर्मः परमो मतः॥"

इति च ।

अथ धर्मे प्रमाणम्-

तत्रापस्तम्बः:-

धर्मज्ञसमयः[२] प्रमाणं वेदाश्चेति ।धर्मज्ञा मन्वादयः। तेषां समयः व्यवस्था वेदाश्च स्वतः प्रमाणम् ।

मनुरपि-

" वेदोऽखिलो धर्ममूलं स्मृतिशीले[३] च तद्विदाम्।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति ॥"

अथ अथ धर्मे अधिकारिणः

तत्रापस्तम्बः:

[४] शूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणीति॥ शूद्रवर्जितानां त्रयाणां वर्णानामदुष्टकर्मणामुपनयनादयो धर्मा भवन्ति ।

कर्मादावपि तत्र सामान्यतया स्वाह-

" स्वकर्म ब्राह्मणस्याध्ययनमध्यापनं यज्ञो याजनं दानं, प्रतिग्रहणं दायाद्यं शिलोञ्छ इति ॥

१क बौ० धर्मसूत्र प्र०प्र० परिगणइ सू० सं० १४ ।

२- आप० धर्मसूत्र पटल(१) सूत्र सं० २-३ ।

३- मनुस्मृति २-६ ।

४- आपस्तम्बधर्मसूत्र पटल १, सू० सं० ६- वर्णधर्मः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मनुरपि-

" अध्यापनं चाध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चेति षट्कर्माणि द्विजन्मन:॥इति ॥

गौतमस्य-

द्विजातीनामध्ययनमिज्या दानमिति ।
ब्राह्मणस्याधिका: प्रवचन- याजन- प्रतिग्रहा:॥
पूर्वेषु नियम इति ।

पूर्वेषु अध्ययनेज्यादानेषु नियम: अवश्यकर्तव्यता।

कर्तव्यप्रवचनादिष्वनियम इति गम्यते ।

अथ धर्मस्यावश्यानुष्ठेयत्वम्

तथा तैत्तिरीये-

" जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवाँ जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्य:, प्रजया पितृभ्य: एष वा अनृणो य: पुत्री यज्वा ब्रह्मचारी वासीति॥

" कुर्वन्नेवेह[१] कर्माणि जिजीविषेच्छतं समा" ॥इति वाजसनेयके।

वसिष्ठस्य-

अवश्यं च ब्राह्मणोऽग्नीनादधीत, दर्शपूर्णमासाग्रयण चातुर्मास्यपशुसोमैश्च यजेतेति।

श्रुतिस्मृतिषु-

" इमं संस्कारमिति च, प्राचीनादि पुरस्कारं, धर्मोऽवश्यमनुष्ठेय" ॥इति ॥

१- शुक्लयजुर्वेद संहिता अध्याय ४० कण्डिका २ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

आह मनुः-

धर्मं शनैस्संचिनुयात् वल्मीकमिव वम्रिका ।
परलोके सहायार्थं सर्वभूतान्यपीडयन् ॥
नामुत्र सहायार्थं पिता माता च तिष्ठतः।
न पुत्र दारान्ज्ञातिर्धर्मस्तिष्ठति केवलः॥
एकः प्रजायते जन्तुरेक एव प्रलीयते ।
एको नु भुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ।
विमुखा बान्धवा यान्ति धर्मस्तमनु गच्छति ॥
तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाज्जनः।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥
धर्मं प्रधानं पुरुषं तपसा हतकल्मषम् ।
परलोकं नयत्याशु भास्वन्तं खशरीरिणम् ॥इति ॥

आपस्तम्बश्च-

सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखमिति ॥

ऐतरेये च-

एतद् यथा एतत् कर्मैतत् ब्रह्मैतत् सत्यं तस्मान्न प्रमाद्येत् तन्नातीयान्नैत्यत्या यन्ति पराबभूवुरिति कर्ममार्गः ।

ज्ञान कर्म प्रशंसा

ब्रह्मतत्त्वञ्च प्रशस्तः तस्मान्न प्रमाद्येतत् तन्न परित्यजेदित्यर्थः।

बृहदारण्यके च-

अथैतयोः पथोर्न्न अथ य एतौ[1] पन्थानौ न विदुस्ते कीटाः, पतंगाः, यादन्द -

---

१- बृहदारण्यकोपनिषद् ६० ३।० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृमिरिति । वेदाध्ययनरहिताभ्यां ज्ञानकर्मभ्यां परित्यक्तानां कीटादियोनिप्राप्ति-रित्यर्थः।

छान्दोग्ये च-

अथैतयोः पथोर्न कतरेण[१] च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति । जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति ।बृहदारण्यकव्याख्या।।

आथर्वणे -

यस्याग्निहोत्रम् अदर्शम् अपौर्णमासमनाग्रयणमतिथिवर्जितं(च) (क) वैश्व-देवमविधिना हुतमासप्तमा(त्) सह०नतमां समाप्तमां तस्य (सप्त) लोकान् हिनस्तीति

मन्त्रार्थ

शब्दार्थ:- अग्निहोत्र- आग्रयण- यज्ञ:।

अग्निहोत्रं सायंप्रातर्हूयमानाग्निहुतिविशिष्टं हुतं यज्ञानां प्रधानं सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्तीत्यग्निहोत्रस्य प्राधान्यमवगम्यते ।तस्मिन् सायं प्रातर्निर्वर्त्यमानेऽपि दर्शपूर्णमासादिसाहित्याभावे उक्तमनिष्टं । फलं भवती-त्यर्थः। अदर्शम् आग्नेयोऽष्टाकपाल ऐन्द्रं दध्यैन्द्रं पय इति । यागवर्जितं,मतान्तर उपांशु याग रहितं च। अपौर्णमासम् आग्नेयोपांशु याजाग्नीषोमीय यागत्रय वर्जितम्। अनाग्रयणं आग्रयणेष्टिरहितम्, अतिथिवर्जितं आतिथ्याख्यकर्मणा तद्वर्जितं सोम-यागरहितमित्यर्थः।

शीतप्रकरणात् हुतं (क) कस्मिंश्चित् काले यागस्याविना सोमवर्जितम् , (अ) वैश्वदेवचातुर्मास्यप्रभृति भूतवैश्वदेवं पर्व, तेन चातुर्मास्यानिवर्तयन्ती तद्रहितम्, काले अविधिनाहुतं विधिमनपेक्ष्य मंत्रदेवताविपर्यासेन वा हुतं यागफलमात् , त्रयः- पितृ-पितामह- प्रपितामहाः, त्रयः- पुत्र- पौत्र- प्रपौत्राः, आत्मा सप्तमः तान् सप्तलो-कान् भूरादींश्च हिनस्तीति ।। अन्वयव्यतिरेकाभ्यामिष्टानिष्टफलकत्वं यज्ञानामाह गीतायां भगवान्-

---

१- छान्दोग्योपनिषद् अध्याय ५ खण्ड १० श्लोक ८ ।

(क) * हुतमासप्तमान् इति मु.।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सहयज्ञाः प्रजाः सृष्ट्वा[१] पुरोवाच प्रजापतिः।

अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

देवान् भावयतानेन ते देवा भावयन्तु वः ।

परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

इष्टान्भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।

तैर्दत्तान प्रदायैभ्यो(यो) भुङ्क्ते स्तेन एव सः॥

यज्ञशिष्टाशिन सन्त ॥ ० ॥

ब्राह्मणोऽग्नीनादधीत , दर्शपूर्णमासाग्रयणचातुर्मास्यपशुभिश्च यजेतेति नैत्यिकं द्विजत्वसंस्कारमिति च ।

प्रजापतिः-

सर्वस्याधिकारिणाम् आहिताग्निर्धनी इति ।

आपद्यान्निर्धनोऽप्यग्नीन् प्रत्यवायभया(द्)द्विजः॥इति॥

हारीतः-

एता व्याहृतयस्तु: स्वधा, स्वाहा नमो वषट् ।

यस्यैते तैन्य नियता ब्रह्म लोकस्थ एव स।। इति

(आपद्यान्निर्धनोप्यग्निन् प्रत्यवाय भयाद्द्विज इति हारीतः)

एता व्याहृतयस्तु: स्वधा, स्वाहा नमो वषट् ।

यस्यैते वेश्मनि सदा ब्रह्मलोकस्थ एव स ॥

तस्मादग्नीऽवश्यमनुष्ठेयः।

अध्ययनम्

स्वाध्यायोऽध्येतव्य इति श्रुतिः, द्विजातिभिर्निष्कारणं षडङ्गो वेदो-

---

१- श्रीमद्भगवद्गीता अध्याय ३- श्लोक सं० १०-११-१२-१३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ध्येतव्यः वेदश्च । अर्थज्ञानपर्यन्तमध्ययनं विधीयते – अविदितार्थं विनियोगा
नुष्ठेयार्थप्रकाशनाय न समर्थं इति । तस्मात्प्रतिपन्नवेदार्थोऽनुष्ठानाभिल-
षितानि फलानि प्राप्नोति न प्रत्यवैतीति वेदोऽध्येतव्यः । तदर्थश्च प्रति-
पत्तव्यः <u>सरस्वती</u>[1] विजानतीति तथोच्यानुकरणोक्तो नियमः । नियमेन तपः-
शब्दवचना प्रातिकां वैयाकरणादीनि पदपठनाकरणं दोषमाह च एव-

यथा दारुमयो हस्ती यथा च(० इति ०)[2] मयो मृगः
[3]ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति ॥

<u>याज्ञवल्क्यश्च-</u>

यज्ञानां तपसां चैवं पुण्यानां चैव कर्मणाम् ।
वेद एव द्विजातीनां निःश्रेयसकरः परः ॥

योऽनधीत्य[4] द्विजो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

अविवाहैः क्रियालोपैः वेदानध्ययनेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥
मंत्रवन्ति समृद्धानि कुलान्यल्पधनान्यपि ।
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः ॥
यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

<u>श्रुतौ च-</u>

स्थाणुरयं[5] भारहारः किलाभू-
दधीत्य वेदान्न विजानाति योऽर्थम् ।

१- सरस्वती । इति मूले ।
२- यथा चर्ममयो मृगः ।
मनुस्मृतौ यथा-° यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ।
३- पाठभेदः:- यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति ।
मनुस्मृति २।१५७ । (ह०लि०पृ०५०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यो ऽर्थज्ञ इत् सकलं भद्रमश्नुते

नाकमेति ज्ञानविधूतपाप्मा ॥

अथ धर्म देशा:-

(क)
तत्र मनु:-

सरस्वती- दृषद्वत्यो र्देवनद्योर्यदन्तरम् ।

तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥

कुरुक्षेत्रं च मत्स्याश्च [६] पांचालाश्शूरसेनक: [७] ।

एष ब्रह्मर्षिदेशो(शो) वै ब्रह्मावर्तादनन्तर: ॥

मन्त्रकार: न्यून:।

एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।
स्वं स्वं चरित्रं शिक्षान्ते पृथिव्यां सर्वमानवा: ॥

हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि ।

प्रत्यगेव प्रयागाच्च मध्यदेश: प्रकीर्तित: ॥

विनाशनं = सरस्वत्या अन्तर्धानदेश:।

आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ।

तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधा: ॥

कृष्णसारस्तु चरति मृगो यत्र स्वभावत: ।

स ज्ञेयो याज्ञियो देशो म्लेच्छदेशस्तत: पर: ॥

एतान् द्विजातयो देशान् संश्रयेरन् प्रयत्नत: ॥इति ॥

४- निरुक्त प्रथम अध्याय (छज्जूराम), पृ०२३ ।

५- मारवार: इति पाठभेद:।

(क) मनु० २-१७-१९ । - २०-२१-२४ ।

६- पंचाल इति पाठ: क्वचित्।

८ ७- 'शिक्षेरन्' इति पाठ:।   ९- मनुस्मृति अ०२-२२-२३-२४ श्लोका।

७. ८- शूद्र सेनका ' इति मूल:।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

याज्ञवल्क्यस्तु-

यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधेति ॥

आपस्तम्बस्तु-

प्रभूतैधोदके ग्रामे यत्रात्माधीनं प्रयमणं तत्र वासो धर्म्यो ब्राह्मणस्येति प्रयमणं प्रावल्यं मूत्र- पुरीष- शौचादि।

गौतमस्तु-

प्रभूतैधोदकं यवसमित्कुशमाल्योपनिष्क्रमणमार्यजनाकुलमनलसं समृद्धमार्यजन-भूयिष्ठमदस्युप्रवेश्यं ग्राममावसितुं यतेत ॥इति ॥

अथ निषिद्ध देशाः:-

तत्राह मनुः-

"नाधार्मिके वसेद्ग्रामे न व्याधिबहुले भृशम् ।[१]
नैकः प्रपद्येताध्वानं न चिरं पर्वते वसेत् ॥
न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते ।
न पाषण्डगणाक्रान्ते नोपसृष्टेऽन्त्यजैर्नृभिः ॥

उपसृष्टे = उपद्रुते ।

बौधायनस्तु-

"अवन्तयो(ग) मगधास्तु राष्ट्रादक्षिणापथाः।
उपावृत्सिन्धुसौवीरा एते संकीर्णयोनयः॥"

दक्षिणापथः = मध्यप्रदेशः।

१-मनुस्मृति ४-६० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

" सिन्धु- सौवीर- सौराष्ट्रांस्तथा प्रत्यन्त वासिनः।
अंग- वंग- कलिंगांश्च गत्वा संस्कारमर्हति ॥"

संस्कारः पुनः संस्कारः ।

आरट्टान् , कारस्करान् , पुण्ड्रान् , सौवीरान्, कलिंगान् प्रानूनानि (नि)ति च गत्वा पुनस्तोमेन यजेत ।

सर्वपृष्ठया च ।

अथाप्युदाहरन्ति-

" पद्भ्यां स कुरुते पापं यः कलिंगान्प्रपद्यते ।
ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविरिति ॥"

" अथाधिकारिविशेषणानां समर्थकानि वचनानि-

<u>मनुः-</u>

धर्मेणाधिगतो यैस्तु वेदः स परिबृंहणः।
तच्च पुण्यवतानामग्न्याधेयमिहोच्यते ॥

अथाग्न्याधेयप्रशस्ताध्ययनजनितकर्मविपाकः।

<u>याज्ञवल्क्यः-</u>

" त्रैवर्षाधिकान्नो[१] यस्य तु सोमं पिबेद्द्विजः।
प्राक्सौमिकाः क्रियाः कुर्याद् यस्यान्नं (वा) कृषिकं भवेत्॥"

<u>मनुश्च-</u>

यस्य त्रैवार्षिकं धान्यं पर्याप्तं भृत्य वृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥

१- त्रैवार्षिकाधिकान्नः इति पाठभेदः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः ।
न त्वल्प दक्षिणैर्यज्ञैर्यजेताथ कथंचन ॥
इन्द्रियाणि , यशः स्वर्गमायुः कीर्तिं प्रजान्पशून् ।
हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत् ॥ इति ॥

<u>व्यासश्च-</u>

अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तथर्त्विजः ।
आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥

एतानि वचनानि काम्ययागाधिकारपराणि नित्येष्वावश्यकेषु तु नैतादृशस्याप्यधिकारः ।

<u>तथाह मण्डनः-</u>

कुटुम्बभरणायालमन्नं यस्य त्रिवार्षिकम् ।
काम्येन सोमयागेन यजेच्चासौ न चेतरः ॥

<u>दक्षिणादाने विवेकम्</u>

तावदन्नविहीनोऽपि कुर्यान्नित्यं तु सोमिकम् ।
यथालब्धगुणैर्वा यथासंभव दक्षिणाम् ॥इति॥

<u>बौधायनश्च-</u>

" अथातोऽनु क्रतून् व्याख्यास्यामः " इत्युपक्रम्य क्रत्वादीनामनुक्रमणमुक्त्वाह- दक्षिणानां काले गोहिरण्यं वासस्तेनाप्यलाभे फलानां मूलानां भक्षाणां वचनान्तरेव न यजेत् ।

नित्यान्नित्येषु कल्पाद्येष्वावश्यकेषु च ।
यस्य नित्यानि लुप्तानि तथैवागन्तुकानि च ॥
निःस्वो न च स्वर्गं गच्छेत् पतितो हि सः ॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

(टि० क्रम० सं०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

तस्मान्मूलैः फलैर्वापि मधुनाथ रसेन वा ।
नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेत् ॥इति ॥

यस्य वैदस्य वेदी च विच्छिद्येते त्रिपूरुषात् ।
स दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिरिति ॥

मनुरपि-

पाकयज्ञा हविर्यज्ञास्सोमयज्ञाश्च ते त्रयः।
स्थिता मूलेन, कोशेन, प्रमादेन, लोपितीति ॥

निर्धनस्यापि यागानाह स एव-

पर्वस्वेव[3] हि शोभेतास्यात्तु अग्निहोत्रपरायणः।
इष्टीः पर्वायणान्तीयाः केवला निर्वपेत्सदैति ॥
पर्व चायनं च पर्वायणौ, तयोरन्तः पर्वायणान्तः, तत्र भवाः पर्वायणान्तीयाः, दर्शपूर्णमासाग्रयणा- पशु- सोम- लक्षणाः।

केवलाः फलरहिताः। स एव वनाहिताग्नि तान्तैयमित्यनाहिता-ग्निकालीयमित्यनाहिताग्नित्वमुपाकमाह।

अथ वैदिक कर्म प्रशंसा

व्यासश्च-

यो वैदिकमनादृत्य कर्म स्मार्तमिहासिकम् ।
मोहात्समाचरन् विप्रो न स पुण्येन युज्यते ॥

१- मनुस्मृति अध्याय -११-४० ।
२-
३- मनुस्मृति अध्याय ४ श्लोक सं० १० ।
४- " पर्वायनान्ति" इति पाठभेदो पि ।
५- " पर्वायने ,, ,, ,, ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रधानं वैदिकं कर्म गुणभूतमथेतरत् ।

गुणनिष्ठाः प्रधानन्तु त्यक्त्वा गच्छन्त्यधोगतिम् ॥
पतिते निष्कृतिर्दृष्टा क्रियाहीनेन निष्कृतिः ।
तस्मात्सर्वप्रयत्नेन क्रियायुक्तो भवेन्नरः ॥इति ॥
सर्वप्रयत्नेन गौणेनापि साधनेनेत्यर्थः ।

<u>याज्ञवल्क्यश्च-</u>

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छतीति ॥

अतो गौणेनाप्यधिकारिणा स्वल्पैरपि द्रव्यैः स्वल्पाभिरपि दक्षिणाभिर्नित्यानि नैमित्तिकानि च वैदिकानि कर्माण्यनुष्ठेयान्येव ।

अत्र सामान्यतो यज्ञार्थं शूद्रप्रतिग्रहं निषेधति ।

<u>मनुः-</u> १

न यज्ञार्थं धनं शूद्राद् विप्रो भिक्षेत कर्हिचित् ॥
यजमानो हि भिक्षित्वा चाण्डालः प्रेत्य जायते इति ॥

न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत ।

तेषां सततमज्ञानां वृषलाग्न्युपसेविनाम् ।
पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत् ॥

ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ।
ऋत्विजस्ते(स्तु) तु शूद्राणां ब्रह्मवादिषु गर्हिता ॥इति ॥

१- मनुस्मृति अध्याय ११-२४ ।
२- ,, ,, ४२-४३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

याज्ञवल्क्यस्य-[1]

चांडाली चायते यज्ञकरणाच्छूनिदितादिति ।

व्यासस्य-

कुटुम्बार्थं तु सच्छूद्रात् प्रतिग्राह्यमयाचितम् ।
कृत्यमात्मनस्तैव न हि याचेत कर्हिचिदिति ॥

एतानि शूद्रप्रतिग्रहनिषेधकवचनानि नित्यनैमित्तिकेतरविषयाणि ।

तथाह मण्डन:-

निर्धनो धनमाधेयं नित्येष्वधिकृतो यदि ।
जीर्यन्निन्थ: कुमार्गैरपीष्टार्थं धनमार्जयेत् ॥

चांडालात् प्रतिगृह्यापि फलेनापस्यंभरी: ॥इति ॥

स्मृ(त्य)र्थसारे[2] -

सर्वथा प्रथमस्त्वभ्यागः कार्यो द्विजातिभि:।
यथा संभवितांगेन[2] क्र कृत्वा दत्त्वापि दक्षिणाम् ॥

प्रात्य- शूद्रैरात्याविमजवीणापकासंथे ॥इति ॥

बोधायनस्य-

सनीतरात् प्रतिगृह्णीत्यन्यत्राग्निहोत्राभ्यामिति । बोधायन:।
अन्यत्राग्निहोत्रादिति शालीकि:।

सर्वात् याजित्वा इत्यापमन्यव:। इति॥

दाक्षिण्याच्छूद्रायामश्रु:, क्रूरो वा । शूद्र: प्रसिद्ध:। अन्यत्राग्निहोत्रादिति द्वितीय:।

१- याज्ञवल्क्य स्मृति, पृ०१२७(बीस स्मृतियाँ)। २- यथासंभवितांगेन ?

CC-O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

क्रतावनुजानाति, क्रतुसिद्धौ सर्वान् याचेतेति सूचितः।

यदि द्रव्याभावादेव क्रतुर्न सिध्यति "। यं कंचन याचेतेति "अधिकारस्याब्राह्मणस्य कैवलं द्रव्यालाभेन यागासिद्धावपीत्याह-

मनुः-

यागश्चेत्[1] प्रतिरुद्धः स्यादेकेनाङ्गेन यज्वनः।
ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ॥
यो वैश्यः स्याद् बहुपशु(र्ही)नक्रतुरसोमपः।
कुटुंबात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ॥इति ॥

बहु पशुः बहुधनः। यागश्चेद् भवेदिति शेषः। धार्मिके सतीति तादृश एवैतदनुजानाति भावः।

क्रतौ नित्ये(त्ये) अपेक्षितं क्रतावपि प्रतिग्राह्यमिति सिद्धम् ।

अत्र नियमाभियुक्तेन "स्वाध्यायोऽध्येतव्यः" इत्युक्तम् ।

तपो[2] विशेषैर्विविधैर्व्रतैश्च विधिचोदितैः।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो , द्विजन्मनेति ॥"

नियमातिक्रमदोषः

आपस्तम्बस्त्वाह-

नियमेषु तपश्शब्दस्तदतिक्रमे विद्याकर्म निःस्रवति ब्रह्म , सहापत्यादेतस्मात्स्वर्ग(ग्य) त्कर्मणायुष्यश्चेति । अस्यार्थः-" आचार्याधीनः स्या" दित्यादयो नियमाः तेषु, अस्मिन् ब्रह्मचारिप्रकरणे निर्दिष्टाः , तपश्शब्दोऽप्रयुक्तः

१-" यज्ञश्चेत्प्रतिरुद्धः" राजनि" इतिपाठः मनुस्मृति ११।११-१२ ।
२- मनुस्मृति अध्याय २।१६५।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तेषामन्नियमानामतिक्रमे, विद्याकर्मविद्याग्रहणं ब्रह्म निस्सारयति , गृहीतं चैवं निस्सारयति, कुतः ? एतस्मात् नियमातिक्रमेणाध्येतुः पुरुषात् । न केवलादेतस्मात् । किन्तु सहापत्यात् ।

अपत्येन[2] सह वर्तत इति सहापत्यः , वोपसर्जनस्येति सहस्य सः । भावी रूपमित्यन्तु अपत्यादपि ब्रह्म निस्सारयति । यद्यप्यपत्यान्नियमातिक्रम- कारि न भवति तथापि पितृदोषादेव ततोऽपि ब्रह्म निस्सारयति ब्रह्मसा- दिषु कर्मसु क्रियमाणान्यकिंचित्करं भवतीत्ययमर्थो विवक्षितः <u>कृष्टव्यः[3]</u>।

कृतेः सकर्मकस्य प्रयोगो भाष्ये दृष्टः। कृन्तति <u>कुन्दकोषकं[4]</u> विशृणोति गम्यत इति । न केवलमकिंचित्करं नियमातिक्रमेण विद्याग्रहणं प्रत्युतानर्थकारीत्याह- कर्तपत्यमनायुष्यं चेति कर्त इति नरकाभिधानं, तेन नरको लक्ष्यते । पतत्यनेनेति पत्यम् । एवं - एवंभूतं विद्याग्रहणं नरकपात हेतुर्भवति । अनायुष्यकरं चेति एवं चेदिदानीं नियमाध्ययनाभावात् कथम् एतादृशैर्विशिष्टानुष्ठानमिति चेत् सत्यम् , अत ये तावत् यथाविहितनियमा न तु तिष्ठतोऽधीयते तेषां तैर्मन्त्रैः कर्मानुष्ठाने नाल्पदोषः। तथा स एवाह- तस्मादृषयोऽवरेषु[5] न जायन्ते नियमातिक्रमात् श्रुतर्षयस्तु भवन्ति , केचित् कर्मफलशेषेण पुनस्सम्भवे यथा श्वेतकेतुः।।इति ।। अस्यार्थः- अत एवावरेषु कलियुगवर्तिषु पुरुषेषु ऋषयो न जायन्ते मंत्रदृशो न भवन्ति । नियमाति- क्रमस्येदानीम् अवर्जनीयत्वात् । युगान्तरेऽपि <u>केवलमंत्रद्रष्टारः</u> श्रूयन्ते न सर्वेऽपि किमुतेदानीं कलावित्ति भावः ।

१- तदतिक्रमे विद्याकर्म निस्स्रवतीति नियमातिक्रमेण विद्याग्रहणं न कर्तव्यम् । कुतः यतो निस्सारयति ब्रह्म निस्सारयतीत्यर्थः ।आप० ध० सू० २-२।

२- आप० धर्मसू० हरदत्त व्याख्या २-१ ।

३- पतन्निवनर्थकम् ।

४- कुण्डकोति पाठः । महाभाष्य ० ।

५- आप० धर्मसू० खण्ड २-५।४,५,६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

व्यासः-

युगे[1] युगे च ये धर्मा तत्र (तत्र) च ये द्विजाः।
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ॥इति ॥

अन्यथा साकल्येन कस्यापि नियमानुष्ठानासंभवेनाध्ययनमात्रलोपापत्तिः स्यात् । अतः ये तु यथा शक्ति कांश्चिन्नियमाननुतिष्ठन्तोऽधीयते तेषामपि न तैस्तैः कर्मानधिकारः । अपितु नियमलोपे प्रायश्चित्तं पुरुषापराधत्वाद्य-निष्ठुर्नुष्ठेयम् । तथाध्ययननियमलोपे प्रायश्चित्तमाह स एव-

आपस्तम्बः:-

मिथ्याधीतप्रायश्चित्तं[2] संवत्सरमाचार्याधीनो वर्तमानो वाचं यच्छेत् स्वाध्याय एवोत्सृजमानो वाचमाचार्य आचार्यदारे भिक्षाचर्ये च एवमन्ये-ष्वपि दोषवत्सु स्वपतनीयेषूत्तराणि यानि वक्ष्यामः।

कामन्युभ्यां वा जुहुयात् ' कामोऽकार्षीन्मन्युरकार्षीदिति ' जपेत्, पर्वणि वा तिलभक्ष्य: उपोष्य वा श्वोभूत उदकमुपस्पृश्य सावित्रीं प्राणा-यामशः सहस्रकृत्व आवर्तयेत्प्राणायामशो वा ।

श्रावण्यां[3] पौर्णमास्यां तिलभक्ष उपोष्य वा श्वोभूते महानदीमुदकमुपस्पृश्य सावित्र्या समिद्भिः सहस्रमादध्याज्जपेद्वेष्टिसहस्रं वा पवित्रार्थानादरेदिति ।

अत एवाभियुक्तैः संध्योपासन काले कामोऽकार्षीदिति जपो नित्यवदाम्नातो नियमातिक्रमस्यावर्जनीयत्वादिति ।

श्रावण्यां पौर्णमास्यां तिलभक्ष इत्याद्यनुष्ठातारस्तु दृश्यन्ते । एवं पात्र

- -

१- स्मृति संग्रह पृ० ६२८-२३' केचित्तेषं' इति पाठभेदो पि भवितुमर्हति ।

२-आप०धर्म० १-२६।१०-११ ।

३- तत्रैव १-२७-२।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कर्माणि गुणभूता मंत्राः तेषां चाध्ययने(प्रधान) मूलान्नियमाः। न हि तद्विकल्पभयात् स्वाध्यायोऽध्येतव्य इति द्विजातीनां विधिविहितं चाग्निहोत्रादीनामनुष्ठानं त्यक्तुमुचितं तस्मान्न प्रधानलोपो युक्तः। यथैव विद्या करोतीति तत्फलातिशयमनुसन्धेयम्। एवम् उक्तरीत्या गौणैरप्यधिकारिभिर्द्विजातिभिर्वैदिका एव धर्मा अनुष्ठेयाः स्वधर्मत्वात् नावैदिकाः परधर्माः।

स्व धर्म परिपालनम्

तदुक्तम्- भगवता-

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥इति॥

बौधायनस्त्वाह-

स्वशास्त्रे विद्यमाने यः परशास्त्रेण वर्तते।
भ्रूणहत्या समं तस्य स्वशास्त्राणि भवन्त्युत॥इति॥
~~ब्राह्मणादिभिर्वर्णैर्ब्रह्मचर्यादिभिराश्रमैरनु~~

ब्राह्मणादिभिर्वर्णैर्ब्रह्मचर्यादिभिराश्रमैरनुष्ठेयत्वेन श्रुतिस्मृतिविहितं द्विजातीनां स्वशास्त्रम्, अन्यद्बौद्धमन्यशास्त्रं द्विजातिभ्योऽन्यमधिकृत्य प्रवृत्तम्, अथमन्यतः अयमन्यमानस्वेत्यर्थः अनुतिष्ठन्त इति यावत्। तस्य भ्रूणहत्या तुल्यं पातकं भवतीति। अथवा मुख्यकल्प(न)ाधिकारिणो मुख्य कल्प एव, स्वशास्त्रगौणकल्पः। परशास्त्रं गौणाधिकारिणं प्रतिप्रवृत्तं तथा च -

मनुः-

प्रभुः[१] प्रथमकल्पस्य योऽनुकल्पेन वर्तते।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलमिति॥

१- मनुस्मृति ३=११।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतो यथायोगं वैदिक एव धर्मोऽनुष्ठेय ,, इति स्थितम् ।

तथाह पराशरः-

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥इति ॥

मनुरप्याह-

वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ॥इति ॥

इत्युपोद्घातः ।

अथ प्रश्नानुक्रमः

ब्राह्मणानां बहुत्वाद्वैकैकस्याः शाखायामसमाप्तत्वाद्धर्मस्य च दुर्बोधत्वात् , सार्वजनीनत्वाच्च संहृत्य विवरणार्थं सूत्रं कृत्वा धर्माननुष्ठाय फलं सर्वे प्राप्नुयुरिति कल्प आरब्धः परमकारुणिकेनाचार्येण भगवता बौधायनेन ।

अथ जायमानाच्च कर्मेन्द्रियाद्धीत[1] जातपुत्रः कृष्णकेशोऽग्नीनादधीत[2]। क्रियां समाप्य दारं कृत्वाऽग्नीनाधायकर्मारंभते स सोमापराध्यानि यानि कुर्वीत ।

धर्मेणाधिगतो येषां वेदः सपरिबृंहणः ।

- -

१- कर्मण्यादधीत इति पुस्त पा १ ।
२- बौ० धर्मसू० ३-६ ।
३- वाप० धर्मसू० ८-२२।७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उभयमुभयथानायानामग्न्याधेयमितीष्यते । इत्यादिश्रुतिस्मृतिवचनैर्गर्भाधानादिसंस्कारसंस्कृतोऽधीत्य वेदान् न्यायतः कुमारः न्यायार्जितधनश्च वैतानिकेषु गार्ह्येषु च कर्मस्वधिक्रियते । तानि च कर्माणि नानाविधानि पाकयज्ञ[1]हविर्यज्ञसोमयज्ञसंस्थैकाहीनाहर्गण सांवत्सरिकसत्रादिरूपाणि । एषु च पाकयज्ञादिसंस्था भेदानाचार्याः कल्पन्ते कियत्यः पाकयज्ञसंस्थाः ? [2]
कियत्यो हविर्यज्ञ[3]संस्थाः ? ।
कियत्यः सोम संस्था[4] ? इति ।

१- चत्वारः पाकयज्ञाः हुतोऽहुतः प्रहुतः प्राशित इति पा० गृ० सू० १ क० तत्र हुतः होमं मात्रं यथा सायं प्रातर्होमः । प्रहुतः होमबलिहरणं कर्म । प्राशितः यत्र प्राशनमात्रं न होमो न बलिः । यथा सर्वासां गवां पयसि पायसश्रपणानन्तरं ब्राह्मणभोजनमित्थं चतुर्विधम् । द्र० पा० गृ०सू० क० भाष्य । क० ४।

२- औपासनहोमः, वैश्वदेवम्, पार्वणम् अष्टका, मासिश्राद्धम् , श्रवणा, शूलगवम्, इति सप्त पाकयज्ञसंस्थाः ।

३- <u>हविर्यज्ञसंस्थाः:-</u>

अग्न्याधेयम्, दर्शपूर्णमासौ आग्रयणम् , चातुर्मास्यानि ,निरूढपशुबन्धः, सौत्रामणी, पिण्डपितृयज्ञादि ,दर्विहोमा इति सप्त हविर्यज्ञसंस्थाः ।

४- <u>सोमसंस्थाः:-</u>

अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्यामः, इति सप्त सोमसंस्थाः ।

- द्र० कात्या० श्रौ०सू० -(यज्ञतत्त्वप्रकाश) प० प्रथम

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

हुतः प्रहुत आहुतः शूलगवो बलिहरणं प्रत्यवरोहणम्, अष्टकाहोम इति सप्त पाकयज्ञसंस्थाः। हुतादि शब्दार्थमाह। हुतो हुतादीन्युपक्रम्य, ता अनु-व्याख्यास्यामस्तत्र यदुक्तं, स, हुतो यदेतदग्निहोत्रमन्त्राग्न्ययनं जुहोति। तत्र हि हुत एवाय यदुत्वा दीयते स प्रहुतो यदेतद्ब्राह्मणभोजनं बलिं जुहोति। तत्र हि हुतमाहुत्वा दाप्यते। यच्छूलगवेन यज्ञानि अयन्ति स शूलगवो, यद् गृह्याभ्योऽन्नं संप्रकीरति[१] तद् बलिहरणम्, अथ यद् प्रहुता प्रत्यवरोहन्ति तत्प्रत्यवरोहणम्। अथ यदिकाष्टकायामन्नं हूयते सोऽष्टका होम इति॥ अप-रिमिता उ हैके हुतं यज्ञ क्रियमाणान्यत्र[२] विचाराद्भूते पञ्चैताः पाकयज्ञ-संस्थाः।

अथ हविर्यज्ञसंस्थाः:-

अग्न्याधेयमग्निहोत्रं। दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि दाक्षा-यणयज्ञः कौण्डपायिनामयनमिति सप्तैके जुहुते।

अथ सोमसंस्थाः:-

अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः, षोडशी, वाजपेयोऽतिरात्रो-ऽप्तोर्याम इति॥

१- संप्रकिरति इति कुत्रचित्।

२- कर्मस्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही।
दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु॥ इति

याज्ञवल्क्यादिस्मृतिवचनाच्च शान्तिकपौष्टिकादि कर्माणि अपि शालाग्ना-वनुष्ठानविधानेन विनाप्यनेन आवसथ्याग्नेः स्मार्तत्वात् बहिर्भावे लौकिकत्वा-पत्त्या अपि: शालायां विहितानि कर्माणि सीमन्तादीनि लौकिकाग्नावेव अनुतिष्ठन्ति शिष्टाः। अतः पाकयज्ञाः ये गृह्यसंस्कारास्ते सर्वे गृह्येऽग्नौ क्रियन्ते। अन्यत्रापि - पुं- संस्कारास्तेषां संस्कारक शान्तिक पौष्टिकादि च लौकिकाग्नावेति।

१०- कात्या० श्रौ० सू० भूमिका
(स्मार्तेऽग्नौ कर्तव्य कर्म)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कौण्डपायिनस्य इति – कुण्डपायिनामयने मासं दर्शपूर्णमासाभ्यामित्यादीनि कानिचित् सोमविधित्वात् कामयत्वाच्च दर्विहोमत्वं न स्यादित्यत आह सर्वेषामपीति ।

अन्वाधेयादीनि[1] षट् प्रसिद्धानि । यत्सोमोऽग्निष्टोमस्तोत्रेण समाप्यते सोऽग्निष्टोमः[2] । अग्निष्टोमस्यान्ते षोडशिनाधिकोऽत्यग्नि-

---

१– ज्ञातव्याख्यानमन्वाधेयम् 'अन्वाधेयमिति कर्मणो नामधेयम् । तच्च समुदायस्य। तेन व्यस्तावग्न्याधीयते उत्पाद्यते निष्पाद्यते । न मन्थनमात्रं स्थापनमात्रं वा । आधानीय शब्दो हि संस्कारनिमित्तः न जातिनिमित्तो योगनिमित्तो वा । तेनु तत्तु उभयत्राग्निदर्शनात् । अतश्च यावान् कश्चिद् दृष्टार्थोऽदृष्टार्थो वा तत्संस्कारायाम्नायते स सर्वोऽन्वाधेये उपपाद्यः ।

का० श्रौ० सू० ४-७- सू० १

कर्कभाष्य।

२– अग्निष्टोमः इति साम्नः संज्ञा। सामवेदे 'यज्ञा यज्ञा वो अग्नये' इत्यस्यां गेयत्वेन निबद्धं साम 'अग्निष्टोम' इति उच्यते । एतदेवात्र प्रायन्तिकं साम यत्र न ततः सामान्तरमस्ति इति अनेन समाप्यमानत्वादयमेकक्रतुरग्निष्टोमसंस्थाकोऽग्निष्टोम इत्युच्यते । संस्थाशब्दश्च समाप्तिवाची। सोमयागस्य येन साम्ना समाप्तिः तन्नाम्ना व्यवहारः भूरि बहुधा दृष्टः यथा उक्थ्यः, षोडशीत्यादि ।

द्र० कात्या०, श्रौसू० भूमिका (संस्थाभेदनिरूपणम्)।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ष्टोमः । यस्मिन्यागे उक्थ्य स्तोत्रेण समाप्यते स उक्थ्यः । उक्थ्यात् परं षोडशिना समाप्यते स षोडशी । वाजपेयोऽग्निष्टोमप्रकरणः , स पेयोऽस्मिन् याग इति वाजपेयः। यस्मिन्यागो रात्रिमतीत्य समाप्यते सोऽतिरात्रः । आप्तोर्यामः प्रागुक्तोऽतिरात्र एव आग्नेयैन्द्रवैश्वदेव - वैष्णवाद्यश्चतुष्टोमाधिकः। एवंविधास्सप्तसोमसंस्थाः। क्व पाकयज्ञाः , गृह्य एवाभिरूपिता आचार्येण - हुतः, प्रहुतः इत्यादिना । एकविंशतिसंख्याकृतयज्ञसंस्थास्य नित्याः कामाश्च ।तथा हि वाक्यमोनौ वै[1] ब्राह्मणस्त्रिभिर्ऋणवा जायते ,ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यृणसंस्तवात् । अन्याधेयप्रभृत्यग्नेयान्यबालाणि[2] भवन्ति। यथैतदन्याधेय-मग्निहोत्रं दर्शपूर्णमासावाग्रयणमुदगयनदक्षिणायनयोः पशुश्चातुर्मास्यान्यृतुमुखे षड्ढोता वसंते ज्योतिष्टोम इत्येवं क्षेमप्रापणमित्यापस्तम्बवचनाच्च । यज्ञाणि पुनः पुनरनुष्ठेयानि , तत एव नित्यानि । क्षेमप्रापणात्[3], अलौकिक श्रेयःसाधनमित्यर्थः। पुनरन्याधेयग्रहणात् अधिकारसमर्पकत्वेऽपि पुरुषार्थत्वमप्यस्तीति ज्ञापनार्थम् । अन्या-धेयादयेनाग्न्यो लभ्यन्ते । तेषाम् यज्ञत्वं संततत्वम् । ते याः तान् यज्ञानुसंख्य[4] वैधिकं स्तोत्र यज्ञसंख्यामिति।वसिष्ठवचनाच्च ।

वसिष्ठवचनाच्च

[5] यत्रौ वा एष्टौ[6] शतं: पतरु: प्रवृत्यते यज्ञाग्निकार्ये तं संततमुपरोऽर्थाय वाज्यते तं काले काल [illegible](यं) यजते । धर्मार्थेऽर्थाये प्रवृत्यते यद्गुणदत्तु यात-व्याहिताग्निना पशुना यष्टव्यं भवति। संततोऽतियातस्य[7] पशुना संवत्सरो नातियात्।

- -

१- बौ०धर्मसू० २,४,११,३६, बौ०धर्मसू० स्मृति २,६।

२- बौ० धर्मसू० २,४,५,२३।

३- " प्रापणात् " इत्यपि पाठभेद: ।

४- नकुन्स । इति पाठभेद: ।

५- वाह्यते । इति पाठभेद: ।

६- जायते यजते । इति पाठभेद: ।

७- नीवानस्य" इति पाठ: ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

यावज्जीवं प्रयुञ्जीतैव चातुर्मास्यानि स्युः । वसन्ते वसन्ते ज्योतिष्टोमेन यजेतेति पुनर्दर्शाऽवसाभिप्रायो भवतीत्यभ्यासविधानाच्च। प्रकरणं प्रत्यवाय प्रकरणाच्च ।

तथा चाथर्वणे :-

यस्याग्निहोत्रं(म) दर्शपूर्णमासमनाग्रयणमतिथिवर्जितं चाहुतं(म) वैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान् हिनस्तीति । अग्निहोत्रं सायं-प्रातर्होमेण निष्कृतिः स्विष्टकृतं यज्ञक्रतूनां प्रायणमित्यादिश्रुतिभिरग्निहोत्रस्य प्राधान्यमवगम्यते ।तस्मिन्सायं प्रातर्नित्यमानेऽपि दर्शपूर्णमासत्वाद्यभावे उक्तमनिष्टं फलं भवतीत्यर्थः। अदर्शं दर्शयाग वर्जितम् ।एवमपूर्णमासमिति। अनाग्रयणम(म) आग्रयणेष्टि रहितम् , अतिथिवर्जितम् आतिथ्यमस्य कर्मणा यस्य क्रियमाणस्यासौऽतिथिः, तद्वर्जितं सम्मान रहितमित्यर्थः ।

अतिप्रकरणात् अहुतं कस्मिंश्चित् काले आलस्यादिना अहुतमेव । अविश्वदेवम्, चातुर्मास्यप्रभृतिपर्व । तेन चातुर्मास्यानि लक्ष्यन्ते तद्वर्जितम् ।

मनुरपि-

नानिष्ट्वा[1] नवसस्येष्ट्या पशुना चाग्निमान्द्विजः ।
नान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः ।।

नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः ।
प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्धिनः ।। इति

अविधिना हुतं विधिमनपेक्ष्य हुतं आसप्तमान् इमः पितृ- पितामह- प्रपितामहाः

- -

१- मनुस्मृति अ०४-२७-२८। इतो व्रात्यः स एव व्रात्य इति पूजनाभिधानम् ।
बौधा० धर्मसू० ३,७-२-१३।
वर्णसंकरादुत्पन्नान्व्रात्यानाहुर्मनीषिणः।।इति । बौधा०धर्मसू०१-९-१५।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

न्य: पुत्र, पौत्र,प्रपौत्रा:, व्रात्या सप्तम: एतान्[1] सप्तलोकान् भूतान्(३)
यस्य पिता पितामह इति सोमं न पिबेत् स व्रात्य इति च श्रुत्यन्तरात्
तथाऽग्न्याधेयादीनामकरणे सप्तवर्षे तंतुमती याज्यादि वैश्वानरी सप्तवर्षा-
ग्निष्टुदादि प्रायश्चित्त विधानाच्च नित्यानि ।

अग्निहोत्रं जुहुयात् स्वर्गकामो, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत,
ब्राह्मणा(ना)न्नाद्यकामो यजेत, सर्वान् लोकान् पशुबन्धयाज्याभिर्जयति,
अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति, स्वर्गकामो ज्योतिष्टोमेन यजेत ।

काम्यानि सर्वफलानि सर्वाभिप्रायाणि भवन्ति यथैतदन्याधेयमग्निहोत्रं
दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्धा इति। तदपि विज्ञायते यदस्याग्निहोत्राति
सर्वं तेन कामदुघो कामा यदस्याग्निहोत्रं जुहोति सर्वं तेनैत्यैवेदमुक्तं भवति ।
कामदुघ[2] इति सर्वफलाभिप्रायम् । एषा वै - वैश्वदेवस्य मात्रा , एतद्वा एतेषा-
मंशुम (ता) तौ वा उत्तराणि श्रेयांसि भवन्तीति ।

एतानि गद्यपि सर्वफलसाधनानीत्यर्थः । सर्वफलत्वे सर्वफलत्वेनोक्तौ भवत्यर्थ: ।
काम्यंत इति कामा: फलानि[3] । सर्वाभिप्रायाणि सर्वफलानीत्यर्थ: । यथाने
कृत्तिकास्वग्निमादधीत[4], स मुख्यो ब्रह्मवर्चसी भवतीत्यंगफलाभिप्रायम् । वाधान्तांस्त्वा-
ग्न्याध्यवर्णफलाभिप्रायं वा । वचनादाधानस्य प्राधान्येन वा सर्वफलत्वम् ।

- -

१- व्रतं सावित्र्य: स एव व्रात्य इति पुनरभिधानम् । आप० ध० सू०३,७-२-१३।
वर्णसंकरादुत्पन्नान्व्रात्यानाहुर्मनीषिण: । इति बौ० धसू० १-९-१५।
२- मंशुमतौ वा इति पाठ: ।
३- ' फलयुक्तानि कर्माणि (का०श्रौ०सू०१,२) फलस्य साधनानीत्यर्थ: । कुत
एतद्, वाक्याद् । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, अग्निहोत्रं जुहुयात् स्वर्गकाम: ।
अत: स्वर्गं साध्यो यागश्च साधनत्वेन विधीयते ।
४-' कृत्तिकास्वग्नोऽस्यादधीत' । एता वाऽअग्नि नक्षत्रं यत् कृत्तिकास्तद्वै सलोम
योऽग्नीनक्षत्रेऽग्नीऽन्यादधाति तस्मात्कृत्तिकास्वादधीत ॥१॥ श० ब्रा० १-१-२-७।१८।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतएव सर्वकामोऽग्नीनाधास्य इत्यग्न्याधेये, इत्युपव्याकरणोपपत्तिरेव एवं फलश्रवणात् । काम्यानि च एकैकस्मै वै कामाय सर्वे यज्ञक्रतव आलभ्यन्ते सर्वेभ्यः कामेभ्यः पशुरालभ्यत इति वचनाच्च । काम्यत्वेऽपि न नित्यत्वहानिः, नित्यानामेव सतां फलश्रवणात् । यथा क्रत्वादौ क्रतुकामं काम्येषु यज्ञांगादौ यज्ञांगज्ञानमितिनिरपेक्षाविधिश्रवणात् । सर्वकामोऽग्नीनाधास्य इत्याद्युपव्याकरणादेव सर्वफलसंकल्पः कार्य इति याज्ञिकाः । न नियमेन फलकामना । अपि च यस्य फलेच्छा तस्यैव । अफलार्थिनस्तु अपाकृतदायार्थीन्नित्यानामनुष्ठानम्, न फलकामना । दिन एव तीर्थे स्नात्वा[1]ऽहतेत्याक्तं वासः परिधाय शुक्लं चैव शुचिः पूर्णाभिर्व्या विधाय्या ब्रह्मचारी[2] प्रत्यक् आचम्य[3] कुर्यात् कर्माणि भि क्षमाणोऽ प्रत्यक्माणि पूज्या यजेत् । प्राङ्मुखः[4] प्रदक्षिणं यज्ञोपवीतिवैश्वानि कर्माणि[5] करोति ।

- -

१- स्नात्वोषितेऽक्षतमिति शुद्धं वा ।

२- तत्कारिप्रत्यय इति शुद्ध वा ।

३- चतुर्थ्यामपर रात्रे गृहेऽग्निमुपसमाधाय दक्षिणतः ब्राह्मणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति *

- पा० गृ० सू० १-११ चतुर्थीकर्म ।

४- प्रक्षालित पाणिपादौ गार्हपत्यस्य पश्चादुपविश्य, दक्षिणतो यज्ञोपवीत्याचम्य यजमानं प्राणानायम्य कुशेषु दर्भे देश काली संकीर्त्य ।

* प्राङ्मुखत्वं स्नानाचमनाभ्यां संबध्यते । द्र० कात्यायनेष्टिदीप० यज्ञोपवीतं तावदाचमनार्थतया न विधेयं स्मृतिप्राप्तत्वात् * स्नातानां स्नानाचमन यज्ञोपवीतादीनां अति कर्मांगत्वानामस्मिन्नानाक्ते प्राप्तिप्रदर्शनार्थ मिदम् ।

५- प्रागग्रदर्भान्कुशपवनाग्रेषु वा यज्ञोपवीती प्रदक्षिणादीनि कर्माणि करोति।

उक्त द्र० ८० पूर्णमासप्रकरण सूत्र १५, पेज ८८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दक्षिणाग्रः प्राचार्यं च प्राचीनावीती पित्र्याणि , तिष्ठन्नासीनः प्रह्वो यथा न्यायम् । उत्तर उपचारो विहारस्तथापवर्गो[1] विपरीतं पित्र्येषु । पत्नीवतं[2] प्रत्यालभ्येरनुपस्पृश्यसिंचेत्पवपल्पूलीयं[3] छेदन- भेदन- खनन- निरसना(नि) पित्र्यान्तः रौद्र- राक्षसाभिचरणीयेषु ।

(क)

कर्मवता यजुषैनाध्यायान्यपि परिस्तरणीयान्तराणि यज्ञाङ्गानि वा[4] हविष्यः, पत्नीयजमानावृ(व)त्विग्भ्योऽन्तरतमौ, तयोर्यजमानस्ताभ्यां यज्ञाङ्गानि तानि तेभ्यः याज्यमाज्यहवींषि हविभ्यः पशुः पशोस्सोमः सोमादग्न्यादौ , यथार्थ ऋत्विजो न विहारादपि पर्यावर्तेरन् । प्राङ्मुखाश्च दक्षिणामंसमभि पर्यावर्तेरन्[5] ,प्रत्यङ्-मुखाः सव्यमन्तरेण चात्वालोत्करौ यज्ञस्य तीर्थम् । अचात्वाल आहवनीयोत्करौ।

- -

१- उत्तर उपचारो विहारः । का० श्रौ० सू० पेज ८४। द०पू० प्र०

उपचारोऽध्वर्युप्रभृतीनां संचारो यस्य स उत्तर उपचारः कर्तव्य इति कर्कः।

अनिर्दिष्ट देशाः क्रिया उत्तरतोऽपरतो विहारस्य कार्या इति स्कन्दः ।

२- " पात्नीवतम् " इति पाठः ।

३- रौद्र राक्षसनैऋ॑त पैतृक च्छेदन, भेदन निरसनात्माभिमर्शनानि च कृत्वाऽप उपस्पृशेत् । (दर्शपूर्णमासप्रकाश:) ।रुद्रप्रधानं कर्म रौद्रम् । रक्षः प्रधानं कर्म राक्षसम् ।निर्ऋति प्रधानं कर्म नैरृतम् । तथैव पैतृकम् । एतान्विकर्माणि छेदनादीनि च कृत्वाऽपामालम्भ कार्यः पश्चात्स्वात्मनोऽपि बोधायनोऽपामुपस्पर्शनम् । इति कर्क० भाष्यम् ।

भरद्वाजोपदिष्ट खनन परिलेखनादिकमपस्पर्शनम् नेच्छ । इति स्कन्दः ।

(क) दर्शपूर्णमास प्रकाश पृ० ८६ (ख०) ।

४- " वा " इति पाठः ।

५- पर्यावर्ते ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

ततः अपरेण यजमानः पत्नी च प्रपद्येरन्, विसंस्थिते संस्थिते च संचरनिष्क्रमणे
नाग्नीनियात् प्रपन्नं विच्छिन्नं काष्ठं समिधं वाभ्याधायाग्रेणाहवनीयं प्राव्रज-
मानौ प्रपद्येते जघनेनाहवनीयमित्यर्थे, दक्षिणेनाहवनीयं प्रायतनं तत्परेण
यजमानस्याग्रेणाहवनीयं प्रणीतानां, वेदेः उत्तरां श्रोणिमुत्तरेण संचरन्कर
माग्नीध्रस्य जघनेन गार्हपत्यं पत्न्याः स्तेषां काले[1] काल एव कर्मानुष्ठानात्[2]क्वापि विक-
ल्पकल्पनाभावेन भयत्यावश्यनार्थः । यथाकारि प्रत्ययः यथाकारिभिन्नोभाविभिः सर्वैकमत्यं
द्रव्य- देवता- संस्था- स्वरूपं । यावत्कुर्यादिति क्रियमाणादारभ्या यावत्
(ए)
कुर्यात्व्यवस्थानम् । यथा पाणि संमर्शनकाले परिस्तरणं पात्रा[3]सादनं प्रतिपदेन-
मिति विसंस्थिते असमाप्ते कर्मणि संचरः प्रवेशे निष्क्रमणे निर्गमश्च संस्थिते[4]
समाप्ते कर्मणि पश्चादित्यर्थः ।

१- आहवनीयस्य पुरस्तात्प्रथमम् उदगग्रैः कुशैः स्तरित्वा, ततः दक्षिणतः
प्रागग्रैः स्तरित्वा, पश्चादुदगग्रैः स्तरित्वा उत्तरतः प्रागग्रैः स्तृणुयात् ।एवमेव
गार्हपत्यस्य परिस्तरणं कृत्वा दक्षिणाग्नेः परिस्तरणम् कार्यम् ।

२- "स्तृणात्येकस्याविकल्पनात्" इति पाठभेदः ।

(ए) "कुर्यात्" इत्यपि पाठभेदः संभवः ।

३- गार्हपत्यस्योत्तरतः प्राक्संस्थानि उदगग्राणि द्विशः स्थापयेत् ।

("द्विशः पात्राणि संसादयति" का०श्रौ०सू० २-३-१६)

(कातीयेष्टिदीपकः)

इति पाठस्यावश्यकेन कथना विधानात् सर्वेषां पात्राणां द्वन्द्वरूपेण स्थापनं
न तु शूर्पाग्निहोत्रहवण्यादीनामेव ।पात्र शब्दस्य साधन मात्रार्थकत्वे न तु भाजनविषयः।
तेन स्फ्यादीनामपि पात्रत्वमुपपद्यते । द्वन्द्वानि च प्राक्संस्थानि स्थापनीयानि
(कर्क भाष्य) द्र० का० दीपकोटि०(पृष्ठ ७) तथा शूर्पमग्निहोत्रहवणी चेत्येकं
द्वन्द्वम् । स्फ्यश्च,कपालानि चेति द्वितीयम् ।शम्या, कृष्णाजिनं चेति तृतीयम् ।
उलूखलंमुसलं चेति चतुर्थम् । दृषदुपले चेति पञ्चमम् ।

४- संस्थिते = समाप्ते । संस्थित शब्दः समाप्तार्थवाचकः । द्र०का०श्रौ० सू० ४-१३ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अन्याधेयिकविहार एवं विधानात्, इतरथ तस्माच्च्यावयानु[1] नान्वेत्यमिति समाम्नी प्रवेशनिर्णधात् । तथानधिमाय-धरीरानाज्यि[2]त्यैकं, यथाग्न्यगृहीता: स्युरित्यैकं, यावदेनमभिवर्षादित्यैतदपरमिति नानैरेथ संस्पर्शनं कर्तुं[3]ना वर्जये-ऊर्ध्वं ह्येषु रुक्णस्य नाम्नी मेध्यमवाची नमेध्यमिति श्रुति: ।

शुचिमध्वरं देवा जुषन्तो शुचि वर्मा हि पुरुषस्य तेनापमिवति ।

शुचि वो हव्य मरुत:, शुचीनाम् --- पावका इति ।

पवनावसं शुचित्वात् यत्किञ्चिद्याज्येयुक्तं स्यात् सर्वं तदद्भि-र्वारीभि: कुर्यात् ।

प्रक्षालितोपवातान्यक्लिष्टानि वासांसि पत्नीयजमानावृत्विज: परिदधीरन्नेतं प्रकारपूर्वं दीर्घसौमेषु सत्रेषु चैवं, यथा समाम्नातं च ,यथैत-मिवरणीयेऽभिष्टे पशुकामेषु लोहिताक्षीणा लोहितवाससश्चर्त्विज: प्रचरे-युरित्यवाससविचना संव्यावृ[4]णाकमामिति वाचने सौमिणि वासांसि, तेनाप-रार्थे कार्पासिकान्याणिणीनि वा भवन्ति ।

अथर्त्विजो यजमान: पत्नी च तीर्थेन[5] विहारं प्रविशन्ति।

अथ यजमानो जघनेन गार्हपत्यात् - प्राक्कूलान्दर्भान् संस्तीर्य तेषु

१- " तस्माच्च्यावयानु " इति पाठ: ।

२- नानैरेध: इति पाठान्तरं वा ।

३- " सहुणा " इति वा ।

४- " दाणिमाणि " इति शुद्धं वा ।

५- " विहाराभिमुखो यजमानं कुर्यात् ," इति भूरते । द्र० का०श्रौ०सू० कर्क भा० " एतत्तीर्थमित्याचक्षते " - १।२।१।१६ नारायणी वृत्ति चाप० श्रौ०सू० एतन्मानं तीर्थमित्याचक्षते । उत्करादावेऽपि तथैतत्तीर्थं संज्ञक एव वैशक्षणार्थत्वादुत्करा-दीनां ग्रहणमेतत् अतोऽग्नि सोमादौष्वपि तेनैव पथा प्रचरणं सिद्धं भवति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्राङ्मुखः[1] उपविश्य स्वस्य दक्षिणतः पत्नीमुपावेश्य[2] दक्षिणस्यात्मन उत्तरतः प्राङ्मुखानुपावेश्य प्राणानायम्य यज्ञात्मानमीश्वरं[3] पुरुषं, विष्णुं ध्यात्वा, यत्र क उ खलु यज्ञ इति पुरुष इति ।

कार्यं, यज्ञः कर्म नाम तत्र न सन्देहः । पुरुष इति विष्णुः । यतो पुरुषो वै यज्ञो,[4(क)] "यज्ञो वै विष्णुः",[4(ख)] "पुरुष एवेदं सर्वमिति" भाष्यम् । यज्ञात्मा कर्मादौ पुरुषो ध्येय इति भावः । एवं ध्यात्वा जपति- यः पुरस्ताद् यज्ञमाने- "देवागातु[5] विदो- ०-प्रयुज्यताम्" इति "अग्नी(ए)व ऐ सत्येन त्वा ह्वयामि" इति च ।

अथ जप एवं ब्रह्मासनमित्युच्यते ।

- -

१- आहवनीयस्य पश्चात् समीपे प्रागभिमुखमिति । का०दी०पृ० ३।

२- "सा वै न पश्चात् प्राची देवानां यज्ञमन्वासीतेयं पृथिव्युपविशेत्: देवानां पत्नी सा पश्चात्प्राची देवानां यज्ञमन्वास्ते तदेनामन्वारोहेत् सा सा पत्नी किंचिदुः लोकमियादधि पत्नी ज्यायो जीवति तस्यास्तदेतन्नि- ह्नुते तथोऽहिंसनीयं न हिनस्ति, तस्माद्दक्षिणतऽएवैव न्वासीत् ।

श० प० ब्रा० का० १ अ० ३, ब्रा० १ ,सं० २१।६

३- द्र० कातीयेष्टि दीपकः , पृ० १ ।

४(क) - श प० ब्रा० का० १, अ०१, ब्रा०४, खण्ड-१३।

४(ख) - पुरुषेन यज्ञो यदेनं पुरुषस्तनुतेऽएष वै तायमानो यावानेव- पुरुषस्तावान् विधीयते तस्मात् पुरुषो यज्ञः ।

- श० ब्रा० का० १, अ०३, ब्रा०- २, खण्ड- ७।१

५. देवागातुविदो गातुं यज्ञाय विन्दत मनसस्पतिना देवेन वाताद्यज्ञः प्रयुज्यतामिति ।
द्र० द० पू० प्र० पृ० - ४

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ आकूत्यावेदनम्

~~आकल्प्य० हृदये निविष्टमिति~~

आकूत्यावेदनं करोति – आकूत्यै त्वा कामाय त्वा० हृदये निविष्टमिति।
आकूतिर्मानसस्संकल्पः। आवेदनं तस्य प्रकाशनमंजपः। श्रीपरमेश्वरप्रीत्यर्थं पौर्णमासेन हविषा यक्ष्ये ,अनु निर्वाणि न मिथुनेन सह। इति मन्सा त्रिः संकल्पयते ,त्रिरुच्चैः। ऋत्विक्समीपस्थ ब्रूयात् " तन्म ऋध्यतां तन्मे समृध्यतां, तन्मे सम्पद्यतां कामः ,इति।

अथर्त्विजां प्रतिवचनम्

तद् ऋध्यतां तदे समृद्ध्यतां तत्सम्पद्यतां काम इति यो यथा इति यजमान आह। स्वयमेवोपव्याहरणमित्युच्यते। प्रारिप्सितस्य कर्मण आरंभे समीपे वचनमुपव्याहरणम्।

अमावास्यायां[7] अमावास्येन हविषा यक्ष्य इति विशेषः। या: पुर-

5-(ख) श० ब्रा० का०१, अ०१,ब्रा०४, खण्ड १३।
6-देवागातुविदो गातुं यज्ञाय विन्दत मनसस्पतिना देवेन वाताद्यज्ञः प्रयुज्यतामिति।
द्र० दर्शपूर्णमास प्रकाश पृ०४।
7-" अमावास्यायाममावास्यया यजेत" द्र० श० आप०प०सू० १६। (दर्शपूर्णमासप्रकाश)।

सूर्याचन्द्रमसौ: सहवासो यस्मिन्काले सकालो अमावास्या" इति (हलधः)। अमावास्ययेति तृतीयानिर्देशः कर्मवचनः, यथा" आग्नेयोऽष्टाकपालः" "ऐन्द्राग्नएकादशकपालः" इत्येवमादीऽनि दर्शितानीत्येतैः कर्मभिरमावास्यायां काले यजेत् ।अमावास्ययेति तृतीयानिर्देशात् करणभूतयागः साङ्गोऽमावास्यायां कालेविधीयते। इति कपर्दी।

पौर्णमास्यां पौर्णमास्या- द्र० दर्शपूर्णमासप्रकाशः पृ० ६२।

पौर्णमास्यामिति ~~ककक~~ सप्तम्या काल निर्देशः। यस्मिन्काले चन्द्रादित्ययो: परो विप्रकर्षः तस्मिंश्चन्द्रमा: पूर्णो स कालः पौर्णमासी। पौर्णमास्येति तृतीया

(शे०टि० अ० पृ० ५०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्यादित्यादि समानम् । आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणोभव-तीत्यारंभे आचार्य वचनात् एवं संकल्पमाहु:-

दर्शपूर्णमास- संकल्पविचार:-

सत्याचार्येणोपव्याकरण सूत्रे " स्वर्गकामो दर्शपूर्णमासाभ्यां यक्ष्य " इति दर्शपूर्णमासयोरिति प्रतिपद्योक्तेः पौर्णमास्यां दर्शपूर्णमासाभ्यां यक्ष्य इति संकल्प्य पुनः पूर्णमासेन यक्ष्य इति संकल्पयेत् । दर्शे दर्शेन यक्ष्य इति । एवं सर्वदर्शपूर्णमासेषु । अथवा न समान्यसंकल्पः। पौर्णमास्यां पूर्णमासेन यक्ष्य इति संकल्पः। दर्शे दर्शेन यक्ष्य इति । एवं उपव्याकरणोक्तो युक्तः संकल्प इति प्रतीयते ।

य

अथ कर्मादौ द्रव्यदेवता ज्ञानानुसन्धानार्थं देवताप्रक्रम:

पौर्णमासं हवि:[८]- आग्नेयोऽष्टाकपाल: पुरोडाश:, प्राजापत्यं वैष्णवं वा ।

- -

निर्देश: । " आग्नेयोऽष्टाकपाल:" ऐन्द्राग्न एकादशकपाल: " इत्येवमादिभि-र्निर्दिष्टानि पौर्णमासीनामकानि । पञ्चदश्या: प्रतिपच्च पूर्णमास योगात् (पौर्णमासी) तल्लक्षण योगात्पञ्चदशी प्रतिपच्च पौर्णमासी। तदाऽऽरम्भात्मक-पौर्णमास्यां " पौर्णमास्या यजेत् " इति साङ्गापौर्णमास्यनुष्ठेया विधीयते ।

८- आग्नेयोऽष्टाकपालोऽग्नीषोमीय एकादश कपाल, उपांशुयाजश्च पौर्णमास्यां प्रधानानि। द्र० दर्शपूर्णमासप्रकाश पृ०६६।

उपांशुकाम्यदेवता:-

दर्शपूर्णमास प्रकरणे एव काम्य , आग्नेय आम्नात:। " यथा" यत् कामो ह वा एतेन यज्ञेन यजते - सोऽस्मै काम: समृद्ध्यत" इति । तच्च प्रकृत्योपांशु: विधानम् । " उपांशु तस्यै देवतायै यजति यस्या हविष्टं निर्वपति ।काम्ये कर्मणि देवतानामुपांशुत्वं भवति । देवताग्रहणं न कर्तव्यम् । चरण शब्दे सर्व देवताऽन्यत्र " इत्युक्तत्वादुपांशुत्वस्य । एवञ्चैतदव्यक्तचोदना देवतास्वेवोपांशुत्वं नाव्यक्तासु सोम विकारेष्विति देवता ग्रहणम् । अतामव्यां तर्हि व्यक्तत्वादुपांशुत्वमस्तु ।

(वैदि० [illegible])

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उपांशुयाजमध्यदेशादि(पि) कल्पा वदयन्ती । तेनाप्यन्यतमं वा ।
'[९] अग्निषोमीय एकादशकपाल: पुरोडाश: । अनुनिर्वाप्यो व ऐन्द्रो विमृध एकादश
कपाल: पुरोडाश: । पञ्चदश[१०] सामिधेन्य: । पञ्च[११] प्रयाजा:।

- -

ऐन्द्र नैतदेवम् । तन्त्र भेदस्तु तत्र । एक तंत्रे चोपांशुत्वमित्याचार्याभिप्राय:।
यैन्द्र यागाधिकयोरुपांशुत्वं विधातीष्टिषु एवञ्च राजसूयेऽप्यनुत्पादिषु
नैवोपांशुत्वं तंत्र भेदात् ।

प्रजाकाम वैश्वदेवे तद्भवतु उपांशुत्वं व्यक्तत्वादेक तंत्रत्वाच्चाविनैकत्वात्
काम्यत्वाच्च । तथा पञ्चविले नैतदेवम् । न हि तत्र काम्यतयैवोत्पत्ति:। तेन
यत्र व्यक्तत्वं चाविनैकत्वं चैकतन्त्र्यं च कामार्थं चोत्पत्तिस्तत्रैवोपांशुत्वम् । यथा
मित्रविन्दायाम् -

व्यक्तत्वे चाविनैकत्वे तंत्रैक्यं यत्र कामना ।
तादर्थ्येन चोत्पत्तिस्तत्रैवस्यादुपांशुता ॥१॥
आग्रयणे वैश्वदेव:' उपांशुभवति ॥२॥
एककपालश्चावारुणा' वरुण वर्जम् ॥३॥

प्राजापत्य: उपांशुभवति। तस्माद्यत्किञ्च प्राजापत्यं यज्ञे क्रियत उपांश्वेव
तत्क्रियते' इति वचनात् । कु०का० श्रौ०सू० ब०४-२०५ सू० ५-११।

९-' सर्वैकादशाग्नीषोमीयस्य' कु० का० श्रौ० सू०२,४,३५(कर्मवृत्ति)।

१०-' इन्धे वा एतदवु:। इध्मेनाग्निं तस्मादिध्मो नाम समिन्धे सामिधेनी-
भिर्होता तस्मात्सामिधेन्यो नाम ।'

' ता पञ्चदश सामिधेन्य: सम्पद्यन्ते । पञ्चदशो वै वज्रो वीर्यमेवै
तत्सामिधेनीरभिसंपादयति । कु०श०ब्रा०१-३-५-७-७।

११-' ऋतवो ह वै प्रयाजा:। तस्मात्पञ्च भवन्ति । पञ्चर्तव:॥

स वै समिधो यजति , अथ तनूनपातं यजति , अथेडो यजति, अथ
बर्हिर्यजति , अथ स्वाहा यजति ।

कु० श० ब्रा० १-५-३-१२ -२३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अग्निश्च सोमश्[1]चाज्यभागदेवते । अग्नि: प्रजापतिर्विष्णुर्वा अग्निषोमौ-ऐन्द्री वैमृध इति प्रधान देवता: । अग्नि[2]: स्विष्टकृत् त्रयोऽनुयाजा:, सूक्तवाक- शंयुवाकौ, चत्वार: पत्नीसंयाजा:, देवा आज्यपाश्च । एतादेवता: यष्टव्या:। इति पौर्णमास्याम् ।

अमावास्या(यां)हवि:-

आग्नेयोऽष्टाक[3]पाल: पुरोडाश: , प्राजापत्यं वैष्णवं वा ध्रुवाज्यं, ऐन्द्राग्न[4] एकादशकपाल: पुरोडाशोऽसंनयत: । ऐन्द्रो माहेन्द्रो वैकाद[5]शकपाल: पुरोडाशो दधिपयसी च सन्न[6]यत:। पञ्चदेवता[7]भिधेन्य:, पञ्च प्रयाजा:। अग्निश्चसोमश्चाज्यभागदेवते ।

- -

१- स्वाहाकारेणैव एव सर्वं यज्ञं संस्थापयन्त्स्वाहाऽग्निमिति तदाग्नेयमाज्य-भागश्च संस्थापयन्त्स्वाहा सोममिति तत्सौम्यमाज्य भागं संस्थापयन्त्स्वाहाग्निमिति। यस्मै कस्मै च देवतायै हविर्निर्वपन्ति, तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति । अग्निषोमयोरेवाज्यभागावग्नीषोमौ उपांशु याजो ग्नीषोमयो पुरोडाशे । कृ०श० ब्रा० १ का० अ० ५, ब्रा०४, क०२४ -१०,१६-एवं २२-२५।

२- अग्निर्हि स्विष्टकृत् सऽएषाग्न्येतर्हि तथैव यज्ञ: सन्तिष्ठते यथैनं देवा: समस्थापयन् " स्विष्टकृत् एव तत्पुनराप्याययत्य यातयाम करोति । श०ब्रा० १-५-४-२४, १०-१६-२२-२५ ।

३- आग्नेयोऽष्टाकपाल: पुरोडाशो भवति ।" श०ब्रा०१-६-३-६-१२-५।

४- आग्नेयोऽष्टाकपाल: ऐन्द्राग्न एकादशकपालो द्वादश कपालो वाऽमावास्यायाम-सोम याजिन:।।(दर्शपूर्णमास प्रकाश: पृ०३२)

५-ऐन्द्री माहेन्द्री दधीपयसी, ऐन्द्रो माहेन्द्रोवैकादशकपाल: पुरोडाश:" इति पाठ: । वा ऐन्द्रो माहेन्द्रो वैकादश कपाल: पुरोडाश:, ऐन्द्री माहेन्द्री दधि पयसी च सन्नयत ।

६-" सन्नाय्यं त्विर्तीयं सोमयाजिन:"

सान्नाय्य शब्देन याग साधनभूते दधिपयसी उच्येते " इति कर्कीय: " इन्द्रस्य त्वं अध्नुण:" इत्यारभ्य " तत्सान्नाय्यस्य सान्नाय्यत्वम् " ।

(श०टी० अ०पृ०६०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दर्शपूर्णमासे देवतर्त्विगादिविचार:

८(क)

अग्नि: प्रजापतिर्विष्णुर्वा इन्द्राग्नी, इन्द्रो- महेन्द्रो वा इति प्रधान-देवता:। अग्नि: स्विष्टकृत्, इत्यादि एता देवता यष्टव्या इत्यन्तं समाम्नम् ।

८(ख)

दर्शपूर्णमासयोश्चत्वार ऋत्विज: अध्वर्युब्रह्मा होताऽग्नीध्र इति ।

अग्न्याधेय ऋत्विजां वरणं प्रथममुदाहराम इत्यस्मिन् सूत्रे, त एव सोमेभविष्यन्तीति। प्रतिप्रस्थात्राधवर्युगणप्रसंगात् ज्योतिष्टोमस्येति भाष्यादाधान सोमाभ्यामन्यत्र न भवत्यृत्विजामवरणमिति गम्यते ।कल्पांतरे च तथा प्रतीते:।" ब्रह्माणमादि गर् कुर्यादिति " परवाचो गोपालादिभिर्वचनान्यन्य वरण- मधुपर्कौ भवतो वा । सर्वत्र तान् कर्मण: कर्मणो वृणीते " इति सूत्राच्च । सर्वत्र प्रथमे प्रयोगे मंत्रवरण - मधुपर्कौ द्वितीयादौ प्रयोगे तूष्णीमित्यन्ये । मन्त्रवरणं लौकिकम् । घरणं पूजा-मात्रम् । द्वितीयादावित्यन्ये । अत्र एवमेव कल्पकारमतिरित्युक्तम् । आचारा-ल्लौकिकं वा वरणम् । भद्यामिष्ट्वा भध्वर्यु त्वां वृणे।

इत्यन्त: सान्नाय्य शब्द प्रवृत्तेर्थवाद:। तत्साध्यो यागो सान्नाय्य शब्देन लक्ष्यते । इति हरदत्ताचार्य:। द्र० दर्शपूर्णमास प्रकाश:(परिभाषासूत्र) ३३।

७-" पञ्चदश सामिधेन्यो दर्शपूर्णमासयो" (दर्शपूर्णमासप्रकाश: प०सू० २८)।

दर्शपूर्णमासयो: सामिधेन्योऽग्निसमिन्धनार्था ऋच:" त्रि: प्रथमामन्वाह त्रिरुत्तमाम् " इत्यभ्यस्ताभ्यां पञ्चदश: इति कपर्दी।

८-(क) " महेन्द्रायेति कुर्वन्तीन्द्रो वा एष पुरा वृत्रस्यवधादेव वृत्रं हत्वा यथा महाराजो विजिग्यानऽएवं महेन्द्रोऽभवत्तस्मान्महेन्द्रायेति । इन्द्रो वा एष पुरा वृत्रस्यवधादिन्द्रो वृत्रं अघ्निवांस्तस्मादिन्द्रायेत्येव कुर्यात् ।

द्र० श० ब्रा० १-६-४-१६-५-२१।

८-(ख) चत्वार ऋत्विज: । दर्शपूर्णमास प्रकाश: । प० सू० ५-२५।

९- वरणं नाम करिष्यमाण कर्मस्वरूप दक्षिणा द्रव्यतत्परिमाणश्रावणपूर्वकं स्वयमप्रवृत्तानां प्रवृत्त्यार्थिणा कर्तु वर्तुत्वेनाभ्यर्थना ।

द्र० का० श्रौ० सू० कर्क०७-१-७(टिप्पणी)।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवं [1] ब्रह्माणं त्वां वृणे होतारं त्वां वृणे , आग्नीध्रं त्वां वृणे, इति।
(क)
ते च याजयिष्यामीति प्रतिजानते । आर्त्विज्यं करिष्यन्नहमं वा प्रतिगरिष्य-न्नेतद्यजुर्जपति- इडा देवहूरिति श्रौपासनानुज्ञावचनात् । आर्त्विज्यं करिष्यन् जपति- इडादेवहू रिति श्रौपासनानुज्ञावचनात् । आर्त्विज्यं करिष्यन् जपति इडादेवहू० पितरो नु मदन्त्विति । अत्र सूत्रे क्वचिन्मन्त्रस्य समस्तपाठः, क्वचित्प्रतीकग्रहणमात्रमित्यपि , वैचित्र्यान्निरंकुशत्वात् सूत्रकारस्येति केचित् । अन्ये तु बहूनां शाखानामयं कल्पः। अन्यशाखापठितेषु प्रतीकग्रहणं क्वचित्-त्पठितेषु समस्तपाठ इति लिङ्गं चानेक शाखानामयं कल्प इत्यत्र विदध्यात्र येष्टी येन वदे वदेति । [2] प्रागन्वाधानादध्वर्युर्जपति -[3] देवागातुविदो गातुं यज्ञाय प्रयुज्यतामिति ।

१- ततो ब्रह्म वरणम् । विहारस्योत्तरत: उदङ्मुखोपविष्टं ब्रह्माणं सादतेन उत्तरीयेण दक्षिणहस्तेन ब्रह्मणो दक्षिणं जान्वालभ्य अमुकगोत्रामुक शर्मन् पौर्णमासेष्ट्या(दर्शेष्ट्या) हं यक्ष्ये, तत्र ॐ भूपते भुवनपते महतो भूतस्यपते ब्रह्माणं त्वा वृणीमहे । इत्यनेन मंत्रेण वृणीते।

ततो ब्रह्मा- ॐ अहं भूपतिरहं महतो भूतस्यपतिर्भूर्भुवः- स्वर्देवसवितरेतन्त्वा वृणते बृहस्पतिं ब्रह्माणं तदहंमनसे प्र ब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्ज-गत्यै, जगत्यनुष्टुभेऽनुष्टुप् प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्देवानां ब्रह्माऽहं मनुष्याणाम् । इति जपेत् । द्र० का०दी० ,पृ०४ ।

(क) गरिष्यन्नेतद्यजु इतिपाठः ।

२- ॐ अन्वाधानं नामाग्नौ काष्ठाधानं तच्च कर्माङ्गत्वेन मुख्याधिगुणा विशिष्टा-नामग्नीनां ग्रहणार्थं तद्द्वारेण देवतापरिग्रहार्थं च । द्र० दर्शपूर्णमास प्रकाश १-१-१

तत्र यजमानः षट् समिधो हस्ते गृहीत्वा, स्फ्यं च- हस्तेधृत्वाऽग्निमष्टाक-पालेन पुरोडाशेन , अग्निषोमावन्तराऽऽज्येन उपांशु , अग्नि अग्निषोमावेकादश कपालेन पुरोडाशेन यक्ष्येऽहंयक्ष्ये इति संकल्प्य, पञ्चवत्तो यज्ञः, प्रोक्षणीयार्थः, ममा-ग्नेयश्च: अपनयः , प्रयंकाले प्रतोपायनम् , अन्वाहार्यो दक्षिणा, ये केचन वैकल्पिक पदार्थास्ते , अस्मिन्नुत्तरयेन मयाऽवधारिता: इत्यवधार्य च ॐ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम। मह्यं नमन्तां प्रदिशश्चतस्रस्त्वया-ऽध्यक्षेण पृतना जयेम(...) इति मंत्रेण आहवनीये एकां समिधं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(विधि)...

CC.O Sampurnanand University Collection. Digitized by eGangotri

अत उ खलु यज्ञस्यारम्भः , अप्रतिष्ठेति विज्ञायते । स्वाहा यज्ञं मनस (:) स्वाहा यज्ञं वातादारभे, इति वात एव यज्ञस्यारम्भो वातः प्रतिष्ठेति श्रुति-वचनात् । अथाप्यनारभ्यतेऽग्नेनाध्वर्युञ्येत्यारंभः अथापि कैश्च विज्ञायत इति मंत्र लिंगमारंभे देवागातुविदो" इत्यादि , तद्ब्राह्मणमपि वाताद्धा अध्वर्युर्यज्ञं प्रयुङ्क्त इ त । अत एव यज्ञं प्रयुङ्क्ते सदेनं प्रतिष्ठापयतीति चेति ।" देवा-गातुविदो गातुं यज्ञायेत्यादौ वचनमिति भाष्यम् ।

" अग्नीन[4]न्वादधाति यो वै देवताः पूर्वः परिगृह्णाति स एना श्वो भूते-यजत इति श्रुतेरग्निष्वेतदन्वाधानं गम्यते । आचार्याभिप्रायस्य - पुराप्रात-रग्नि होमात् यो ह्य कामुकायक्रियेति वचनात् गम्यते । इति भाष्यम् । वचना-दर्शेनाधिन व्यवधायकम् । गार्हपत्याद्दक्षिणाग्न्याहवनीयं च विहृत्यान्वादधाति। अग्न्यन्वाधानं यजमानमिति केचित् ।

न्वादधाति । ततस्तूष्णीं द्वितीयं एकमेव गार्हपत्ये च दक्षिणाग्नौ द्वे द्वे समिधावादधाति । श्रौ० का० दी० पृ० २ ।

३- देवागातुविदो गातुं यज्ञायविन्दत मनसस्पतिना देवेनवाताद्यज्ञः प्रयुज्यतामिति। शु० यु० मा० वे० संहिता अ० २१ ।

४- प्रातरग्निहोत्रं हुत्वाऽन्यमाहवनीयं प्रणीयाग्नीनन्वादधाति । दर्शपूर्णमास-प्रकाश: १।१।१।

५-" अग्न्यन्वाधानमध्वर्युर्यजमानो वा " श्रौ० का० श्री० सू० अ० तत्र अध्वर्युग्रहणं न कर्तव्यम् ।" अध्वर्युः कर्तृ वेद योगात् " इति प्राप्तत्वात् । अथ यजमानो-वेत्येवमर्थमुच्येत । तन्न। एकतोऽपि सिद्धत्वात् । यथाऽन्यत्र" पात्राणि संसा-दयति यजमानो वा" तथा " आज्यमवेक्षते वेदोत्रैति यजमानो % वा" तस्माद-ध्वर्युरित्यनार्थम् ।

अपरे ऊर्ध्वर्युग्रहणं यजमान सम्बन्धार्थं व्याचक्षन्ति, तद् किमर्थम् ? व्यूहने" अध्वर्युर्वा यजमानो" इत्युक्ते यजमानो यथा- स्यादिति । किं वा स्यात् , ऊर्ध्वर्युग्रा पिकल्पितत्वादधिकारेण ऋत्विगन्तरं प्राप्नुयात् । अथ पुनर्यजमान सम्बन्धे ज्ञापितो यजमानः सिद्धो भवति । श्रौ० भा० का० श्रौ० सू० २-२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

याजमाने समाम्नानात् 'स उपकल्पयत' इति प्रस्तुत्यान्वादधातीति वचनात् स एवायम् इति गम्यते । योऽग्नीनन्वाधाय व्रतमुपैतीति व्रतेन समान-कर्तृत्ववचनाच्च । अग्नी इह प्रातरग्निहोत्रं हुत्वे त्वा[1] देवहूरिति जपित्वा 'दैवा-गात्' इति वाग्नीन् पुनर्विहृत्य तूष्णीमन्वादधाति समाम्नानादथोपवसथीये [illegible] ऽहं कि न्नित्यवचनाम्ना(ना[3]) तु । परस्मैपदात् , 'ममाग्ने वर्चो[2] विहवेष्वस्त्वन्व-न्वाध्वर्युरन्वादधातीति शाखान्तरे वचनात् । वेदिं विमायाग्नीनन्वादधातीति। वेदिमानादिसमान कर्तृकत्ववचनाच्च । स्वयमाचार्यस्याभिप्रलिंगदर्शनात्कल्पो भिप्रेत इति गम्यते तथा अन्वन्वाधानमध्वर्युर्यजमानो वेति कात्यायनः।

आध्वर्यवमंत्राशिषां च यजमानगामित्वं- यां कांचन यज्ञ ऋत्विज आशिषमाशासते यजमानस्यैव सेति वाजसनेयकात् ।

त्रीणि[4] काष्ठानि गार्हपत्ये अभ्यादधाति , त्रीण्यन्वाहार्यपचने, त्रीण्याहवनीये ।

तूष्णीमिति[5] गम्यते मंत्र वचनात् सूत्रमीपन्यवीपुनस्त्वेति भेदेन पदांत रोपन्यासात् , क्वापि अग्नीनन्वादध्यादुपस्थं कृत्वा गार्हपत्यमूल ० रन्वाहार्य पचनं प्रक्रम आहवनीयमिति । अत्र केचिदेककार्ता याऽनुवाक्योक्ता विध्यो मूलकल्प-प्रकरणोक्तैर्विधिभिर्विकल्प्यन्ते इति ब्रुवते । अपरे - विशेषोक्तैर्विकल्प्यन्ते। अवि-शेषोक्ता अनुवादच शेषत्वेन संबध्यन्त इति ।अविशेषोक्तास्तावदग्न्यन्वाधाना-दयः। अग्नीनन्वादधातीति द्वयोर्कं उपस्थं कृत्वेत्यादि । तत्र विशेषः- पूर्वा-

---

१- 'हुत्वेडादेवहूरिति' इति पाठः।

२- 'विहवेष्वस्त्वन्य' इति पाठः।

३- त्रीणि त्रीणि काष्ठान्यादधीतेति बोधायन: द्र० दर्शपूर्णमास प्रकाश: १।१।१

४- ' तिसृभिस्तिसृभिर्वाग्निं तु जपेदाहवनीये वाऽऽदध्यात् ' तिसृभिस्तिसृभिर्वाग्नि-हवनीयेऽत्नानग्नीन्चकृत्वकूपसमिन्धे' दर्शपूर्णमासप्रकाश:,पृ०१४८।

५- का० श्रौ० सू० २।४।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१
धविवदायेति इध्मातिनान्येषांगृहीत्वाङ्गुष्ठपर्वमात्राणि दैवतानीति ।

तत एवं प्रस्तरवेदिदर्शनादिषु अनुज्ञानात् । तत्राक्रम्याधाय्याह इध्मं बर्हिरीति ओंकारं यजमानाः पृष्टीति , तत्रोक्तं दर्शपूर्णमासाविध्यादि, ये ब्राह्मणाक्कात्रैणवेंग्राह्या कंडा ब्राह्मणेनेति वचनात् यथोपवेशमप्यर्थः सिंगापिना तथोपविश्यमनिदध्यः दर्श अग्न्यन्वाधान इति सूत्रेणोपनक्ष्यपीभूत्स्या- न्ना बोधायनो " - इध्माभिरन्वादध्यात्-

तिसृभिस्तिसृभिरेकैकं येन वा समाम्नायेयुरय येऽष्टौ प्रथमां वाच(मां) मया हिरन्वादध्युरय ये दश , तिसृभिस्तिसृभिरेकैकमन्वाधायोत्तरेणाहवनीयं तिष्ठन्नु वशीन्मिनदेयुरित्यत्रोक्तमाहाहोविर्यां नु खलु गार्हपत्यस्यकुम्न्वाहित एव भवति । प्राप्योनिरङ्गाहार्यपचनम् । आहवनीयमेवैकंविदध्याभ्यान्वादध्यादिति- शिष्टाद्युत्तरेणाहवनीयं तिष्ठन्निमतेनित्यत्रोक्तमाद यौमनन्यथा विदध्याभिरन्वा- दध्यादेकैकयादिशिष्टा उत्तरेणाहवनीयं तिष्ठन्निमदेवित्यत्रोक्तमाद नोद्गताहवनीयमेकैक मेकैकमनीये वैकमन्वादध्यादग्निं गृह्णामि " सुरथं " बलु पौर्णमासं हविरिद- मेणामधीति " पौर्णमास्यामावास्यं हविरिदमेणामधीत्यमावास्यायामित्यत्रोद- स्माद नैव आहवनीयमेकैकं विदध्याभिरन्वादध्यात्तूष्णीमितरायन्वादध्यादिति- शिष्टा उत्तरेणाहवनीयं तिष्ठन्ति यदेविति व्याहृति भिरेवान्वादध्यादिति रा- थीतरः। <u>अग्नीनामन्वाधाने विचारः</u>।(एवं सर्वत्र सूक्ष्मिति कल्प इत्यर्थः) एवं सर्वत्र सूत्रग्रहणे स्वशाखायामन्वाधानप्रकरणे मंत्रस्यानुक्त त्वात्तूष्णीमितिगम्यते। क्व उ इति निमादः ।बोधायन आहवनीति सर्वशाखा प्रत्ययत्वात् शाखांतरे समा- म्नानादि[2]इध्माभिरन्वादध्यादिति बहुवचनात् यावत् साम्यं तावदुक्तमिति ।तिसृ-

- -

१- मध्यात्पूर्वार्धाच्चावदाय्मिनुदन्मह०गुष्ठपर्वमात्रमवदान्मु ।का० श्रौ०सू०१।६।६।

२- व्याहृतिभिरन्वाधानमेके समामनन्ति। एकैकया व्याहृत्याऽन्वाधानम् । यद्यपि व्याहृतिभिरन्वाधानमित्युपादेयगतत्वेन बहुत्वविवदा प्राप्ता तथाऽपि भिन्नार्थ- त्वात् समस्तानिर्दिष्टानां विभाग करणम् ।इ० स०ग्र० माध्यवृत्ति ११११।

३- ([illegible] विदध्यानुवाकस्य दर्शस्य तिसृभिस्तिसृभिरेकैम्य स्थीनैवानग्नीन्वकृत्सवकुषभिन्धे । इ०स०ग्र०,पृ०१४८।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भिरित्वाभिरेव येन सम्पद्यन्ते । तस्मादेवं गम्यते बह्नीनां शालानामयं कल्प इति।
तथा येऽष्टीप्रथमां वीजमां वा निर्म्यावर्धेयु: क्योरावृधिर्मन्वदर्शनात् । कन्यापतितेष्वन्यापतितेषु वसेत् यावत् साम्यं तावदनुद्धयाति शिष्टांपुरेणाहवनीयं निवैशिकनिवैमिति शालीक:।

अग्निपरिग्रहार्थमग्न्यन्याधानं तत्र च सकृदन्वाहित एव गार्हपत्य:।गृह्यो निहार:।
एतदेव निर्शनं आहवनीयमेव विहृत्याग्न्यान्वादधाति शिष्टा उत्तरेणेत्यादि
एवं विहृत्याभिरादिना भवन्ति अग्नीनिति- सर्वापिदं बहुवचनम्।

<u>शेषान्वयस्य:-</u>

विहृत्याभिरग्नीनिति बहुवचनार्थः स्वार्थत्वात् एकैव्यादृष्टसिद्धेरदृष्टार्थता[2]
नास्ति नेतरेणामिति उत्तरेणाहवनीयं तिष्ठन्नित्यादि ।

<u>मौद्गल्यस्तु-</u>

श्रुतिलिंगादीनामर्थनियोगकारणत्वात्लिंगादेकवचनात् पूर्वाग्नियेनोपपत्त्याह[3]
आहवनीयमेवैकमित्यादि मैत्रेयस्य शालीकिमदा एव विशेष:।तूष्णीमितरौ अग्निं
गृह्णामीत्येक वचनादग्नीनन्वादध्यादिति बहुवचनादितरा अदृष्टार्थां एवेति
रायोतरकानाद् व्याहृतीनां सर्वार्थत्वाच्चेति ।[4]

- -

१- उत्तरेणाऽऽहवनीयं प्रागग्रमिध्माबर्हिरुपसादयति वेदाणामिध्मपुरं बर्हि: ।
द्र० दर्शपूर्णमास प्रकाश: २।२।४।१७ ।

२-विधे सहकारिभूतानि षट् प्रमाणानि।* द्र० अर्थसंग्रह विधिप्रकरणम् ।

* निरपेक्षोरव: श्रुति:, शब्द सामर्थ्यलिङ्गम्, समभिव्याहारो वाक्यम् ।
उभयाकांक्षा प्रकरणम् ।देशसामान्यं स्थानम् । समाख्या यौगिक: शब्द" इति।

३- यद्यपि व्याहृतिभिरन्वाधानमिति उपादेयगतत्वेन बहुत्वाविवक्षा प्राप्ता तथाऽपि
भिन्नार्थत्वात् समस्तोपदिष्टानां विभागकरणम् । स्वयम्भातृणोपधानेभूर्भुव:
सुवरिति स्वयम्भातृणामुपदधातीति समस्तोपदिष्टानां सूत्रकारेण भूरिति चैतया
व्याहृत्येति विभागोपदेशात् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवं सर्वेषामाचार्याभिप्रायो वचनाभ्यां विचार्यः । गृह्यकारिकायां संक्षे-पेणोक्तो । एकैकया व्याहृत्या[1] गार्हपत्यादीनन्वादध्यात् ।

आधानादौ तद्ग्रहणाच्छ्रुतिवचनदर्शनात्[2] । स्वयमप्यारोप्य [illegible] समस्यापि विष्टानामपि कर्मणि विनागदर्शनाच्च अग्निं गृह्णामि सुरथमिति मन्त्रलिंगात् अग्निं गृह्णाति । स्व आयतने देवताः परिगृह्णातीति ब्राह्मणाच्चा-ग्निपरिग्रहार्थं देवतापरिग्रहार्थं चान्वाधानमिति गम्यते ।

अथ ये यत्र तिसृभिस्तिसृभिरेकैकमन्वाधायोत्तरेणाहवनीयं तिष्ठेत् यत्र (च) योऽग्निर्वैकल्पिकः पक्षः स्वाहाकारानुपायाचाराच्च परिगृह्यते अध्वर्युर्यज-मानो वा ।

एकैकमन्वाधायोत्तरेणाहवनीयम् अध्वर्युर्यजमानो वा अनेन गार्हपत्यमुपस्थं कृत्वोपविश्य प्रागुदग्धितानि त्रीणि शुष्ककाष्ठानि गार्हपत्येऽभ्यादधातीति एकैकमेकैकया ममाग्ने वर्चः ० अग्ने स्वाहा । मम देवाः ० काने अस्मिन् स्वाहा । [illegible] मयि देवाः ० सुवीराः स्वाहा इति ।

अथोऽध्वर्युर्नैऋतदर्शपक्षे[3] त्रीणि काष्ठान्यभ्यादधाति । मह्यं यजन्तु ० वायुतामे स्वाहा । दैवीष्षड्दुर्वी ० सम्राजन् स्वाहा ।

अग्निर्मन्युं ० विशेत इति । अथ प्रत्यङ्मुखस्तिष्ठन् त्रीणि काष्ठान्या-हवनीयेऽभ्यादधाति धातस्मात्पूर्णा ० अमानान्ध्यायात् स्वाहा । उरु व्यचानो ० परावतः स्वाहा । येन सपत्ना ० अधिराजकन् स्वाहेति । सर्वमग्नये इदं । उत्तरेणाहवनीयं तिष्ठन् सर्वान्निन्नमेत् अर्थापिष्टं ० मे मित्रं त्वोति । अत्रान्वाधान-यजिनायामपि स्वाहाकारो भवति प्रदानार्थत्वेनापेक्षितत्वात् कुशोतिसोमवत्[4]।

- -

१- व्याहृतिपक्षेऽपि पूर्वोक्त अनुत्पविकान्यायेनऽऽहवनीयादौ ।
द्र० दर्शपूर्णमास प्रकाश पृ० १४८ ।

२- अग्निं गृह्णामि सुरथं यो मयोभूः स्व आयतने देवताः परिगृह्णामीति कर्मविधिवाक्यशेषाभ्यामिति
(शे०टि० भा० पृ०३०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

४(क)

यत्र स्वाचार्येण कृतोपायन तन्त्रिकाधानादौ आम्नाये स्वाहा-कारामावेऽपिकल्पे स्वाहान्ता मंत्राः पद्यन्ते त्वाहुतिभिस्त्वभिहिर्जुहूर्त्ति यासना-वर्तनादिति, सपिध्ययपिजुहोति वचनाच्च या धातो जुहोत्योरविशेष इति गम्यते ।

आश्वलायनो-

सर्वप्रायश्चित्तानि जुहुयात् ।

- -

गृह्णाति देवताश्च परिगृह्णाति स्व आयतन इति मंत्रलिंगात्। द्र० द०पू०प्रकाश पृ० १४८.

३- " उत्तरया गार्हपत्यमुत्तरयाऽन्वाहार्य पचनम् " कूर्चं बीजवधादि किंवा संयुक्तं विशिष्टं कुत्वा कूर्चं तत्त्वाहरति मन्त्रेणान्वाहार्य इति ।"

" कूर्चे यतस्य कूर्चं यदिशिष्टमित्यादि ब्राह्मणस्य व्याख्यानम् । स यस्मिन् पच्यते सो न्वाहार्य पचनः ।

द्र० दर्शपूर्णमासप्रकाश पृ० १४७ ।

४- " जुहोति चोदनः स्वाहाकार प्रदानः"
जुहोति शब्दश्चोदनो विधायको येषां ते होमा = दर्वीहोम संज्ञकाः । दर्वीहोम शब्दो जुहोतीति विहित होम नामधेयम् । इति कर्काभाष्यम्
(द्र० का० श्रौ० सू० १।२।७)

जुहोति शब्देन चोदना यस्य स जुहोति चोदनः। इति हरदत्तः।

४-(क) क्वचिदपि पुनरेव यत्र मंत्रे स्वाहाकारो न पठितः तत्र मंत्रस्यान्ते कृत्वा देवता पदे च स्वाहाकारो विधीयते । यथा " गायत्र्याप्रतिष्ठ हीमे " यत्र तै तनुवो यज्ञ यज्ञियाः" इति यज्ञो स्वाहेति च ॥

" सर्वस्यैव मंत्रस्यान्ते स्वाहाकारः।" इति हरदत्तः द्र० द०पू०प्र०,
पृ० १०२ ।

५- " समिध्यपि जुहोति" इत्यपि पाठभेदः।

६- कात्यायनस्य-

" उपविष्टहोमाः स्वाहाकारं प्रदाना जुहोतयः" उपविष्टेन कर्त्ता होमो

(द्र०का०श्रौ०सू०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वाहान्तैर्मन्त्रैर्न वैकल्पे पठितायामित्यन्याग्निहोत्रे कौण्डन्यागापीत्यत्र जुहोतिग्रहणेन, "होमाभ्याधाने गृह्येषु" इति तद्भाष्याच्च । यत्र क्वचिज्जुहोत्यादयधातवोऽविशेषु देवतोद्देशेन[7] द्रव्यत्यागः कर्तव्य इति याज्ञिकाः ।

अत्र कात्यायनः-

अथ याग स्वरूप-विचारः

[8] यज्ञं व्याख्यास्यामो, द्रव्यं[9], देवता त्यागः ।" यज्ञं " व्याख्यास्यामः" यज्ञशब्दो व्याख्यास्यत इत्यर्थः । प्रतिज्ञातार्थमाह- द्रव्यं, देवता, त्यागः । व्रीहि यव पश्वादिद्रव्यम् । देवताशब्दस्तु चोदनालक्षणः ।" या यत्र चोद्यते सा तत्र देवता" नहि जात्या काचिद्देवताऽस्ति । वैदिके - व्यवहारो[10] तद्धितेन द्रव्यं प्रति देवतात्वं च गम्यते ।। चतुर्थ्यन्तेन वा तस्य द्रव्यस्य देवतां प्रति योत्सर्ग क्रिया स यागः । यज्ञो याग इति चान्यर्थान्तरम् । यस्मिन्नेव लोके यज्ञशब्दः प्रसिद्धोऽपि सन्नुच्यते प्रधानविवेकनिरूपणाय । स च यजमानेन कार्य इत्याह ।

येषु ते उपविष्ट होमाः, स्वाहाकारेण प्रदानं येषु ते स्वाहाकार प्रदानाः, ये उपविष्ट होमाः स्वाहाकार प्रदानाश्च ते जुहोतय उच्यन्ते ।

कु० का० श्रौ०सू० १।२।७ टिप्पणी ।

७- " देवतोद्देशेन " इति शुद्धः पाठः ।

८- यज्ञो, यागो, यजनमिष्टिरिति पर्यायाः यज्ञं, यागं, व्याख्यास्याम इत्यर्थः याग स्वरूपं कथयिष्य इति यावत् ।

९- अग्न्यादि देवतोद्देशेन पुरोडाशादि द्रव्योत्सर्गो याग इति भावः ।

" या यत्र चोद्यते सा तत्र देवताः" इति कर्कभाष्यम् ।

कु० का० श्रौ० सू० १।२।१।२।

१०- " व्यवहारे" इति पाठो युक्तः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कर्मणि पुरुषाणामनधिकारः परिक्रयाम्नानात् ।

" प्रधाने स्वामी फलसंयोगात् ।

- -

१- मनुष्याणां चाऽऽरम्भसामर्थ्यात्" । पू० का० मी०सू०१।४ कं०भा०

मनुष्या एव कर्मस्वधिक्रियन्ते । त एव हि यथाशक्तं कर्मारब्धुं समर्थाः, न देवादयः । देवास्तावदवाप्तकामाः । न च देवानामन्ये देवाः सन्ति यान्यजेरन् । ऋषीणामार्षेयाभावादनधिकारः । रक्षः पिशाचानामशुचित्वात् । गवादीनामासन्नचेतनत्वात् । (आसन्नेन प्रत्यासन्नेन चेतना बुद्धिर्येषां तद्वत्वाद्गवादीनामित्यर्थः । पारलौकिक फलविषयक बुद्ध्यभावादिति यावत् ।) ।(पू० टिप्पणी) विधिशून्यत्वाच्च ।" गावो वा सत्रमासत" इति तत्र प्रशंसार्थोऽर्थवादः, तस्मान्मनुष्याणामेवाधिकारः ।

२- " प्रधानं स्वामी फलयोगात्" (का० मी०सू० कं०भा० १।७।१८।१६)।

ननु च प्रधान समकर्तृकत्वाद्गुणानामपि स एव कर्ता भविष्यति, न तत्र प्रयोजकत्वेनाऽपि कर्तृत्वानुग्रहात् । गुणोत्सर्गे क्रियमाणे न किञ्चित् यजमानेन कर्तव्यमिति तं करोति । न ह्यात्मने पदेन फलार्थिकर्तृत्वं गम्यते । किं तर्हि भावनादिष्ट कर्तृत्वस्य सतः- फलसम्बन्धित्वम् । अतश्च फलेन कर्तुरन्यत्र न गन्तव्यम्, न तु फलार्थिनोऽन्येन व्यापार करणं विरुध्यते । तावता च सिद्धाङ्गेष्वनियम इति । अतोऽङ्गेष्वन्य कर्तृकत्वं प्रधाने च स्वामी कर्तृकत्वमिति । अन्येष्वपि कर्म कुर्वत्सु यजमानेन, यत्नेनाज्ञाया प्रत्यवेक्षणं कर्तव्यमेव । अन्यथा ऋत्विजः कर्मकर्तृत्वात्प्रमादेन सर्वं कर्म सावधानतया यथाशक्तं न कुर्वन्ति, वैगुण्येऽपि तेषां स्वार्थविनाशाभावात् । तदुक्तं भट्टाचार्यैः" यथैवाऽध्वर्युणा पदार्थाः कर्तव्यास्तथैव यजमानेना प्रमादात्स्वार्थं प्रत्यवेक्षितव्याः ।।इति।।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दर्शपूर्णमासादिषु चिन्त्यते , किं सर्वकर्म स्वयमेव कार्यं ? उत किंचित् परकर्तृत्वमपीति । फलार्थिनः कर्मविधिषु । फलार्थिन एव कर्तृत्वमित्यत आह । " कर्माणि पुरुषाणामधिकारः " । कुत एतत् ? परिक्रयाम्नानात् । श्रूयते हि परिक्रयः " गौर्देया , हिरण्यं दक्षिणेति " । एवमादिः एवं सर्वत्र प्राप्ते आह । प्रधानं स्वामी फलसंयोगात् । प्रधानं स्वद्रव्यपरित्यागपरत्वाधिपादक-रूपं तत्स्वामी करोति । फलसंयुक्तं हि तदिति । तत्संयुक्तं फलेन श्रूयत इति।

आचार्यादिभिः कल्पकारैर्देवतोद्देशेन द्रव्यत्यागात्मकमध्वर्युहोत्रादिभिः स्वाहाकार- वषटकार- स्वधाकारादिभिः[1] प्रधानार्थत्वस्य[2] क्रियमाणत्वादिति गम्यते । स्वाहाकारादीनां प्रधानार्थत्वञ्च देवेभ्यः स्वाहाकार वाक्यात् , पितृभ्यः स्वधाकार उपधानादित्यादिभिः स्पष्टं प्रतीयते । देवेभ्यः स्वाहा-कारः- देवप्रधानकं प्रदानम् । स्वधापितृभ्य इत्यादि । गृहीतिभोजना स्वाहा-कारप्रदान इति वचनाच्च। ऐतरेये च यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट् करिष्यन् साक्षादेव तद्देवतां प्रीणाति प्रत्यक्षां देवतां यजतीति। अध्वर्युणा गृहीतहविष्प्रदानत्वेन वषट्कारकाले होतुः देवतास्मरणविधानात् । किं देवता उ सम्प्रदानाः भवन्तीत्याग्नेय्या[4] इत्येवमादिविति कार्यं यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद् वषट् करिष्यन्निति प्रयोजनमिति[5] कर्मसाध्याच्च।

आपस्तम्बेन च-

याज्यानं स्वत्वस्यत्यागो यजमानस्य । दक्षिणादानं द्रव्यप्रकल्पनं कामानां कामनं प्रत्यक्षादिभ्यो मंत्रा वपत्यकरणानुमतिष्ठते । ॐ मंत्रेण वस्तु-कम् । मैत्रादिषेन द्रव्यत्यागो याज्यानमिति नोक्तम् । कोऽयमन्यते न याज-मानमिति । न च होत्रादीनां याज्यान द्रव्ये स्वत्वाभावादिति वाच्यम् । यजने-ऽपि न्यायप्राप्तेः दक्षिणादानेऽपि भक्तिमत्त्वात् होता देवस्यादि दर्शनात्।

१- " स्वत्वोत्पादनकम् ,इति पाठः।
२- " स्वाहाकारादिभिरिति " पाठः।
३- देवेभ्यः स्वाहेति पूर्वोक्ति" का० श्रौ०सू०५।६।२३ ।

(डी०टि० का०शौ०सू०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दानं च यजमान(स्य) स्यादिति यजमानस्य [illegible] । किन्त्वाध्वर्युणा क्रियमाणहविःप्रक्षेपोऽपि यागः । अनावृत्तसर्वा [illegible] तस्मात् यजमान- न त्यक्त्वा होतव्यमिति कुर्वन्नेव[6] न प्रक्षेपस्य [illegible] ।

तथा च मीमांसा [illegible] क्रियमाणो-वषट्कार एवं यागनिष्पादकः : वषट्कारकालेऽध्वर्युणा क्रियमाणो हविः प्रक्षेपः । [illegible][7] क्रियमाणः स्वाहाकारेण हविःप्रक्षेप ॥ इति ॥ [illegible] यजमानेन पृथक्कार्यमिति गम्यते परिच्छेदः । [illegible] भवति । [illegible] एवं यत्र प्रधानं स्वामी, फलभोगा[illegible]विरोधादितः [illegible]- संकाण्डपठितानपि प्रत्यगाशिषां मंत्रान् यजमानो जपतीति वचनात् प्रत्यगाशिषां मंत्राणां क्रियान्तरं विना [illegible] प्राधान्यम् ।

तान् यजमानो जपतीति । तथा माध्यंदिना[illegible]काण्डगतानां – स्वस्तु- [illegible], तनुं त्वं पुं [illegible] प्रत्यगाशिषां मंत्राणां याजमा- नत्वमिति । [illegible] इत्यादिषु स्वरविचारः । यज्ञकर्मण्यजपन्यूङ्खसामस्विति व्याकरणसूत्रम् । [illegible][8] दूरात् सम्बु- द्धावित्यस्यापेक्षया [illegible] । एका श्रुतिर्यस्य [illegible] । [illegible] -[9][illegible]पानुदात्तस्वरितानां परस्वन्निकर्ण ऐकश्रुत्यमित्याह कात्यायनः । [illegible] प्रयत्ना, [illegible]-

---

नमोत: पितरोरसाय "नमस्कारोहि पितृणामिति" "पितरो नमस्या" इति श्रुतेः द्र० द० इ० प्रकाश:)

४-" भवन्तीत्या[illegible]" इति [illegible]।

५- प्रयाणमिति, प्रयोगमिति[illegible] भवितुं [illegible] ।

६-आख्यायैव इति पाठः ।

७-" [illegible]" इति पाठः ।

८-" एकश्रुति" इति ।

९- द्र० कात्यायन श्रौ० सू० १।१।२।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्तोमानन्यतमस्यैकस्यैव पदस्याभिव्यक्त्यर्थं: निघातीयाभिधानमित्यर्थं इति वृत्ति-
कृत् । यथ- न्यूंखानामपि वर्जयित्वा कर्माणि मंत्राणामैकश्रुत्यं भवति। अग्नि-
मूर्धादिवं:[1] ० जिन्वतीमिति याज्यानुवाक्यायुगलम्[1(ब)]। इत्यनेन
"मन्द्राग्निर्मधी[2] विकोशमितित्यादि करणमंत्रयो व्यावर्त्यन्ते । यतोऽनु-
करणमंत्र: ।

उपांशु क्रिया विवेचनम्

"उपांशुयाज:" इति कारिका । वर्णानभिव्यक्त्याऽनुकरणं व्यव-
हार: उपांशुयाज:। यथा यजो निगदस्य पाठ: इति मञ्जरी। उपांशुपदव्या-
ख्यानावसरे:- उपांशुकरणप्रयोगनिधानान्वेषणां[3] उपांशुसंज्ञास्य कर्णकरणा ... ।
यदि च न सर्वेत्यस्मात् सर्वेत्यनुवृत्ती । तस्मात् सर्वाण्यपि यागादीन्युपांशु-
भवन्ति। इतरथा ... यागादीनां ... स्यात् । कात्यायनस्य

- -

१- द्र० कात्यायनेष्टि दीपक: , पृ० ५५। शु०य०वेद सं० ३।१२।
१-(ब) ॐ ...(उपांशु) ... (उच्चै:)" ... (का०श्रौ०५।१।११) इति ... पठितायां
तस्मिन्नेव ... ।

सर्वे लिङ्गन्त्याह। ... -
ऽन्याह तस्माल्लिङ्गन्त्याह ॥

२-" मन्द्राग्निर्मध्यौ" इति पाठ: ।
३-" उपांशु प्रयाज धृतै:"

शाखान्तरे" उच्चैर्वा क्रियते " उच्चै: साम्नोपांशु यजुषा" इति । यजुषा-
मेवोपांशुत्वम्, वेदोपक्रमाणि वैतानि वचनानि वेदोपसंहाराणि च तेन ...
वेदोपलक्षणार्थता। इत्येव विहितं साम्नैव विहितं ... उपांशु याजुर्विक-
मिति । कर्मान्त- का० श्रौ० सू० ७।२।१० ।

(शौ०टि०अ०पृ०३०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

कर्मकरणत्वेनोपांशुत्वेऽसिद्धे ऽपि कुक्कुटानन्दः कर्मभिराप्यायनस्य वैयर्थ्याप- नार्थम् । अन्यानि मंत्रान्ते[४] क्रियन्ते । आप्यायनं तु मंत्रावसानान्तस्य इति । आप्यायनादिषु कर्मोपांशुत्वासंभवात् तत्साधनानां मंत्राणामुपांशुत्वं सिध्यति इत्यवगन्तव्यम् । कर्मकरणा इति सिद्धेऽपि मंत्रा इ त वचनं यानिष्टस्याध्वर्यो वैयर्थ्यादिवासस्थूलमित्यादीनामाधानार्थकत्वेन(?)लिंगापन्नानामर्थानां मंत्राणा- मप्युपांशुत्वार्थमिति सिद्धान्तः ।

आश्वलायनेन-

[५] अथ सामिधेन्य इत्युपक्रम्य, ता एकश्रुतिसंततमनु ब्रूयादित्यादुक्तम् । अनेन सत्य- याज्या- निगदानुवचनाभिष्टव उत संततवचनानिति परिसंख्या- नात् महाभिष्टुते च सूक्त अनुवचनेत्युक्त्वा होतारमह्वा(क) वषट्कारानुमंत्रणा-

- -

नारायणा:-

याजुर्वैदिकत्वेऽपि इति संप्रैषा नोपांशु भवन्ति । सम्बोधनार्थत्वादेव नात् । " उपांशु यजुषेन " पु० प०पू०पू०पू०४४।" करणवदशब्दमनः प्रयोग उपांशु" तालवादिव्यापारे पुत्रत्वदोऽपि यम शब्दो न श्रूयते । न च मनो व्यापार मात्रं तदुपांशु इत्युच्यते । इति अपरो- का० श्रौ० ७।३।११ क० भा० ।

४० मन्त्रान्तैः कर्मादि: सन्निपत्योभिधानात् । पु० का० श्रौ०सू० १।३।५।

सकलस्य मंत्रस्य कर्मणि विनियोगात् सकलेन इष्यादित स्मरणं कर्म- कुर्यां, ~~तस्य स्मरणं कार्यम्~~ , तस्य स्मरणं यथा नष्टं न भवेत् तथा यदि कर्तव्यम् । अतो मन्त्रान्तस्य तदादेशेन सम्बन्धं कृत्वा कर्मानुष्ठेयमिति तात्पर्यं कर्माख्य । का० श्रौ०सू०   ।

५- अथ सामिधेन्य: " प्रवो वाजा अभिद्यवोऽग्न आयाहि वीतये गृणान ईडे ऽन्यो नमस्यस्तिरोऽग्निं दूतं वृणीमहे समिध्यमानो अध्वरे समिद्धोऽग्न आहुतीति " - पु० आप० श्रौ० सू० ११।२।७ ।

(क) " होतारमध्वर्यो" इति लेखकः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(ख)

निर्विकारत्वमिति वचनाच्च ॥ एवं चोपांशुप्रयुज्यमानां जपादीनां प्रायणा-
मपि वाङ् स्वरमिति सिद्धम् ।

उपांशु जपस्वरूपविचार:-

उपांशु जप्या: करणानुमंत्रा[1] ध्यायनीपरिस्थितिसाधनाश्च मंत्राभि-
धास्येति वदन्ति, तास्वरैम्ब्रुवादिवर्तु[2]:स्वरास्येति ।

सबिन्दुकास्य-

जपानुमंत्रणा वाच्यकरणापरिस्थितिर्विना।

रैन्नुत्वं भवेच्चो तथा च स्वरसंयो ॥

इति करणानुत्वं,[द] मन:प्रयोगमुपांशु।

उदात्तत्व स्थानानामनुपलब्धिर्ध्वनि:।उपलब्धिर्निर्गु:। तत्र मनुपलब्धमत्(क)
उरसि मन्द्रं कण्ठे मध्यमं शिरसि तारं इति सप्तस्वर:स्थानानि यथावं प्रयो-
ज्यानि ।

अथ करणमंत्रेषु स्वरसंकालविचार:

कर्मान्तेनप्रकान्तं प्रकृत्यैनप्रकान्तं वर्णं तूष्णीं कर्मणाभिनिषुत्तिमौ-
नाऽपक्रान्तामिति यत्नौचत्- वर्णितिनै: सत्यं प्रयो मंत्र आम्नातो भवति ,

- -

(ख) प्रयोज्यमानानाम् ।इति पाठान्तरम्_

१- मंत्रमुच्चारयन्नेव मंत्रार्थमेव संस्मरेत् ।
शीघ्रिणां तन्मना भूत्वा स्यादेतदनुमंत्रणम् ॥

* अनुमंत्रण प्रयोगानामिमंत्रणमपि गुह्यते ।(नारायणवृत्तिः आप०श्रौ०सू०)टि०
१।१।१।२०)।

२- उदात्तानुदात्तस्वरित: प्रचयश्च वाचनैर्विन: *

* उरसि मन्द्रम्, कण्ठे, मध्यमं, शिरसि तारम्(तै०प्राति० २३।१० ।
मन्द्रेण प्रागाज्यभागाभ्याम्, प्रात: सवने च ।
मध्यमेन प्राक् स्विष्टकृत: माध्यन्दिने च ॥
(का०श्रौ०सू०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दीर्घंतु(कर्म) कर्म, न कर्मणो होतेर्मंत्रोऽभिनिर्वर्तायार्थप्रतीर्विरुाने कृत्वा मंत्र आम्नातो भवति , दीर्घमुर्म,(न कर्णा[3]होतेर्मन्त्री पदोर्विरुाने कृत्वा मंत्रमाम्नातो भवति)。(दीर्घंतु कर्म) न कर्मणो होतेर्मन्त्रोऽभिनिर्वर्तायार्थं स्वकालातुष्ठाय पीर्घो मंत्र: आम्नातो भवति, कृत्स्नं तु कर्म, न कर्मणो होतेर्मन्त्रो विरमेत् । यथा खलु त्रियंगुणा सकृत्कृणीमिति ,लोका न्नीस्त्र तेषामुपयुत्या(प) स्वम्पतीति । यथा एका तत्र प न्नकृत्वो यथुणाय न्त्र-कृत्य: तूष्णीमिति राजस्तेषां मानमुपयुत्यास्वम्पयुष्यीति । यथा खलु पंच कृत्वो यथुणापंचकृत्वस्तूष्णीमिति राजस्तेषां मानमुपयुत्यीति ।यथा-खलु सकृगुणा सकृत्कृणीमिति राज एव तेषां मानमुपयुत्यीति ।

अत्र भाष्यवृत्ति:-

आवृत्तिरहितमंत्रकलां दीर्घकर्मणामावर्तनीयमंत्रकलां कर्मणां च मंत्रावृत्य-वृत्तिं विशिष्य प्रदर्शयति न प्रक्रांतं प्रक्रमयेन्न प्रक्रान्तं कर्म तूष्णीं कर्मणाभि पिपूरयिर्षेदिति । अप्रक्रान्तमनावृत्तिमंत्रं आवृत्तिरहित मंत्रम् उत्तरत्र कूलानां कर्मसमनापि सम्पद्यते । न प्रक्रमेत् आवर्तनीयमंत्रयुक्तं न कुर्यात् । यत कर्म दीर्घकालसाध्यं यत्पत्र मंत्र: सम्पाद्य कर्मसमाप्ति मंत्रो नावर्तनीय इत्यर्थ: । [4]अप्रक्रान्तमावर्तनीय मंत्रमकर्म तूष्णीं मंत्रावृत्तिं विनाकर्मणा कर्माभ्यावृत्यानाभि-पिपूरयिषेत् न पूरयितुमिच्छेत् । यत कर्मणावृत्तो मंत्रो विनिर्युज्यते तत्र मंत्रा-वृत्तिं विना कर्मावृत्तिन्न कुर्यादित्यर्थ: । नाप्रक्रांतं प्रक्रमयेदित्येतदुदाहरणेनत्यतीन स्पष्टयति नाप्रक्रान्तमिति यथाभिधाय बर्हिर्लवन: हविरित्यादिना नाप्रक्रान्त-मित्यादिना यत्तुपयुज्यन्ताश्रयिष्यामि इति शेष: । बर्हिर्लवन:, सूक्तो-ऽनेति लवनो बर्हिर्लवनार्थो मंत्र: । प्राच्छैत तेमा रिषामिति - कृत्य आम्नातो

- -

कृष्टेन शेषो तृतीय सवने च ।।(दर्शपूर्णमास प्रकाश: पृ०६७) ।

(क) उपलभ्यमु इति पाठो वा?

३- पुनरुक्ति:(आवृत्ति:) ।

४-" सावत्तानुत्या" इति ।

५-" लवुदाहरणात्यतीन" इति उदाहरणा :येन इति वा ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भवति खलु वर्हिस्तरणादिकंतु कर्म दीर्घकालसाध्यं मंत्रोच्चारणकालापेक्षया अधिककालसाध्यमित्यर्थः।

तत्र तस्मिन् विषये कर्मणो शेषः दीर्घकालसाध्यत्वादित्यस्मादेशी- मन्त्रो नाभिनिवर्तेत् यावत् कर्मणापि नावर्तनीय इत्यर्थः।

कीवपिाकरणांतरमाह:-

यथायं पशोरित्यादि विकरणी छिंधतो ऽनेन मंत्रेणेति विधान: स्रुवाभिमंत्र णान्नातभवति। 'स्वधितेमैनं हिंसीरिति'। तस्य पशुच्छेदनस्य दीर्घकालसाध्यत्वे ऽपि मंत्रं तावत्कालं, नाभिनिवर्तेत्यनुषज्यतोनावर्तनीय इत्यर्थः। समानन्यायतयार्थान्तरं दर्शयति।

यथायं स्वयमातृण्णायामित्यादिस्वयमातृण्णोपधानमंत्रः। 'प्रजापति- स्त्वा सादयतु पृथिव्या' इत्यादिः दीर्घो मंत्रः। उपधानकर्म चाल्पं तत्र न कर्मणो शेषः मंत्रो निवर्तयेदिति। यत्र कर्म स्रुवकल्पत्वात्कालसाध्यं, मंत्रश्च दीर्घः, तत्र- कर्मणो ऽल्पत्वाच्छेषः मंत्रो न निवर्तेत् न विरमेत्॥ विकरणव्यत्ययच्छान्दसः। छिन्नो न भवेत्कर्मणो ऽल्पत्वेन मन्त्रं न छिन्द्यादित्यर्थः। न प्रक्रान्तं कर्म तूष्णीं कर्मणाभिविपूरयिणोदित्येतदुदाहरणचतुष्टयेन स्पष्टयति। यथा स्तम्ब- यजुषा- सकृत्तूष्णीमिति न प्रक्रान्तं कर्म कर्म तूष्णीं कर्मणाभिविपूरयिणोदि- त्येतथा स्पष्टं भवति तथोच्यते इत्यर्थः: त्रिर्यजुषा सकृत्तूष्णीमितियत्र श्रूते तत्र सकृन्मन्त्रमुक्त्वा त्रिवारं कर्मान्मन्नावर्तयेत् किन्तुमंत्रानुवृत्तिपूर्वकं त्रिवारं कर्मा- वृत्त्यं सकृत्तूष्णीमावर्तयेत्। तदेव दर्शयति लोकाग्निश्च देवान् उपकृत्येति देवानां- निरूपकुन्वे विरेग्निर्भो नामेति मंत्रेण उत्तरवेद्यां चात्वालोत्करपुरीषनिवपनानां लोकम्पृणानां देवानामुपकृत्य समीपे पुरीषं कृत्वा पार्श्वमपिविरेग्निरिति मंत्रं सकृदुक्त्वा लोकाग्नीनापर्येत् किन्तु प्रतिलोकाग्नि मंत्रमावर्तयेत् इत्यर्थः। यद्यपि त्रिवारं मंत्रस्सकृत्तूष्णीमितिचतुर्वारं चात्वालोत्करपुरीषनिवपनावत्यौ, तथापि यो ऽस्यां पृथिव्यां यो द्वितीयस्यां पृथिव्यां यस्तृतीयस्यां पृथिव्यामिति मंत्र-

CC.O Sampurnanand University Collection. Digitized by eGangotri

लिंगात् त्र्याणामेव लोकानामित्यमिति वेदितव्यम् स्तम्भयजुरथीति स्तम्भयजूंषि।
पात्यैकवचनम् । क्वापि तेनाभुपमुत्येत्यनुवर्तो ।तेनां पृथिवीदेवयजनीत्यादि, (क) तर्हि
दर्शनाद्विकल्पविगतपुरीणाभिवपनानां स्तम्भयजुरात्यानाम् उपांशु समीपेश्रुतिं कृत्वा
यथार्थमपि[1] पृथिवीदेवयजनीति यजुरन्त्यमुक्त्वा स्तम्भयजूंषि नावर्तेत् । यत्र
पूर्वलिंगदर्शनाभावात्तूष्णीं चतुर्थमित्यस्यापि[2] स्तम्भयजुष्ट्वमिति द्रष्टव्यम् । यथोप-
तत् पंचकृत्वो यजुषा पंचकृत्वस्तूष्णीमिति राज्ञस्तेषां मानमुपांश्वेति ।यथा
स्तदिति पूर्वपदेषां सोमविणवकसाधकानां पञ्चानामपि[3] मानानां मानम्नीर्यते
ऽनैवेति[4] मानमीत्यं देवमिति यजुः।

सोम मानस्य पञ्चकृत्वम्

उपांश्वेति समीपे श्रुतिं कृत्वा उच्चार्य राज्ञः सोमस्य पंचकृत्वः पञ्च-वारं मानम्नावर्तेत् । पञ्चकृत्वस्तूष्णीं मंत्रं विना यद्यपि पञ्चकृत्वस्तूष्णी-मित्यस्योपयोगो नास्ति तथापि राज्ञि दशवारं मानमित्युप सोममानप्रसंगाच्छाखा-न्तराभिप्रायेण।

प्रकारान्तरमाह-

यथो खलु यजुषा यजूष्णीमिति राज्ञ एव तेषां मानमुपांश्वेति। तेषां मानानां मन्त्रं यजुरुक्त्वा पञ्चवारं मानं नावर्तयेदिति पञ्चकृत्वो यजुषेति यदा एव यजुर्यजुषा यजूष्णीमिति शाखान्तरपक्षे क्रियां मन्त्रं च नावर्तयेदित्यर्थः।

(क) पृथिवी देव यजनीति तूष्णीं न्ताकी प्रवरति ।

१- "यथार्थमपीति ।

२- तूष्णीं चतुर्थं यजुषाम्।

३- पञ्चकृत्वः सोमं ममौ ।

४- "मानमित्यंत्रैव" इति शुद्ध पाठः।

CC.O Sampurnanand University Collection. Digitized by eGangotri

व्रीहि निर्वाप:

यथा खलु चतुरो[1] मुष्टीन् व्रीहीणां निर्वपतीति व्रीहीणां चतुरो मुष्टीन्निर्वपतीति योऽयं निर्वाप: क्रमपि देवस्य त्वेत्यादिमन्त्र[2]मुच्चार्य मन्त्रावृत्तिं[3] विनाऽवर्तनीय:।

१- " कि कर्मणि सम्बन्धात् " ।

चतुर्मुष्टिको निर्वाप: एकपदार्थ: पदार्थावयवो मुष्टि:।अवयवस्तु तावद्भिरेव क्रियते, संख्यामुष्टयश्च । मुष्टीनां निर्वापे सम्बन्ध संख्यायाश्च ।संख्याया:मुष्टि-सम्बन्धे वैरूप्यलक्षण वाक्यभेद प्रसंगात् । (१) " वैरूप्यं चैवम् मुष्टी " "चतुरो-मुष्टीन्निर्वपति " इत्यत्र निर्वापं प्रति मुष्टीनामुपादेयत्वं, विधेयत्वमङ्गत्व-न्चे-त्येकं मिश्रम् । संख्यां प्रति च तेषामुद्देश्यत्वमनुवाद्यत्वं प्रधानत्वं चेत्यपरम् ,एतत् परस्परविरुद्धं मिश्रद्वयं मुष्टीनामापद्यते इति ।

(१) ये चत्वारस्ते मुष्टय: येमुष्टयस्ते चत्वार: " इति परस्पर व्यवच्छेद्य व्यवच्छेदक-भावोऽरुणैकहायनी न्यायेन द्रव्यस्यगुणावच्छेदकत्वेन गुणस्य च द्रव्यावच्छेदकत्वे-नापादयितुमशक्यतीति भाव:। पू०का० मी०सू०व०भा०टि० १।५।११)।

व्रीहि प्रत्याम्नायविधि। (पू०का०मी०सू०व०भा०टि० १।८।१)।

" अग्निदेवाय त्वा जुष्टं चतुरोमुष्टीन्निर्वपति " इत्यनेन वचनेन निर्वापस्येव प्राधान्येन विधानात् ग्रहणस्य तदर्थत्वाच्च प्रदीपे एव मंत्रविनियोग:।

(२) ॐ देवस्यत्वासवितु: प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम् ।" अग्नि-षोमाभ्यां जुष्टं गृह्णामि " इत्यनेन मंत्रेण पूर्वम् त्रिःप्रदाय चतुर्थवारं तूष्णीम्।

(पू०का०दी० पृ० ६)

(३) एकमंत्राणि कर्माणि- (दर्शपूर्णमास प्रकाश: पृ०८०)

संस्कारस्यैकस्य कर्मण: प्रकाशनार्थमेकमंत्रो भवेत् । इति प०भा० एकस्य कर्मण: एकोमंत्र इति औत्सर्गिकोविधि ।" या जाता ओषधय: " इति चतुर्दशभि-रोषधीर्वपति इत्युदाहरणम् । तत्रैकेन मंत्रे वैकल्पायोगवत्वाप:।

(शे०टि० फ० पृ० पृ०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निर्वापप्रसंगात्स्वतुष्णानामपि मुष्टीनां विनियोगमाह = 3। देवताये त्वित्र त्विष्टकृते तृतीय षष्ठाये चतुर्थ इति । नापक्रान्तं प्रक्रमेदित्यनादाकृतर्विकल्प-प्रवृत्तिश्छन्दस्तस्मात्तुष्णापिधानार्थानां मंत्राणां कर्मकालपेक्षया ह्रस्वदीर्घकाली-च्चारणीयानामावृत्तिविच्छेदयोन्निर्णधात् गम्यते । सर्वत्र मंत्रादौ कर्मारम्भ इति।

काल्यायनस्त्वसाह-

मंत्रान्तैः कर्मादिः सान्निपात्योऽभिधानात्[1] ॥

[2] अनियमं वात्स्यः ॥[2]

आचिंत्याचार्याः ॥ इति ॥

अत्र भाष्यम्-

कर्माणि प्रयुज्यमानानां मंत्राणामन्तस्य कर्मादेश्च सन्निपातः सत्यक्रता कर्तव्या ।

कुत एतत् ?

अभिधानात् ।

अभिहितो मंत्रः, कर्माभिधातुं शक्नोति- ततश्च तदनुष्ठीयते ।

" अनियमं वात्स्यः -" वात्स्य आचार्य अनियमं मेने । आदौ वा मंत्रमुक्त्वा कर्मानुष्ठानम् ।"

कृते वा कर्मणि मंत्रवचनमिति" । एवमपि कर्माभिधायकत्वं मंत्रस्य भव-तीति ।

" आचिंत्याचार्याः । तु शब्दः पक्षव्यावृत्तौ । नानियमं, मंत्रान्तेन कर्मा-चार्याः इच्छन्ति यद् कारणं मंत्रेणस्मृतं कर्म कर्तव्यम् मंत्रान्तेन सामर्थ्याद्विरल-च्यते । एवं दृष्टार्थता भवति । इतरथा अदृष्टं परिकल्पनीयम् । तच्च नेष्यते।

- -

एकद्रव्ये कर्मावृत्तौ सकृन्मंत्रवचनं कृतत्वात् । इति कात्या० यद्यप्येकः फल-पदार्थो निर्वापादिः तथापि प्रत्यभ्यासं संस्कारभेदो भवति मंत्रवता निर्वापेण

(शै०टि० अ० पृ० ५०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पृष्टे सतीति ।मंत्रान्तैः[७] कर्मादीन् सन्निपातैकाधारैधारायां चाविसंयोग इत्याश्वलायनः।

परिसमूहनम्

परिसमूहन्त्युदकेनाग्नेः[८] रूपं कुर्वन्ति। परिसमूहनं[९] संमार्गः। पर्युक्षणमुपलेपन-

---

द्रव्यं संस्कर्तव्यम् , यतो यस्मिन्नेव पृष्टो मंत्रो नोच्यते तस्यैव मंत्रो संस्कारेण दानं स्यात् । कार्यं प्रयुक्तो हि संस्कारो न क्रियास्वरूप प्रयुक्तः । कार्यं चात्र भिन्नम् । तस्मात् प्रतिपृष्टि मंत्रावृत्तिरिति भावः । (पू०का०श्रौ०सू०१।३ टि०प० भा०)।

४- एककस्य मंत्रस्य कर्मणि विनियोगात् सकलेन सम्पादितं स्मरणम् कर्माङ्गम् । तच्च तच्च स्मरणं यथा नष्टं न भवेत् तथा कर्तव्यम् । कार्यमंत्रान्तस्य तदादेश्च सम्बन्धं कृत्वा कर्मानुष्ठेयमिति तात्पर्यम् ।

५- पू० का० श्रौ०सू० १।३-५-६-७ क० भाष्यम् ।

६- " मंत्रेण स्मृतं कर्म कृत्वाऽभ्युदयकारी भवतीत्येवंरूपादृष्टार्थताऽत्र ।"
(पू०टि०कर्कभाष्यम् प०१का० श्रौ०सू०)।

७- मंत्र प्रकाशिताऽनुष्ठितस्य कर्मणो निःशेषकरत्वान्मंत्रोच्चारणेऽभिलाष्यम्। यदन्तरं कर्मणापत्ती न । मंत्रान्त कर्मणोः संनिपातः- संगमो नैरन्तर्यं स्यात्। कर्की भाष्य।(दर्शपूर्णमासप्रकाशः) पृ०३-८४ यत्र स्वाहाकारो वषट्कारो वा मंत्रस्यान्ते प्रयुज्यते तत्र ताभ्यामेवकर्मादि संनिपातः। इति हरदत्तः।

आधारमंत्रयोः संयोगः सम्बन्धः। धारामंत्रयोश्च। आधार इति होमनाम इति कर्कः। हरदत्तस्तु - आधारः स्रुच्यादिः। धाराज्यधारादिः। आधारे धारायां च संततमुत्सिद्धश्यते । तत्र कर्मादिर्मंत्रादेश्च संयोगो भवति। संतत श्रुति-मूलत्वादाविसंयोगस्य । पू० दर्शपू०प्रकाशः पृ०८४ ।

८- " मनो ह्यैवैषा मनुष्यस्याऽऽयान्ति तऽएनमेतत् व्रतमुपयन्तं विदुः प्रातर्नोयक्ष्यत- इति तेऽस्य विश्वेदेवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति सउप-वसथः। पू० श० ब्रा० का०१ अ०१ ब्रा०१ क०००१०, २२-७ । (दे०टि०प०पृ०७०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुष्पाञ्जुना(ज) र:। [10] कर्तुर्भिर्मेष्वप्रत्यत्न इत्येकमात्रपुष्पाञ्जलिरूपं परिग्रहणं नियमार्थम्।

अथैव समूहनाद्यान्तरमावेऽपि तत्पूर्वं पुष्पं परिसमूहनाद्युपस्थापनमिति-ज्ञापनार्थम्, अन्यथाऽप्युपस्थानाऽग्नी परिसमूहनादिप्रापणार्थं च। दक्षिणेन पाणिना सर्वतः परिमार्ष्टि, तत्परिसमूहनमित्याकीर्णमेतकम्। एवं गार्हपत्यादी-नु परिसमूह्य पर्युक्ष्य गोमयेनोपलिप्य, गन्धपुष्पादिभिरलंकुर्वन्ति।

परिसमूहनमाग्निसमुद्धारणं,
कुशानां समूहपरिलेपनम्।
तदुक्तं
कुश- काष्ठ-समाहरणं कृतं
वदति रूपमिदंपञ्चलक्षणमिति [11] ।। गोपाल:।

अथ यजमान: उपवीतीऽग्नि यज्ञोपवीतिव्यय आचम्य यजमानायतन उप-विश्य शिर: पवित्रमप आचमति। उपवीतेऽग्नि पश्चिमात्कारिका। स्मृतित: कर्मांगाचमने शिरोऽवमर्दनं विशेषार्थम्। धौतेन वाससा सूत्रेण परिधानेन बहिर्क्रीडा-भिरेव: पिबेदित्यादिमंत्राचमनार्थम्। एवं च यस्य यदा कर्मारम्भ: तदा स्वमा-चमनं कर्तव्यमित्युक्तं भवति। स्वमाचम्य तीर्थेनविहारं प्रविश्य, कर्मणाऽऽहवनीयं यजमानो प्रपद्यते। [12] जघनेनाऽऽहवनीयमित्येव(मु)वचनात्, कर्मणाजघनेनाऽऽहवनीयं प्रपद्य [13] दक्षिणेनाऽऽहवनीयं ब्रह्मायतनं तत्परेणयजमानायतनम्। तत्रोपविश्य प्राङ्मुखादेश-

- -

९- "परिसमूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय" पर्युक्ष्य जुहुयात्," परिसमूह्य = त्रिभिर्दर्भैः पांसूनपहार्य, उपलिप्य = गोमयोदकेन त्रि:- संमार्ग:- संमार्गकृतास्य:। अभ्युक्ष्य = पणिकाद्भिरभ्युक्ष्याभिषिञ्च्य इति हरिहर:।

द्र० पा०गृ०सू० १।१।१।२।४

१०- "प्रयत्न" इति।

११- पञ्चभूसंस्कारम् इति गुरु:।

१२- जघनेन तद्गार्हपत्यानीयं सादयेत्। द्र० श०ब्रा० १।१।३।४।२।

१३- दक्षिणेनाहवनीयं ब्रह्मयजमानयोरासने प्रकल्पयति पूर्वं ब्रह्मणोऽपरं यजमानस्य।

द्र० दर्शपूर्णमास द्र० पृ०२२३।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मार्जनं यथोक्तविधिना पाणिनाऽप आचामेति । कात्यायन० ------ संहुतैरिति त्रिर्मन्त्रेणाप आचामेत् । तद्वूष्णीमिति बौधायनः ।

सकृन्मन्त्रेणाप आचामेत् त्रिस्तूष्णीमिति शालीकिः ।

अत्र शुध्यर्थं स्मार्तमप्याचमनं कर्तव्यमिति केचित् – " मधुपर्के च सोमे च अप्सु प्राणाहुतिषु च, नोच्छिष्टः भवतीति वचनात् । नाचामेदित्यन्ये ।

आहवनीये समिधं आदधाति[1]

इध्मो भवन्तीति समिधां वचनात् – " प्रादेशमात्र्यो एता उक्ता भवन्ति । " तत्किञ्चिदित्यर्थः। अत्राग्नेः परिषेचनं केचिदिच्छन्ति, तदनावश्यकमित्यन्ये। " अग्ने व्रतपते व्रतं चरिष्यामि० राध्यतां स्वाहा । अग्नये[2] इदं न मम । आदा-

---

(१) (२) अनुवाक्यावैवर्णं मध्ये कृत्वा समिधाविच्छायावस्थायिस्तृः समिधौ श्वात्त्वा आदधाति " समिधाग्निमितिप्रत्यृचम् । (का० श्रौ०सू० ४।८।१३)। " आहवनीयेस्तृ समिधौ आदधातीति " (उव्वटः) शु० य० सं० । " संग्रामिष्यते दीप्यतें यश्चिनाग्नि आहवनीया सादनिष्यां " (महीधरः)।

" अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् " इति मंत्रेण व्रतमुपैति। अतः प्रभृति करिष्यमाण कर्मान्मूर्ती यजमानस्य सत्यवदननियमः । रात्रौ तस्मिन्नेवागारे स्वपन्नेवाग्निहोत्रं होमः। सायाह्नेच्छायां सत्यां होमान्तरनाश्याध्यानां नीवार प्रभृतीनां अन्नं कृत्वा फलानि वाऽश्नीयात् । रात्रौ यजमानीया गार्हपत्यागारे वा पत्न्यग्न्यागारस्थायां स्वस्थाग्न्यगेऽयानकः वाग्यता भूमौ शयनं कर्तव्यं न सत्यावी । प्रातरपि तस्मिन्नेव विहारे स्वपन्नेवाग्निहोत्रं होमः ।

पु० का० दी० पृ० ३-४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

व्रतपते० राध्यतां स्वाहा । वायवे व्रतपतय इदं । आदित्य व्रतपते० राध्यतां स्वाहा । आदित्याय व्रतपतय इदं । व्रतानां व्रतपते राध्यतां स्वाहा । व्रतानां व्रतपतय इदं । पुनः परिषेचनमन्त्रौ व्रतपते व्रतं चरिष्यामि तच्छके-यं तन्मे राध्यतां स्वाहा । वायो व्रतपते ।। आदित्य व्रतपते । व्रतानां व्रतपते व्रतं चरिष्यामि० राध्यतां स्वाहेति द्वितीय तृतीययोरपि व्रतं चरिष्यामीत्यनुषंगोऽपि पूर्ववत् ।

व्रतोपायनम्

एतत् व्रतोपायनम् । व्रतोपायनम् इति बौधायनस्संगव काले व्रत-मुपैतीत्युक्तं वा शोध्यमानात् प्रणीता अग्निप्रणीयस्व कुर्वन्तु वाजसनेयिनः कात्यायन- आश्वलायन:- पूर्वेद्युः 'कालं तु व्रतोपायनं भवति प्रातर्वा वर्हिषा पूर्ण-मासे व्रतमुपैति वत्सरानावास्यायामिति । संगवकालेऽव्रतमुपेयादित्यन्वाधान-प्रभृतिस्यापिमन्त्यम्: ।। व्रतोपेतो व्रती दीक्षितः स्यान्नरूपायं दे वदेन्न कुर्या-न्मरणेन्द्रपुरीषनावेक्षेतामेध्यं दृष्ट्वा जपत्यबद्धमनो दरिद्रं चक्षुः सूर्यो० मामावती-रित्यप यत्र्यभिचरंत्युक्तोदके व्रतोपायपद्र० निर्दिष्टेति ।

' पर्णशाखाच्छेदनम् '

कारस्य व्रतोपेतस्य पर्णशाखामाच्छिनत्ति । अथ शाखः पूर्णमां अपवर्गार्थः । तच्चैतत्पूर्वं सन्नयतः, सन्नयतो वर्हिः प्रतिपदैवेति विभागार्थम्, तथा सत्यन्वन्वाधानमुख्यत्र सिद्धं भवति । यात स्वनं यास्य न भवत्यर्थलोपकत्वात् अस्यैत च भेद निर्दिशति तद्-

---

१- ' आदित्याय ' इति ।

२- मंत्र घटकस्य आकांक्षा पूरणाय सम्बन्धः अनुषंगः आकांक्षापूरणाय लौकिक पदस्य सम्बन्धः- अध्याहार इति तद्भेदः ।

पृ० का० श्रौ० सू० १।३-२ टिप्पणी

३- व्रतमुपैष्यन् । अन्तरेणाहवनीयं च गार्हपत्यं च प्राङ्मुखस्तिष्ठन्नप उपस्पृशति यस्मा-उपस्पृश्यमेध्यापि पुरुषा यदनृतं वदति तेन पूतिरन्तरतो मेध्यानऽया मेध्या-भूत्वा व्रतमुपायानीति पवित्रं वाऽऽआपः पवित्रपूतो व्रतमुपायानीति

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धर्माद्धर्ममैवेति ज्ञापयति । इतोऽपितस्यप्रतिपादनमनुल्य निर्मुक्तिः ।

- -

तस्मादूना चप उपस्पृशति । का० श्रौ० १।१।१।१ ।

४- पूर्वां पौर्णमासीमुत्तरां वा उपवसेत् ।

पूर्णामिति कलाहीने चन्द्रे पूर्णां विचक्षणाः " इति चतुर्दशीं पूर्णां ज्ञापयति । तथा- " यदा स्वस्तमियात्सूर्यः,

पूर्णश्चेन्दुरुपागमत् ।

युगपत्सचिरा राका,

तदा भवतिपूर्णिमा ॥

इति पञ्चदशीमुत्तरां ज्ञापयति । पञ्चदशी वा पूर्वा प्रतिपदुत्तरेति । कुत खलु ? सादृश्यादिपौर्णमासी शब्दस्तिथ्यन्तरे प्रवर्तते । तच्च सादृश्यं पौर्णमास्याः प्रतिपदि न चतुर्दश्याम् ।

किं मासस्य रूपं पौर्णमासी शब्दस्य प्रवृत्ति- निमित्तम् ? मासस्थानं चन्द्रमाः पूर्णकलिकाश्च ।

" यस्यां देव प्रपिबन्ति तत आप्याययते पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिरिति ॥

तत्र तच्चन्द्रमसः पूर्णत्वं प्रतिपदि पञ्चदश्यां च तुल्यम् ।
अन्यत्र कला व्यापार सामान्यात् ।

द्र० का०श्रौ० सू० २-१-१ कर्क भा०

५- श्वोनिर्वेत्स्यद्दृष्टे वा पर्णशाखां छिनत्ति शमीलीं वेणत्वा ओषधीति वा ।
" तामाच्छिनत्तीषेत्वोर्जेत्वा " इति हि श्रूयते ।

६- सन्नयामीति उक्ते । द्र० का० श्रौ० सू० ४।२।१।

७- " सत्यवन्द्रः " कर्माणिमुखे सत्यवदनम् ।

द्र० का० श्रौ० सू० २।१।१२-१३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रापयत्वतीत्याचमनाभिधानत्येत्यर्थः। पर्णशालामाचेति चाभिमुख्येन पर्णशालां गच्छति । चार्थं वा चाकारः प्रमादपाठ इति केचित् । अभिमुखार्थः गच्छेत्याद्यर्थः। चाभिमुख्येनाद्यं गच्छतीत्यर्थः। । प्राङ्०मुखावीचीं वा , कालाना शालायां गन्तव्यमिति कर्म:प्राप्तस्योक्तेमूरत्वे पि न प्रतिनिधिरिति । प्राङ्०मुखोद०ङ्० वा शालां व्रजेत्, चन वाचेत्त्यत्यन्मन्यते । प्राङ्मुखोदङ्मुखेति वक्तव्ये, प्राङ्०मायङ्०ङ्०त्यपपाठः। वा शब्दौ तुल्यविकल्पार्थौ । यन वा चैत्तयन्नि- त्यनेनैव सिद्धे प्रागादिग्रहणं तत्कर्मवे विकल्पार्थम् । अन्यत्र लक्ष्यमाणापोषत् प्राचीमुदीचीं वा गत्वा यथार्थं गच्छेदित्येतमर्थं च । सायं प्राचीं चोदीचीं वा पश्चाच्छालां प्रति[2] शुष्का(ग्रा) भवति सायाह्निकनदीर्णत्वादित्येति । प्राचीं- वोदीचीं वा कुशस्य प्राग्गतामुद्गता वा । वा शब्दात् प्रागुदीचीमेति ,- प्राङ्गो- प्राचीमुदीचीमाहरति उभयोरुदीच्योरितिनिमित्याद, इति विस्पष्टमुक- त्वात् , गच्छी । अन्योरर्थवादेनाभेदसंस्तवात् तदभावाशंकानिवृत्त्यर्थं वातयोरि- वोपन्यासः। समुच्चयार्थो वा, वा शब्दः शाखान्तरे समाम्नानात् इत्यत्वो- र्वेत्येतिसमुच्चये विनियुक्तत्वात् क्रियाप्रकाशकत्वाच्च । मंत्राणाम् अन्यथा त्याम- र्थ्यात् छिनद्मीत्यध्याहरन्ति केचित् । तदयुक्तम् , पाठसामर्थ्यात् । विनाश- नेन स्मर्तव्यम् । एवं सर्वत्र स्वधितिना छिनत्ति कोदितत्वात् । यावन्मात्रे गौरिकणवे न तत् ऊर्ध्वंछिन्द्यादशक्याम ऊर्ध्वस्थावितिर कर्मान्तम् । अप उपस्पृशति । शाखाशाखादिच्छागोण् छेदनादि न कार्यम् अर्थलोपात् । स्वम् लूनस्य लवनं, छातस्य छननं, पिष्टस्य पेषणमित्यादि । अत्र केचिदर्थ लुप्तेष्वपि

- -

१- प्राङ्मुखुदङ् वा " (का० श्रौ० सू० १-२४ कर्कभाष्य) ।

" प्राङ्मुखदङ्चि च कर्माणि सन्तिष्ठेरन् " इति श्रुतिः। तथा चाहुत्यन्तप तं प्राङ्मुखमनुक्रमत्यति प्राची दि देवानां दिगथो उदङ्मुखीचीहि मनुष्याणां दिक् " तथो हास्यै तत्प्रागेव कर्मकृतं भवति एतद्वै प्राङ्० निष्यात् यथाव, प्राङ्०व यत्र मूर्तिस्थाता इति तथोऽस्योदगेव कर्मानुतिष्ठते " । इति च क० भा० ।

२- बर्हिर्मुर्णमिद्युक्मग्रं हरामि मद्भागमहमित्याहरति।
प्राचीमुदीचीमित्युभयनिर्देशात्केवल प्राच्यामुदीच्यां वानोपपन्न । इति प्रागुदीच्यामेव शालायां केचित्लिंगादिति भाष्यवृत्ति- पु०का०पु०पु०१।१।२।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धर्मप्रयोगमिच्छन्ति- वाढं वायुना करोतीति वचनदर्शनात् ।

<u>कात्यायनस्याह-</u>

वार्ति०- सू०- छिन्नावदातपिष्टपुष्पयोगे, यजुष्क्रिया संभवादिति ।[२]

यथा वत्सानपाकरोति, वायवस्थोपायवस्थेति । वत्सानिति संभवादेव एकदेश: । कर्मणा: सान्नाय्य दुहीति ।

नोट- अत: परं मूलपुस्तके पुनरुक्त: वाक्यगतस्य पाठ: उपलभ्यते । स चैत्यमु- मन्त्रान्तौ: कर्मादिषु सन्निपातवेदाराधारायां वापि संयोग इति आपस्तम्ब: । परि समूहन्त्युपमन्त्रस्य रूपं कुर्वन्ति परिसमूहनं संमार्ग: पर्युक्षणमनुलेपनं पुष्पाद्युपचार: कर्मान्यमेणाध्वरन् इत्येवमादुकस्य रूपं बहुवचनं वर्तुं नियमार्थ: कर्मेव परिसमूहनत्वात्समानेऽपि तस्य पृथक् ग्रहणं परि समूहनादुकस्य रूपमिति ज्ञापनार्थं मन्त्रदाब्युप समाहिते- ऽग्नौ परिसमूहनादि प्राप्तार्थं च सविकेन पाणिनासक्तः परिमार्ष्टि तत्परिस- मूहनमिति कौशिकं एवं गार्हपत्यादीनु परिसमुह्यपर्युक्ष्य गन्धेनोपलिप्य गंधपुष्पा- दिभिरलं कुर्वन्ति। परिसमूहन वारिसमुदायो कुशकुशं अब्दापरिलेपनं कुशकाष्ठ समा- हरणं क्रमं भवति रूपमिदमेकाक्षुदकमिति गोपाल: । क यजमानउपसद्य येऽग्नि यज्ञो- पवीत्यप आचम्याग्न्यागायतन उपविश्य शिर: पविलमप आचामति । उपकल्पयेऽग्नि- अग्न्यागारं विरुद्धे स्मृतित: कर्मागाचमने विद्धि वचनं विशेषार्थं अग्निर्नो आपस्तम्ब- सूत्रेणादधिराधत्ताग्न्यिक्तमाभिविध्नपिवेदित्यादि मंत्राचमनार्थ । एवं च यस्य यदा कर्मा- रम्भ: तदा एव आचमनं कर्तव्यमित्युक्तं भवति । एवं आचम्य तीर्थेन विहारं प्रविश्य

दक्षिणाग्निर्माध्यं प्रत्यवेनोपान्तं प्रयते "धर्मेणाग्निमेयीमित्येवम् वचनात् । दक्षिण धर्मेणान्निं समीपम् प्रदय दक्षिणेनाग्निमीय ।

- -

१- छिन्नं लूनं च पिष्टं च सान्नाय्यं मुष्कं तथा ।
लौकिकं गृहीतं येऽन्यन्ना: अपा: कदाचनात् ।
छिन्नादिकलौकिकं वेदाग्नेरे क्रमं प्रति ।
स्मृतान्यज यं प्राह भारद्वाज: क्रमेण ॥
छिन्ने वावदो पिष्टे दग्धे लूने च मुष्के ।
वाते च लौकिके प्राप्ते यजमानस्येव वाजिनात् ॥
- श्रौ० का० श्रौ० सू० १।७।१३ ।

२- श्रौ० का० श्रौसू० १।७।१३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यजु: यजुषामा इत्यादि दर्शितात् । [४]वायवस्थेत्यन्यायनिगदत्वादनूह:। अपाकरणं पृथक्करणं मातृभ्य:, मातृसंगतानां वत्सानां युगपदपाकरणासम्भवात् प्रतिवत्सं मंत्रावृत्ति:। अनुवचनं तु मंत्रगतमुपलक्षणत्वेनापीदं द्रष्टव्यम् । एक द्विपदीऽपि न मंत्र ऊह्य:, प्रत्येकावृत्तिरनेकपदो इति कल्पसार:।अघीणां मातृ: प्रेरयति । देवोव: [५]सविताध्वमश्विन्या देवभाग: वृणात्विति ।एना-पाकृतानां वत्सानां मातृ: धेनू:- प्रेरयति [६]कालयति गोचराय ।अत्र वत्सं विना कृतानां गवां [७]युगपज्जन्यकालत्वादनावृत्तिर्मंत्रस्य । यत्र तु न शक्यते तत्रावृत्तिरा-र्थिकी ।" देवो व०" इत्यादि उत्कृन्नाभिरत्याशास्या प्रेरणमेकावृत्तिरिति कल्पसार:। [८]ध्रुवाऽस्मिन्गोपतौस्यात् बह्वीरिति यजमानमीक्षते । ईक्षणं मन्त्रास्मरणम् , परोक्षोपीष्टत्वात् तदितत्, बह्वीयामित्यादि दर्शनात् , यदात्वा-पारे हि परोक्षे निवृत्ति: स्यात् ।

- -

~~इति भित्युक्तं भवति ।एकायनस्य तीर्थेन निसारं प्रविश्य मन्त्रेणाकालीयं प्रस्थमानौ प्रयोगे काण्वेनाप्यन्वीयमितिविधेयु वचनात् । मन्त्रप्रसनेनाकालीयं पूर्वम दक्षिणेनाभ्यनीय~~ ।

४- वायव: स्थोपायव: स्थेति तथा गवनराष्ट्र्यानित्यादनया करोति।

५-" देवोव: सविता प्रार्पयत्विति शाखया गोचराय गा: प्रस्थापयति ।

शु० य०पू०प्र० पृ० १५२ ।

कात्यायनश्च:- देवोव इति मातृणामेकां व्याकृत्य ।
" शाखामिच्छति वत्सेन व्याकृत्य " इति वचनात् । एकस्यारचापिस्पर्शने सर्वासां संस्कार इति । ततश्च " यदि निरष्येत्" (का०श्रौ०सू०४।२।२८)। इत्यत्र मंत्रो विपरिणम्यते । इति सम्प्रदाय: । अपरे तु अन्याय निगदत्वादपि परिणामच्छिन्ति। (क०भा०का०श्रौ०सू० ४।२-६)।

६- " कालयति" सूत्रं ।

७- युगपत्कालजन्यत्वादनावृत्तिर्मंत्रस्य ।

८- ध्रुवा अस्मिन्गोपतौ स्यात् बह्वीरिति यजमानस्यगृहानभिपर्यावर्तते ।गृहाभिमुख: पर्यावर्तते इतिभाष्यवृत्ति, अभिमुख: प्रतिनिवर्तते इति शु०प० भा० य०पु०प्र० १।१।२

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तत्र नित्यवदाम्नातं बाध्येत । क्रियाविधेः पूर्वमंत्रपाठस्य केचित्प्रयोजनमाहुः मंत्रलिंगेन गवां प्राधान्यावगमात् यजमानस्यासंस्पर्शनात्[2] । गोपताविति शब्देन यजमान उच्यते । तत्र ताभ्यां त्वा शाखनैं देव सवितेत्यनेन एक मंत्रताप्यस्तीति । तथा च मंत्रेण प्रस्थाप्यमानानां गवां संबोध्यत्वात् यजमानेदाणमूणमेदाणं वा यस्मिन्गोपताविति प्रत्यवानिर्देशादानुषंगिकं द्रष्टव्यम् । अतः शाखाच्छेदकारे पय-सावाप्यार्थं[2] वहने मंत्रस्य निवृत्तिः ।

गार्हनीयागार प्रवेशनम्

कीलां शाखामग्रेणाहवनीयं पर्याहृत्य पूर्वया द्वारा प्रपद्य अपरेण गार्हपत्यमग्निष्ठेऽग्न्युत्तरार्धे वाऽग्न्यागारस्योपगूहति[2] - ' यजमानस्य पशून्पाहीति' । शाखामित्येव सिद्धे तामितिवचनं न पर्णशाखैव शाखामात्रमिति, तत्स्थशाखांतरपठितशाखाप्यस्तीति बोधयति । अग्रेणाहवनीयं पर्याहृत्य पूर्वया द्वारेति, गार्हपत्यस्य शालाद्वारयोरिति इतरथाग्रेणाहवनीयागारमिति ब्रूयात्। तत्पूर्वया द्वारेति गार्हपत्यागारस्येत्यर्थः।

अग्निष्ठेऽनसि शकटे वा , शकटाभावादेष मुख्यः कल्पः। उत्तरार्धोग्न्यागारस्य इत्यनुकल्पः। तथा च वक्ष्यति । यद्यग्निष्ठानो भवतीति । इति नु यदि सन्न्यसि । नु शब्दस्त्वमित्यादिमन्त्रार्थे, एवं सन्न्यस्त इत्यर्थः।

- -

१- मातृभिर्वत्सान्समवसृज्य वत्सं शाखयोपस्पृशति ' वायवस्थेति' संसर्गस्य भेदनम्। वत्सस्य नोद्दिश्यमानत्वा प्रतिपत्तस्पर्शनम् ।

यदि वत्स शब्दः स्त्रीविषयोऽपि तदेतदुपपद्यते । तथा च पाणिनिः ' ग्राम्यपशुसंघेष्वतरुणेषु स्त्री' इति स्त्री शब्दः साधुर्भवति तरुणेषु पुं शब्द इति । एवं च सति स्त्रीवत्सा अपि गावो गृह्यन्ते । (पु०का०अ०पू०४।२-७)।

२- यजमानस्य पशून्पाहीत्यग्निष्ठेऽनस्याग्न्यागारे वा पुरस्तात् प्रतीचीं शाखामुपगूहति पश्चात्प्राचीं वा।। द०पू०प० पृ० १५४ ।
अग्न्यागारे यत्तिष्ठति निर्माणार्थमनस्तदग्निष्ठम् ।(इति भा० पृ०)
अग्नौ समीपस्थानोऽग्निष्ठमिति (सूत्रदीपिका) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथास्य व्रतोपेतस्येत्यारभ्य या स्तम्भात्सन्नयत:। यत्तु वै न सन्नयति बर्हि: प्रतिपद्येव भवति । असन्नयतो व्रतोपायनानन्तरं प्रतिपदारभ०[1] एवं बर्हिराहरणं[2] भवतीत्यर्थ: । पौर्णमास्यामसन्नयतोऽमावास्यायां च व्रतोपायनानन्तरं बर्हिराहरणमेव भवति । न शाखाहरणादि ।

१- " श्वो वा प्रात:" पूर्णामुत्तरां वोपवसेदिति पूर्वमुक्तम् । तत्रश्वो वेत्युच्यमाने तयोरेवान्यतरत्र याग: प्राप्नोति । उत्तरोपवासपक्षे च द्वितीयम् । न तन्याप्नुयादित्यत: प्रातर्ग्रहणम् । तथा क्रियमाणेऽपि प्रातर्ग्रहणे कर्मणां प्रधानकालत्वस्य न्याय्यत्वात्पूर्वस्यामप्राप्तिरेव यागस्येति । उच्यते । एवं सति यद्यपिपरस्यां यागप्राप्तिरेवमुत्तरोपवासपक्षेऽन्यतरेणोत्तरस्यामपि प्राप्नुयात् । द्वितीयायामित्यर्थ:। तन्निरासार्थं प्रातर्ग्रहणम् । याज्ञिकदेव भाष्ये त्वन्याकूतं दृश्यते । तथाहि-" श्वो वा" । पौर्णमासे यत्र कर्तव्यमुक्तं तद् एकस्मिन्नेवाह्न्यग्न्याधानादि कर्मापवर्गान्तं भवति ।

।प्रात:। यस्मिन्पक्षे प्रात: प्रतिपदिन एव सर्वमग्न्यन्वाधानादिकर्मापवर्गान्तं कर्तव्यम् । न पूर्वेद्युरग्न्यन्वाधानदिने । प्रतिपद: प्रधानकालत्वात् । कर्मणां प्रधानकालत्वस्य न्याय्यत्वात् । तत्र च व्रतोपायनीयाशनारण्याशनान्यतरागारशयनानि न भवन्ति । उक्तकालाभावात् । रागप्राप्तेष्वेतेषु कृत्यादिनियममात्र विधानाच्च । न हि रागतस्तदानीमशनादीनि प्राप्नुवन्ति । वन्यह्वपनादि सर्वं भवत्येव । व्यवस्थित विकल्पोऽयमिति केचित् । तथा च कात्यायन:-

" सन्धिश्चेत्सङ्गवादूर्ध्वं प्राकृपर्यावर्तनाद्रवे: ।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथि: ॥
(द्र० का० श्रौ० सू० कर्कभाष्य एवं टिप्पणी २-१-१६ टि० २)

२- प्रेयमगादित्यन्तेर्वेन्द्रारिदामग्निवेदीसि प्राचीमुदीचीं वादिशमभिप्रक्रम्य त: कुशाश्चद्रर्भमयं बर्हिराहरति । द्र० दर्शपू० प्रकाश: पृ०१५९) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ द्वितीयोऽध्याय:

अथ जघनेन गार्हपत्यं तिष्ठन्नसिदं पार्श्वपर्शुं याचते – " देवस्यत्वा० हस्ताभ्यामाददे इति ।

अथेति शाखानिधानानन्तर्यार्थ: सम्बन्ध:। आम्नातो ह्युपायनानन्तर्यार्थ:। गमनानन्तर्यार्थं तिष्ठन्निति । असिदो दात्रं[1] पर्शु: पार्श्वास्थि । वाशब्दौ समानविकल्पार्थौ । याचतीति स्वशाखायामाम्नानादनाम्नानाच्चासिदस्य समानत्वं न स्यादिति तन्निवृत्त्यर्थम् । आदायाभिमन्त्रयते – " यज्ञस्य घोषदसीति,[2] असिदमेव, न गार्हपत्यम् । उत्तरत्र गार्हपत्यग्रहणात् । असिदं संयुक्तं[3] कृत्वा दक्षिणेनाभिमंत्रणमिति वृत्तिकृत् । गार्हपत्ये प्रतितपति- " प्रत्युष्टं रक्ष:, प्रत्युष्टा अरातय: "[4,5] इति । सकृन्मन्त्रेण द्विस्तूष्णीम् । एवं सर्वत्र कर्मावृत्तावावृत्तौ यत्र मन्त्रवीप्सा तत्र मंत्रस्याप्यावृत्ति: ।

आहवनीयाभिप्रयणम्

अथाहवनीयमभिप्रैति- " प्रेयमगात् – – – ० – – वृष्टमिति । इष परिंगृहाण – – – इति वेदिंप्रत्यवेक्षते । अथ तां विशमीति यज्ञ बर्हिस्त्यमन्त्रयते। ... परिगृह्णाति , यावन्तमग्रं प्रस्तराय मन्यतेवेदानां परिगृह्णामीति – – –।

– –

१- द्र० दर्शपूर्णमासप्रकाश: पृ० १५८ ।

२- द्र० यज्ञस्य घोषदसीति " इति शुद्धम् ।

३- द्र० श्रौ० श्रौ० सू० २०।२-७-८ ।

४- यज्ञस्य घोषदसीति गार्हपत्यमभिमंत्र्य प्रत्युष्टं रक्ष: प्रत्युष्टा अरातय: इत्याहवनीये गार्हपत्ये वाऽसिदं प्रतितपति । द्र० दर्शपूर्णमास प्रकाश: ,पृ० १५८ ।
गार्हपत्य ग्रहणं त्वसिदाभिमंत्रणनिवृत्त्यर्थम् । प्रकृतत्वादभिमंत्रण प्राप्ते: यथाऽप्याहवनीये प्रतितप्स्यति तथाप्यभिमंत्रणं गार्हपत्यस्यैव प्रतितपन एव विकल्प वचनादिति सूत्रदीपिका । इति भा० वृ० ।

५- द्र० दर्शपूर्णमास प्रकाश: पृ० १५६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

परिग्रहो कस्तम्बस्याखिदाविना परिस्तरणं त्रिः कार्यमिदमित्यादिदर्शनात्।
मन्त्रापरिग्रहे त्वेतन्न स्यात् । एवं तत्रैवमंत्रः , कर्म च ।ईधं परिणयेण
इति स उन्नाह बौधायनस्त्वित्वेव मंत्रं ब्रूयात्त्रिः कार्यमिदेवं बूयादस्य
परिस्तरणं, एवं होमिक्रयणो नव सर्वाहुत्यर्थंट समुपरवेष्ठिति ।तत्रैव
मन्त्रं ब्रूयात्त्रिः कृति हाती किरिति । यावन्तमलमित्येव वक्ष्यमाण
प्रस्तरपरिमाण विकल्पार्थम् ।

अग्निमूर्धमुन्पार्थ्ये - वर्णवृक्ष्मीति शखिदेनोपयच्छति । देवं बर्हि-
र्मत्वा० - ष्यासमिति । उपयच्छति हैमपुरैः असिदं संदधाति । वाच्छिन्न-
त्वाच्चेद लैमारिणमिति । हैदनादिष्वपामुपस्पर्शनं, धर्मशास्त्रादिति केचित् ।

अन्ये - तृणनिरसनादित्वृ विधानादन्यत्राभिन्न इति । अपरे- सर्वाप-
विधानं शौचप्राप्तिनिवत्यर्थम्, उपस्पर्शनं तु नित्यमेवेति । अपरे - यत्र विधानं-
तत्र नियमेन, ततस्मादेव लिंगादन्यत्र विकल्प इति ज्ञापकं पाठ्रस्त्वन शौमैत्वात्मानं
प्रत्यभिमृश्याधिकं स्पृशेदिति । वाच्छेदनान्यभिमृशति - देवं बर्हिः शतवल्शं

- -

६- देवानां परिणूतमसीति दर्भान्नारिणोति । परिणवणां सवनाय परि-
ग्रह यमिन्दैः स्वीकार इति भाष्यवृत्तिः । परिणोति यावता पर्याप्तं तावत्
परिगृह्णाति। इति सू० दी० ।
एकं स्तम्बं परिणूय तं सर्वं दाति(द्र०दर्शपूर्णमास प्र० सू० ८)
एकमूलमनेकदर्भसमूहः स्तम्बः। तावत्सर्वं छिनत्ति नतु किञ्चिदुत्सृजति अन्यो त्व-
परिणूता स्वं लूयन्त इत्यर्थः।
७- वाच्छेद लैनारिणमित्याछिनत्ति सन्दंगुष्ठं लुनोति स प्रस्तरः।
द्र० दर्शपूर्णमासप्रकाशः, पृ० १६३-६४ ।
८- पर्वी राष्यासमित्यखिदमधि निदधाति ।
९-सर्वं लुत्वा देवबर्हिः शतवल्शं विरोहेत्यालवानभिमृशति । आलवाः सच्छेदाः,
छिन्नानि मूलानि इति भा० वृ०। लुत्वेति कुत्सवचनात्व्वः । येन काण्डेन
भालूना दर्भा वा आलवा इति सूत्रदीपिका ।द्र०श०प्र०प्र०, पृ० १६४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निरोधेति । यावित्थवती दीर्घा मूलेभ्यस्तानि मूलान्याच्छेदनानि । आच्छेदनाभि-मर्शनं लवनाच्छिन्नानामिति केचित् । अन्तरं बर्हिरवलूनमिति वचनात् । अन्येत्वर्थं स्तम्बं छिन्दन्तीति । आच्छादनस्याविशेषात् ।

आच्छेदनेऽभ्यति सूत्रं बोधायनस्य, प्रत्यगाशीः- उत्तरेण मंत्रो दृष्टो भवति । मंत्रप्रत्यभिमर्शनीयं तस्यामिति शालीकिः ।

सूत्रं येन बर्हिरतिमंत्रणीयमाच्छिन्नानामाच्छादनमभिमर्शनमिति । प्रत्यगाशीरिति प्रत्यगाशानमात्रं क्रियाभिमर्शनेति । सहस्रवल्शा[1] विवयं रुहेमेत्या-त्मानं प्रत्यभिमृशति । इत्येतदभिमर्शनम्, कुतः प्रत्यात्मानमिति वर्णनात् । एवं सर्वत्र उपस्पृशति अर्थे एवैतं स्तम्बं लुनाति स्वादिषु द्रष्टव्यः । कृत्वा प्रस्तरं निदधाति-पृथिव्याः संपृचः[2] पाहीति । कृत्वेत्यस्यन्येतदर्थं वर्मेत्यर्थः करोतिरनेकार्थत्वात् । बर्हिर्गा-र्भाऽर्थमिति भावः ।

तृणान्यन्तर्धाय मूले निदधातीति केचित् । यावन्तमभिमुक्तम् । एक यजति[3] अपनं मुष्टिमालीति । प्रस्तरस्य परिमाणम्[4], अरत्नौ विशतकौ गृहीतव्य इत्येकेषाम्, मुष्टिमात्रो[5] गृहीतव्य इत्येकेषाम् मुष्टिमध्यमो गृहीतव्य इत्येकेषाम् ऊर्ध्वमुष्टिमात्रो गृहीतव्य इत्येकेषाम्, अङ्गुष्ठपर्वसंमितो गृहीतव्य इत्येकेषाम्, अपरिमितो गृहीतव्य इत्येकेषामिति प्रस्तरस्य । तस्य तत्परिमाणाविच्छिन्नतिरित्यर्थः । उन्नतानामवमुष्टिः परस्परसंस्पर्शी यावदाकल्पपरिमाण: विशतकौ विस्तरणादेः देनभ्रौ मुष्टिमित्यर्थः ।

- -

१- सहस्रवल्शा विवयं रुहेमेत्यात्मानम् । द० दर्शपूर्णमासप्रकाशः, पृ० १६३-१६५।
२- पृथिव्याः संपृचः पाहीत्यन्तर्निदधाति । तत्रैव ।
३- " प्रस्तरे यायावरो " । - तत्रैव , पृ० १६५-१६६ ।
४- " संनतं मुष्टिं लुनोति । - तत्रैव - पृ० १६३-१६६ ।
५- मुष्टिमात्रोऽरत्निः , प्रादेश ऊर्ध्वमुष्टिः , यान्यपि मुष्टिमध्या यदि वा तिर्यक् प्रमाणानि । मुष्टिमुष्टी गोग्रहो वा । यदस्मिन्नारत्निं प्रस्तरस्य मध्यमसाहित्यमरत्निः स्यादित्य प्रमाणम् । द्वादशाङ्गुलं विस्तार: प्रादेश:। तिर्यक् प्रमाणानि प्रस्तरस्यास्य न तु दीर्घत्वस्य । द० पू० प्रकाश: पृ० १६३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

सर्वत्र पूर्व स्वीकृता मात्रा ऊर्ध्वस्थि ऊर्ध्वाविण्, मध्यस्थि तत्प्रमाणम् । इयतीर्भव-
न्तीति सामान्यवचनः- प्रादेशमात्रवचनं क्वचिद्भवति । अनेनांमिताः कार्या
इत्यादौ तूष्णीमत ऊर्ध्वमयुजो मुष्टीन् लुनोति[1] , [2]त्रीन्वा पंच वा , सप्त वा
नव एकादश वा , यावतो वालं मन्येत । तूष्णीं शब्दस्य वागिन्द्रियव्यापार-
निवृत्तिविषयत्वान्मन्त्र मात्रं निवर्तते परिग्रहणादूर्ध्वं परिगृह्यते । अयं चाभि-
प्रायः- आधाने तूष्णीमग्निहोत्रे सर्वा तद्वचनात् अन्ये तूष्णीं ग्रहणादावृद्धे-
ऽपीति वृत्तिमिच्छन्ति । अत्र न शब्दार्थो , नलिंगं च दृश्यते । अयुज इत्येतस्य
विशेषणं त्रीन्वेत्यादि अत ऊर्ध्वमिति प्रस्तरनिवृत्त्यर्थमयुजो सर्वदा वचनं, पूर्वा
पर्याप्ता उत्तरोत्तरपरिग्रहार्थम् । यावतो वेति एकेनामन्यतरपरिग्रहे वा शब्दस-
मर्थितः स्यात् । तस्मात् स्तरित व्यवस्थितैरपर्याप्तत्वे उपर्युपरि संग्रहार्थः ।

शुल्ब करणम् ।

अथ त्रिरन्वाहितं शुल्बं[3] कृत्वा पश्चाद् वेष्ट्यात्यदित्यै रास्नासीति-
पूर्वं त्रिरन्वाहितं प्रदक्षिणमावेष्टक शरारज्जुं कृत्वा पश्चादपसव्यमंत्रेणावेष्ट-
यति । अन्ये - मंत्री निधानार्थ इति, तन्न सम्यक् छेदने व्यवायात्, तस्माददि-
त्यैरास्नासीत्युदीचीनाग्रं निधायेत्येवावधम् ।

शुल्बस्य करण इति अधिकरणं चतुर्थं स्यादिति बौधायनोऽधिकरण-
मेव तृतीयमिति शालीकिः । अधिकरणं प्रथमगृहीतं अनुक्रमाच्चतुर्थं युक्तमिति
अन्याधिकरणमेव तृतीयमिति निश्चितं संधेत्यादिवत् क्रियाविशेषणम् । अनु-

- -

१- द्र० दर्शपूर्णमास प्रकारो आप० दर्शसूत्रम् १-२-४ ।
२- प्रस्तरमेव मंत्रेण दाति तूष्णीमितरादिति वाजसनेयम् ।
- दर्शपूर्णमासप्रकारो दर्श०सू० १-२-४-८।
३-अदित्यैरास्नासीति त्रिधातु, पञ्चधातु वा शुल्बं करोति । धातुः संधिः शुल्ब-
मेकसरारज्जुः । यानि शुल्बानि समासं गच्छन्ति इतिलिंगात् । अत्र भारद्वाजः-
धाती- धाती मंत्रमावर्तयतीति । अत एव धर्मिणः शुल्बं करोतीति च ।
इति सू०वी० । दर्शपूर्णमास प्रकाशः १-२-४ ।
" रज्ज्वयवनाभिधानानामनन्वायुधिः" इति भाष्यवृत्ति । - तत्रैव- ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पश्चात्प्राङ्मुखाय इति । उदीचीनाग्रं निधाय तस्मिन्प्रस्तरमपि संनह्यति पुंसां[1] त्वा संनह्यामीति । तस्मिन्निति शुल्बस्याधिकरणनिर्देशात् प्रस्तरं[2] पूर्वं संनह्यतीति गम्यते । उपाग्रहणात् , उपवीती भावार्थत्वात् प्रस्तरस्योपरि मुष्टीनिति गम्यते । मंत्रविपर्यासस्तु पाठक्रमादर्थबलीयस्त्वात् । पुंसां त्वा संनह्यामीत्यस्य रास्नासीत्यस्मात्प्राक्पाठात् विपर्यास इत्यर्थः ।

बर्हिषः संनहनम्

बर्हिषः[3] संनहन इति तस्मात्पवित्रयन्ते यान्यन्यानि याजुषात् निधनानि तानिपूर्वाणि मंत्रेण संभृत्योपरिष्टाद्याजुषं मंत्रेण संनह्यतीति कात्यायनः । अत ऊर्ध्वं तानीन्यन्यानि याजुषात् निधनानि तानिपूर्वाणि तूष्णीं संभृत्योपरिष्टाद्याजुषं मंत्रेण संनह्येदिति । कात्यायनोपमन्यवौ च बर्हिषः संनहने याजुषमेवाग्रे मंत्रेण संभृत्य तूष्णीमितराणि संभृत्य विपरि[4]वृत्य ग्रन्थिं कुर्यादिति । संनहनैककरणं याजुषात् यजुषा संस्कृतात् प्रस्तरादित्यर्थः । अन्यानि यानि तानि प्रथमं शुल्बस्योपरि मंत्रेण संभृत्य उपरिष्टात् प्रस्तरमपि मंत्रेणेति प्रस्तरस्य प्रथमं ग्राह्यत्वादुपरि संनहनं मंत्रस्याविशेषोपादानात् , प्रतिमुष्टि याजुषत्वं च ःकल्पकानापेक्षं तूष्णीमितराणि याजुषमेव मंत्रेणेति शालीकिः । इतरस्या उपक्रमेणैव संनहनं याजुषमेव प्रथमं मंत्रेण एवं उपक्रमाविपर्यासो भवति । इतराणि तूष्णीं विपरिवृत्य ग्रन्थिं यथा प्रस्तरस्योपरि भवति तथा विपरिवर्त्य ग्रंथिं[5] कुर्यादिति । अत्र मुष्टयो निधानानीत्यनर्थान्तरम् , तूष्णीमपरां मुष्टिं करोतीत्येवकरणात् ।

१- अदित्यै रास्नासीत्युदगग्रं वितत्य पुंसां त्वा संनह्यामीति तस्मिन्निध्म- ग्राणि संभृत्याजुनिता यौनिरित्युत्तरे निधने प्रस्तरमत्याध्यायेन्द्राण्यै संनहनमिति संनह्यति ।

– द० दर्शपूर्णमासप्रकाशः , दर्श० १।२।५।

२- पुंसां त्वेति चाऽऽर्षः प्रतिनिधनम् । मध्ये मित्येवन्तरस्य निधनस्योपरिष्टा- त्प्रस्तरं निधाति । ३- बौधायन श्रौ० सू० २०-२-३-८।

४- द० श्रौ० सू० २०-२-३-८।८।

५- पूषा ते ग्रंथिं CC-0 Sampurnanand University Collection. Digitized by eGangotri ० ,पृ०१६७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

आपस्तम्बस्तु- ऊर्ध्वौ[1] मुष्टी लुनाति निधनानीत्याह। ऊर्ध्वमुष्टीनां संघातो निधनं , तानित्रायुधी भवन्ति।

निधनानां विधिमन्त्रसंवरणप्रतिनिधनं मन्त्रावृत्तिः स्वेत्येक वचनात् , तूष्णीमेकमन्तोऽपि प्रतिनिधनं संवरणसंवेऽपि एकधात न संवरेदिति, सन्नुह्यन्तीसन्नह्यन्ते सन्नहनमिति। संन्नहनं शुल्वेन सम्यक्परिवेष्टनम्। ग्रन्थिं करोति -" पूषा ते ग्रन्थिं ग्रथ्नात्विति।

स ते मास्थादिति पश्चात् प्रान्यम्भ्युपगूहति।" इति सूत्रं बौधायनस्य।

पुरस्तात्प्रत्यञ्चमिति शालीकिः। अथैतदुपच्छते - इन्द्रस्य त्वा॰ वह इति एतदुक्तविरित्यर्थः। शीर्षमधिनिधत्ते- बृहस्पतेर्मूर्ध्ना हरामीति। वस्त्रादिना वक्तदिशो शीर्ष्णीतिकेचित्। उत्तरुर्वन्तरिदमग्निवदीतिरत्यादरेण गार्हपत्यमस्तादधाति- " देवगमसीति " ॥ एत यथागतमन्तरेण वेदुत्करौ। तदुपरीव निधाति, यत्र गुप्तं भन्यते यथास्थापनकाले प्राचीनमुपस्थापयितुं योग्यो भवति, तथा निदधाति। तूष्णीं परिभोजनीयानि लुनाति। यद्यपि इत्युक्तं तथापि बर्हिर्लवनकाल एवेति द्रष्टव्यं, न पुनर्निधाय गत्वा। पुनस्तूष्णीं ग्रहणस्य प्रयोजनं पूर्वेषांयावुणत्वेऽपि तेषां तूष्णीमेवेति। अन्य आह-" वा निवृत्यमिति। ततश्च पूर्वेषां तूष्णीकत्वपदीप्याकन्ननिवृत्ती सकृदाच्छिन्नं पितृभ्यवाच्छिन्नानि बर्हिर्लवनकाल इतिपूर्ववत्। कर्यादिनावस्थायामितिगम्यते।

इध्म करणम्

अथ तथैव त्रिरन्याशिनं[2] शुल्वं कृत्वैकविंशतिदारुमिध्मं[3] सन्नह्यति-

---

१- आपस्तम्बश्रौतसूत्रे ध्यायुणयः सप्तमाम्बुः। बर्हिः सूर्यस्य रश्मिभिरुषसां केतुमारभ इति बर्हिरासन्न इन्द्रस्य त्वा बाहुभ्यामुद्यच्छ इत्युपच्छते। बृहस्पतेर्मूर्ध्ना हरामीति शीर्षमधि निधत्ते। पु० च व०पृ० ५०, पृ० १६६।

(तै०टि० च० पृ०३०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

यत्कृष्णो॰ ४ सम्भृतेति । त्रयीतिसिद्धे त्रयीतिसिद्धे मिरन्याजिग्रहणं
मंत्रनिवृर्त्यर्थम् । एकविंशति ग्रहणं
नित्यत्वात् । सम्भरणस्य प्रकारांतराभावात् १, दारु प्रकारार्थः। क्वानित्यादि-
रिमिती पदौ मंत्रनिवृत्त्यर्थम्, इतरस्मिन्पदे कार्यत्वात्। नैमित्तिकेषु
निमित्तं नु खलु नित्यमपि, काम्यनैमित्तिकानां नित्यविकारत्वाद् :।
अपरिमितपदे पदलोपः, मंत्रनिवृत्तौ च प्रकृतिवत् भावाद्यसाम्यर्थाद् च दोष
क्षणात् । अपरिमितध्वेत्युच्यमाने प्रकारस्याभावात् प्रकृतिवत् स्यात् । प्रका-
शोपादेर्ध्मसंख्याप्रकाशनात् । अत्र च यावन्त इध्मउपादास्तावत्संख्या निधातव्याः।।

२- अप्कृतानामुतोऽकृतानां वा कर्मणां पूर्वकल्पं कृत्वादिपरं- चितत्वं। अप्कृतामृ निवर्तो मित प्रतिषेधार्थः। स्वरः- शुल्क इति उपदेशः।(द० दर्शपूर्णमास प्रकाशः पृ० १००)।

३-" खादिरं, पालाशं, वैकविंशतिदारुमिध्मं करोति"

अभिन्नं दारु स इत्यान्यारुणि वाऽऽहरन्निति व्यपदेशादिति दारुरूपत्वे: पुनर्व्यपदेशादेकविंशति दारु इध्मःखादिरः पलाशो वा । इध्मेन एकविंशति संख्यानिर्देशादप्रकृतौ परिधि समिन्धो ध्माभावान्निवृत्तिः । भा० वृ०

दार्वभिन्नं काष्ठं शकलान्याहुरिति वैतिदर्शनात् । ब्राह्मणे त्वेकविंशति-रिध्मदारूणि भवन्तीत्युपक्रम्य पञ्चदशेध्म दारूण्यभि दधाति त्रीन्परिधीन्परि-दधाति ऊर्ध्वे समिधावादधाति अनूयाजेभ्यः समिधमतिशिनष्टीत्येक विंशत्या विभाग उक्तः। इति वृ० टी० ।

(द० दर्शपूर्णमास प्रकाशः, पृ० १७०)

४- यत्कृष्णोरूपं कृत्वा प्राचिदश्वं अनक्षरेषु ।ततस्त्वाभिके विंशतिधा संभरामि सुसंभृता । त्रीन्परिधींस्तिस्रः समिधो यज्ञायुरनु संचरान् । उपवेषं , मेक्षणं, धृष्टिं संभरामि सुसंभृतेतिशुल्ब इध्मं संभरति ।

द० दर्शपूर्णमास प्रकाशः , पृ० १७६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

याः पुरस्तात्स्रुवन्तीत्याद्धिक्रकादयो मंत्रा यथालिंगं प्रणीता प्रणयनादौ द्रष्टव्याः । इमंसा प्राग्नेनेति । यद्यपि मन्त्र, एव स्वयं कर्म प्रब्रूही इति परिभाषावशेन अप्राकरणिकार्थ एव परिभाषाप्राकरणिकानां विशेषवि-नियोगवचनाच्च:। प्राकरणिकत्वात्प्रकरणे चाम्नानाद्विकल्पः । विशेषवचनं निष्प्रयोजनं । यथा- वत्सुण्णौ रूपं जितवत्यौ दर्भ इत्येवमादीनां[1] नटयांसि विशेषे प्रकरणे बाधानं युक्प्रकरणाम्नातानामाहृत्यौकानां चानित्यत्वमि-तरेषां विकल्प इत्येव विशेषः । इध्मस्य करण इति पञ्चामिधेनी इध्मं कुर्यादिति[2] बोधायनोऽपरिमितामितिशालीकिः। दारुशब्दः समिदादित-काष्ठवचनः। शाकैः परिधिभिः शल्कैरग्निमिति च विशेषवचनात् ।

प्राकणे एकविंशतिमिध्मदारूणिभवन्तीति प्रस्तुत्य पञ्चदशेध्मदारूण्य-भ्या दधाति । त्रीन्परिधीन्[3] परिदधाति ऊर्ध्वे समिधावा दधाति । अनुया-याजेभ्यः समिधमितिशिनष्टीत्येकविंशत्या एव प्रकृतौ विभागवचनादेकविंशति-संख्यैव नित्याऽवगम्यते । इह विशेषावचनाल्लक्षणाया परिणाह इध्मः। खादिरः[4] पालाशो वैध्मस्तथा रैलाभैयज्ञीयानां[5] वृक्षाणामन्यतमस्य बोधायनः । उरःसंमितो मध्यमःस्या(स्या)दथेतरौ बाहुमात्रौ स्यातामिति सर्व एव बाहु-मात्राःस्युरिति शालीकिः ।

<u>अथाह आपस्तम्बः:-</u>

" खादिरं पालाशं[6] वैकविंशतिदारुमिध्मं करोति । इध्मः परिधयः पालाश-

- -

१- मध्ये वा सुष्ठुं वा ।

२- द्र० बौ० श्रौ० सू० २०-२-३-८।८ ।

३- इध्मः परिधयः तेषु इध्मः परिधानार्थः " परिधय इति समाख्यानात् ।

४- द्र० दर्शपूर्णमास प्रकाशः , पृ० १६६ ।

५- " उक्तानामभावे यज्ञियाः " (इतिभाष्यवृत्ति) तदभावेऽन्यस्याप्ययज्ञियस्य वृक्षस्य इति (सू०वी०) द्र० दर्शपूर्णमास प्रकाशः , पृ० १६६ ।

६- द्र० दर्शपूर्णमास प्रकाशः, पृ० १६६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

काष्ठर्य- खदिरौदुंबर- बिल्वरौहितकविकंकतानां ये वा यज्ञीया वृक्षावार्द्राः, शुष्का वा , सत्वकाः, स्थविष्ठोऽधिष्ठःपोऽणीयान्द्राधीयान्दक्षिणार्ध्यो -ऽणिष्ठोऽधिष्ठ उत्तरार्ध्यो, [1] यथारुचि पिधावन्मूलाज्जनिमैकविंशतीति। इध्म-सन्नहने च शंपस्यौदग्राग्निधानेध्मसंभरणग्रन्थिकरणादिनूह्नाम्यो निधानान्यपेक्षि-तत्वात् । बर्हिष्युक्तान्यूत्कालिकान्यनुष्ठ्यन्ते । वेदं करोति, वत्सज्ञुं[2] पशुकामस्य, मूलकार्यमन्नाद्यकामस्य विद्रुतं तेजस्कामस्योर्ध्वाग्रं स्वर्गकामस्य ।

वेदार्थो मुष्टिः बर्हिष्काल एव ग्रहीतव्यः परिभोजनीयेभ्यो वा परि-भोजनीयानामपेक्षितसन्नार्थत्वात् । परितो मुञ्चन्ती उपकुर्वन्तीति वत्स्यार्थत्वात् । वत्सज्ञुः शयितवत्सजानुवद् । मूलवत्कार्यं मूलकार्यम् । मूले बध्वा शिखावस्थितम् ऊर्ध्वाग्रमूले बध्वाच्छिन्नः । कल्पान्तरस्यानुपादानादेतद् एव नित्यार्थेऽपि, नित्य एव कामाः तात्पर्याख्यत्व वाचार्याभिप्रायश्च ३।६। लोगाक्षेकाचार्यादिनाकाम्नाम्नन्येन वचनात् ।

वेदकरणम्

तथा वेदस्य करण इति । वत्सज्ञुं कुर्यादिति बौधायनो, मूलकार्यमिति शालीकिर्विद्रुतमित्यौपमन्यवः, ऊर्ध्वाग्रमित्यौपमन्यवीपुत्र इति कल्पे कामनिर्मुक्त एव ३।६ विकल्पः। विनाऽपि कामनया अध्ययनात् तस्य नित्यत्वेन कामः। वेदं [3] शुल्वेन बद्ध्वा शुल्वादूर्ध्वं प्रादेशे प्रच्छिद्य वेदाग्रं संलुनाति । वेदिं करोतीत्याग्नेरा-त्परिग्रहणात् । यद्य वेदमादाय इत्यारभ्य पूर्णमुदरमित्येतस्मात् प्राक् करोति ।पुनराग्ने-निर्माणकालं समाम्नातम् ।

अमावास्येन वा पौर्णमासेन वेत्यनुष्ठानक्रम विपर्यासेन समाम्नातं, तत्र-

---

१- बु० दर्शपूर्णमास प्रकाशः, पृ० १६६ । सूत्र ६-७-८-९-१०

२- वत्सज्ञं, पशुकामस्य मूलकार्यमन्नाद्यकामस्य विद्रुतिरसं ब्रह्मवर्चसकामस्य। वत्सज्ञुः वत्सजानुतुल्यः, मूलवत् क्रियते यत्र धान्यनिर्धापको , मुञ्जो धान्यकापनार्थं तृणपुञ्ज सम्मीश्र विशेषः । अन्नाद्यंभोजन शक्तिर्वा ।दर्शपूर्णमास प्रकाशः पृ० २०४।

३- शुल्वात्प्रादेशे परिमाय्य वेद परिवासनानि निधाति । शुल्वात् = बन्धन शुल्वात् । वेदपरिवासनानि = वेदाग्राणि । इति बु०श्रौ० दर्शपूर्णमास प्रकाशः, पृ० २०५।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पूर्वोक्तस्य पूर्वमितरथितरस्य व्यतिकरणं कथं स्यादिति अनन्तरं पिण्डपितृयज्ञाम्नानात्[1] पुनरपि दर्शेष्टिक्रमात् तत्र चोपधानन्तरं समाम्नानात् शाखान्तरे चामावास्यायां पूर्वमपि करोतीत्युक्तत्वाच्च ।

पिण्डपितृयज्ञविचारः

अथापराह्णे पिण्डपितृयज्ञेनचरति । शाखान्तरेऽमावास्यायामपराह्ण इतिवचनात् दर्शयोगे सोऽमावास्यां प्रत्यागच्छतीति अमावास्यायामपराह्ण इति गम्यते । तच्च दर्शांगम्, अग्निहोत्रकल्पानन्तर्यं स्वकालार्थत्वाभिप्रायेण वचने प्रकरणादंगत्वप्राप्तः स्यादितिलिंगं चानंगत्वे पौर्णमास्यामेव कुर्यात् । प्रातुरत्वा-म्नामावास्यामित्यमावास्याप्रतिषेधेऽपि[2] पिण्डपितृयज्ञेन चरेदित्यापस्तम्बोक्त इति ।

कर्म वा दर्शपूर्णमासप्रकरणेतत्कर्मवचनात् ।

यज्ञकर्मादिति बौधायन इति वचनात् । दर्शपूर्णमासेषु , तदेषु विसृष्टायामन्वाहार्यदानादौ पिण्डपितृयज्ञं कुर्यादिति न ।

अथ कात्यायनः-

अपराह्णे पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायाम् । अत्र कर्मांगत्व-र्मनुविधित्सता चार्थेनाऽपौर्णमासमनु विहितम् ।

१-अमावास्यायां यदहश्चन्द्रमसं न पश्यन्ति तदहः पिण्डपितृयज्ञं कुरुतेऽपराह्णे पिण्डैर्युक्तः पितॄणां यज्ञः 'पिण्डपितृयज्ञः' स च कर्मान्तरं न तु दर्शांगः । यदह-श्चन्द्रमसं न पश्यन्ति चन्द्रदर्शनं प्रतिपदि वा तदहः कुरुते । तथा दृश्यमाने सूर्याच्च स्वाभूयी कला इति । तस्यागाद् षष्ठिकृष्णपूर्वे वा पिण्डपितृयज्ञेन चरन्ति । यस्मिन् वृक्षाणामुपरि यस्मिन्काले सूर्यरश्मयो निविशन्ते सोऽधिकृतसूर्यकालः ।

द्र० दर्शपूर्णमास प्रकाशः, पृ० १८० ।

२- पितृयज्ञः स्वकालविधानादनङ्गं स्यात् । 'तस्मात्पितृभ्यः पूर्वेद्युः क्रियते' इति दर्शपूर्णमासप्रकरणदर्शनात् कर्ममध्यवर्तित्वादङ्गत्वे प्राप्त उच्यते- 'अनङ्गं पिण्डपितृयज्ञः स्यात् ।' कुतः ? स्व काल विधानात् 'अमावास्यायां अपराह्णे पिण्डपितृयज्ञ' इति (सू० श्रौ०) प्रकरणात् लिङ्गाद्वचनाद्विधानाच्च श्रुतिभ्योऽनङ्गम्

द्र० मी० शा०भा० ४-४-१९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इदानीं श्रुतिमन्त्रप्राप्तस्य दर्शस्यानुविधानं कर्तव्यम् । तत्र प्राक्कालीनः पिण्डपितृयज्ञः, सोऽनुविधीयते ।

अमावास्यायामह्नः पूर्वभागः[1] पूर्वाह्णः अपरभागो पराह्णः, तृतीयभाग इत्यपरे । वाजसनेयिनाम् पूर्वाह्णो[2] वै देवानां[3], मध्यन्दिनो मनुष्याणामपराह्णः पितॄणामिति । पिण्डपितृयज्ञ इति पिण्डदानकर्मनाम, कर्मानुग्रहात् संज्ञायाः । पिण्डैः पितृयज्ञः पिण्डपितृयज्ञ इति । होमस्यच तावदुपवर्णनात् । स दैवैः प्रवृत्तोऽथैतत्पितृभ्यो ददातीति । नास्ति नु स्वोऽन्नमिति च प्रकृत्य । यवतैवेण न पुरस्तात्पश्चादिवाऽथैतत्पितृभ्यो ददातीत्यादि- स पिण्डदानमेवाभिधीयते । न अपहोमादिप्रयोजनं तत्करणे न प्रवृत्तिः । चन्द्रादर्शनममावास्यां[4] विनापि भवति तन्नामुष्विस्य(त्य) मावास्यया विशेष्यते । तदेवाप्युक्तामिति चेन्न । अमावास्याशब्दस्य कर्मविषयताऽपि श्रूयते । " चतुर्दशीपौर्णमासीममिष्टितु च न्वहोत्रानावास्यामिति " तत्र को दोषः ? चतुर्दश्युपवासपदोऽपि प्राप्नोति । अस्तु तथेति चेन्न श्रुतिविरोधात् । एतदेव न पुरस्तान्न पश्चादिव इति अनेन च द्योत्यते । तस्मिन्दीर्घे ददातीति श्रुतौ । स च परमदायः । इतरस्तु प्रत्यक्षेन भवति । एवं च इति पर(म)दायविशिष्ट एव काले पिण्डपितृयज्ञमान्वीति । यथा राज्ञि हायुद्रे प्रतापस्थे अमावास्ये दाशायणः पक्षे च सर्वकामावास्यायां दृष्टेऽपि[5] चन्द्रमस्यपूर्वाह्णे परमदाय इति क्रियत एव एतदैवेणन पुरस्तान्न पश्चादिव इति परमदायोपलक्षणार्थत्वात् । तस्मिन्दीर्घे ददातीत्यपदिशतो ददात् । एवं कुर्यात्तदैन्यच्च पितृभ्य इति ।

- -

१- पु० कात्या० श्रौ० सू० कर्मभाष्य ४-१-१।

२- पूर्वाह्णो देवाः, माध्यन्दिनो मनुष्याः, अपराह्णः पितरः" । इति

पु० ३० ब्रा० १६-२-१२-२२-१२।

३- का० श्रौ०सू० ४-१-१ ।

४- " चन्द्रादर्शनं " इति ।

५- " चन्द्रमसि " इति शुद्धं वा ? ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

चतुर्दश्युक्तपक्षेऽमावास्यायां पूर्वाह्णे दर्शयागः । तत्र चापराह्णे पश्चात् पिण्डपितृयज्ञः । अमावास्योपवसथपक्षे पूर्वं प्राप्नोति , तत्र यस्मिन् प्राप्तत्वात्- पूर्वेऽह्णात् , पूर्व एव दर्शात् पिण्डपितृयज्ञः न पश्चात् कुत एतत्? धर्मत्वात् । धर्मप्रतिपादकवाक्यात् -" पूर्वेद्युः पितृभ्यो यज्ञं निष्क्रीय, प्रातर्देवेभ्यः प्रतनुते" इति ।

अतोऽमावास्यायामेव भवति इत्यलमधिकं

पिण्डपितृयज्ञस्याङ्गत्वविचारः

इदानीमिदं विचार्यते- किं पिण्डपितृयज्ञो दर्शाङ्गमुतानङ्गमिति । किं तावत्प्राप्तं, पिण्डपितृयज्ञः प्रकरण-[१] काललिङ्गानुवचनानाहिताग्निश्रुतिभ्योऽङ्गम् । अनङ्गमिति प्राप्तम्। कुतः , प्रकरणभेदात्। प्रकरणपठितं ह्यङ्गं भवति । न चायं तत्प्रकरणे पठ्यते । किं च- कालभेदात्, पूर्वाह्णेऽपराह्ण इति । अङ्गानां चैककालता भवति । अपि च लिङ्गं भवति -" यदमुना गृहीतः पौर्णमासेनेज्येत, पिण्डपितृयज्ञेनामावास्यामकृत्वा इत्यमावास्यामन्तरेण पिण्डपितृयज्ञं दर्शयति । तस्मादनङ्गत्वमुपपद्यते । अनुवचनं चैव भवति, पृथक् दर्शनात् -" अमीषां पिण्डपितृयज्ञोऽन्तरितोभवतीति । यद्यङ्गं स्यात् , अमीषामामावास्यं हविरन्तरितं भवति, इत्युक्तं तदा चैत्यमावास्याङ्गत्वेनानुवृत्तेऽपि(पि)ण्डपितृयज्ञोऽनुवचनं पृथक् नोपपद्यते । अपि चानाहिताग्निश्रुतिर्भवति ।

" अप्यनाहिताग्निना कार्य-" इति धर्मत्वे भवति दर्शो न क्रियते । अतोऽप्यनङ्गमिति ।

" अङ्गं वा[२] समभिव्याहारात् " । अङ्गमेव पिण्डपितृयज्ञः। कुत एतत्,

---

१- पू० मी० सू० शा०भा० ४-२-२६-३० ।

२- तत्रैव ४।२-३० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समभिव्याहारात् । समित्येकीभावे । एकीभावेनाभिव्याहरणं समभिव्याहारः । तस्मात्सहाम्नानादित्यर्थः । "पूर्वेद्युः पितृभ्यो दत्तं निष्क्रीय प्रातर्देवेभ्यः प्रक्रमेत्" इति । यच्चयेन विना न भवति तदर्थम्, तादर्थ्यलक्षणं च शेषत्वम् । तस्मादङ्गमिति । यत्तु प्रकरणभेदात् अनङ्गमिति तन्न, प्रकरणान्तरसमधीतमप्यङ्गं भवत्येव । यथा- प्रयाजः सौत्रामणी च भिन्नकालमप्यङ्गं भवति । यथा- अग्निहोमार्थमुद्धरणं लिङ्गवचने द्रष्टव्यम् । अनुक्तवचनं अर्थवादः, यत्तोऽप्युपपत्तीऽप्यनाहिताग्निना कार्यमिति वचनात् । तस्मात् अङ्गं पिण्डपितृयज्ञ इति ।

<u>आपस्तम्बः:-</u>

अमावास्यायां यदहश्चन्द्रमसं[1] न पश्यन्ति तदहः पिण्डपितृयज्ञं कुर्वत इति ।

<u>अत्र रुद्रदत्तः:-</u>

पिण्डैः पितृणां यज्ञः पिण्डपितृयज्ञः । स च कर्मान्तरं, न तु दर्शाङ्गः । यथा वक्ष्यति पितृयज्ञः स्वकालविधानादनङ्गं स्यादिति । तन्मध्यापदेशस्तु पर्वोत्तरकालमध्यपातात्, तं च यदहश्चन्द्रमसं न पश्यन्ति पञ्चदश्यां प्रतिपदि वा, तदहः कुर्वते, यदहस्तयोः सन्धिस्तदहरित्यर्थः । तथा दृश्यमाने तूपोष्यस्वभूते यजत इति सत्याषाढः ।

<u>अत्र धूर्तस्वामी-</u>

यदहश्चन्द्रमसं न पश्यन्तीति वचनात् नष्टचन्द्रायां प्रतिपत्पराह्णे मासिपितृभ्य इति लिङ्गादिति । पिण्डपितृयज्ञं करिष्यन्नुपकल्पयते - सकृदाच्छि[2]न्नं बर्हिर्भागपरिस्तरणीयात्, व्रीहींश्च शूर्पं च, प्रदात्रितं चोलूखलमुसले,

- -

१- द० दर्शपूर्णमास प्रकाशः पृ० १८० सूत्रदीपिका भाष्यम् ।

२- यदा मेध्यं यज्ञियमिति समूलं सकृदाच्छिन्नं बर्हिराहरति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्थालींसस्रुवां, वेदाणमेरकोपबर्हणौ,[1] आंजनाभ्यञ्जने, वशां, स्फ्यमुलूकुम्भं, यज्ञायुधानीति । सस्रुवाचिह्नमित्यन्वर्थसंज्ञा । उलूखलं मार्जनार्थः। यज्ञायुधग्रहणं कृष्णाजिनाज्यस्थाली- पिण्डोद्धरणपात्रादिसंग्रहार्थम् । पिण्ड-पितृ- यज्ञप्रकरण इति, तदुक्तम्- बौधायनः। यावित एव प्राचीनावीतं कुर्वीत प्राचीनावीत्येव स्यादमन्त्राणां सोमावाक्षोत्क्रिष्यन् यज्ञोपवीतं कुर्वीत । यज्ञोपवीत्येवस्यादसन्त्राचिह्नस्य स्तरणात् सन्त्राचिह्नंस्तरिष्यन् प्राचीनावीतंकुर्वीत, स प्राचीनावीत्येव प्राजापत्या तिष्ठेत्यमोऽस्मात् शालीकिः यावित एव प्राचीनावीतं कुर्वीत, स प्राचीनावीत्येव स्यादप्राजापत्यादौ यज्ञोपवीत्येव प्राजापत्ययर्च्चा गार्हपत्यमुपतिष्ठेतेति[2] ।

पिण्डपितृयज्ञेतिकर्तव्यता

अथ सपत्नीको यजमानः- प्राचीनावीती- "पिण्डपितृयज्ञेन यक्ष्ये"[3] इति संकल्प्यान्वाहार्यपचनमुपसमाधाय परिसमुह्य, पर्युक्ष्य अन्वाहार्यपचनं परिस्तृणाति[4] । अन्वाहार्यपचनग्रहणात् परिस्तरणमितरयोः। दक्षिणा प्रागग्रैः परिस्तीर्यतमुत्तरेणैकं संसादयति । यौचित्याद्दर्भेषु सादनं एरकोपबर्हणे आंजनाभ्यञ्जने वशां स्फ्यमुलूखलं यज्ञायुधानीति । तानि च(ज्य)स्थालीसमेक्षणमाज्य-

- -

१- दक्षिणा प्रागग्रैर्दर्भैर्दक्षिणमग्निं परिस्तीर्य दक्षिणतः पश्चाद्वा दर्भान्संस्तीर्य दक्षिणाप्राक्चैकशः पिण्डपितृयज्ञपात्राणि प्रयुनक्ति, स्फ्यं, वेदाणं, कृष्णाजिनमुलूखलं, मुसलं, शूर्पमाज्यस्थालीं चरुस्थालीं येन चान्येनार्थो भवति ।

पश्चात् पुरस्ताच्च दक्षिणाग्रैः प्रागग्रैरितरैरित्यर्थः । दक्षिणप्राक्‌ दक्षिणाप्राक्चेति कोण दिक्परिमाणः । येन चान्येनार्थो प्रयोजनात् भवति तदपि प्रयुनक्ति । अथोपस्तरणार्थां दर्वीं निर्वापार्थं ,मृन्मयपात्रं, कशिपूपबर्हणादीनि च।(द्र० दर्शपूर्णमास प्रकाशः , पृ० १८१-८२)।

२- बौ० गौ० सू० २०-२०-८२१ ।८ ।

३- अध्वर्युरुपवीती स्थालीमेकपवित्रेणान्तर्धाय तया दक्षिणतः शकटादधि निर्वपत्युत्तरो वा । उपवीती भूत्वा दक्षिणतः शकटस्य दक्षिणार्धात् कस्मिंश्चित्पात्रे निर्वपति शकटान्निष्क्रम्य दक्षिणतिष्ठीशंयु । प्राचीनावीत्येव वा सन्नुरतः।

(शौ०टि०अ०पृ० ५०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्थालीं स्रुवं, कृष्णाजिनं शूर्पमुलूखलमुसलं प्रोक्षणपात्रमित्येतान्यद्भिः सादयित्वा
प्राचीनावीतं कृत्वा जघने न्वाहार्यपचनमुपविश्य पवित्रवत्यां स्थाल्यां व्रीहीन्निर्वपति
" पितृभ्यो जुष्टं निर्वपामीति वा तूष्णीं वा । अग्निहोत्रहवण्या निर्वपति चतुष्कृत्व
इति श्रुतिः । उपर्यधःस्थालीं कृत्वा, उपर्यधोऽमिति परिगृह्णाणः। अग्निहोत्र-
हवण्या तूष्णीं प्रोक्षणीः संस्कृत्य - पितृभ्यो वो जुष्टं प्रोक्षामीति, व्रीहीन्प्रोक्ष्य

- -

४- दक्षिणतः प्राचीनं व्रीहिमुलूखलमवस्थितं भवत्यध्वर्युः पत्नी स्थालीमेक
पवित्रेणान्तर्धाय तया दक्षिणतः शकटादधि निर्वपत्युत्तरतो वा तां पूरयित्वा
निमार्ष्टि मृन्मये निर्वपति पितृभ्यो वा जुष्टं निर्वपामीति तूष्णीं वाऽपरेणान्वा-
हार्यपचनं प्रत्यग्ग्रीवे कृष्णाजिन उलूखले प्रतिष्ठिते दक्षिणा प्राची तिष्ठन्ती पत्न्य-
वहन्ति परायावपवितेकम् ।

५- परिस्तीर्य तं पूर्ववत्पात्रासादनमेव । द्र० दर्शपूर्णमासप्रकाशः, पृ०१८३।

६- मृन्मये निर्वपति पितृभ्यो वो जुष्टं निर्वपामीति तूष्णीं वा ।

द्र० दर्शपूर्णमास प्रकाशः , पृ०१८३ ।

७- अग्निहोत्रहवण्यां चतुरो मुष्टीन् निर्वपति" इत्यनेन वचनेन सव्यहस्ते शूर्पं निधाय
तस्योपरि अग्निहोत्रहवणीं मुखाग्रां निधाय प्राङ्मुख आसीनः" ॐ देवस्यत्वा सवितुः
प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टं गृह्णामि इत्यनेन मंत्रेण
त्रिवारं मुष्टिना हविरग्निहोत्रहवण्यां प्रक्षिप्य चतुर्थवारं तूष्णीं प्रक्षिपेत् । ततः
चतुर्गृहीतं हविः- शूर्पमध्ये दक्षिणपार्श्वे प्रक्षेपणीयम् , उपकल्प्या सम्पाद्यर्थम् ।

द्र० कातीयेष्टि दीपकः पृ० १० ।

८-

९- ॐ " प्रवद हविः प्रोक्षिष्यामि" इति ब्रह्माणं पृच्छेत् । ततो ब्रह्मा- ॐ प्रोक्ष
यज्ञं देवतावर्धयत्वम्" इत्यादि धेहीत्यन्तमुपांशु पठित्वा-" ओं प्रोक्ष" इत्युच्चैः अध्वर्यु-
मभ्यनुजानीयात् । ततोऽध्वर्युः- प्रोक्षण्याः सकाशादुदकं सपवित्र हस्तेनादाय" ॐ
अग्नयेत्वाजुष्टं प्रोक्षामि" (य०अं० १३) इति मंत्रेण शूर्पस्थं हविः प्रोक्ष्य" ॐ अग्नि-
षोमाभ्यां त्वा जुष्टं प्रोक्षामि। (य०अं० १-१३) इति मंत्रेणाग्नीषोमीयं हविः
प्रोक्षेत् । द्र० का०दी० पृ०१०-११ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तूष्णीं पात्राणि प्रोक्षति । अथैतस्मिन्नेव चर्मण्युलूखलमुसले निधायावहन्ति ।
सकृदेव दक्षिणाभिमुखी न विविनक्ति । चर्मणि कृष्णाजिने उलूखलमुसले निधाय, व्रीहीनोप्य दक्षिणामुखो यजमानः पत्नी वा फलीकरणादवहत्य[1] शूर्पमुपादाय पराङ्मुखो विविच्य प्रक्षाल्य तस्यामेव स्थाल्यां सिरःपवित्रमप आनीयान्वाहार्यपचनेऽधिश्रित्य सिरः पवित्रं तण्डुलानावपति ।

आज्यं निरुप्याज्यमधिश्रित्याग्निं पर्यग्निकृत्वाज्यमुद्वास्योत्पूय मेक्षणं, स्रुवं च सम्मार्ष्टि । अथैतं चरुं श्रपयित्वाऽभिघार्योदञ्चमुद्वासयति[2] ।
अथ यज्ञोपवीतं कृत्वाऽन्वाहार्यपचनमुपसमाधाय मेक्षणेनोपहत्य, तिस्र आहुतीर्जुहोति।

१- सोमाय पितृपीताय स्वधा नमः स्वाहा । सोमाय पितृपीतायेदम्
२- यमायाङ्गिरस्वते पितृमते स्वधा नमः स्वाहा यमायाङ्गिरस्वते पितृमत इदम् ।
३- अग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः स्वाहेति, दक्षिणार्धपूर्वार्धे जुहोति ।

अग्नये कव्यवाहनाय स्विष्टकृत इदम् ।

आहुतीनां होम[3] इति सूत्रं- बौधायनस्य, न मध्यमाहुतिं जुहुयात्, मेक्षणमेव तृतीयं स्यात् इति शालीकिः। तूष्णीं मेक्षणमग्न्याधाय प्राचीनावीतं कृत्वा दक्षिणेनान्वाहार्यपचनं स्फ्येनोद्धत्यावोक्ष्य रेखारूपेण सकृदेवोद्धननम्। अपहता असुरा- इत्युद्धननम् ।उदीरतामित्यद्भिरवोक्षणमिति पूर्वेद्युः ।तद्दक्षिणाग्रं सकृदाच्छिन्नं बर्हिःस्तीर्त्वा सकृदाच्छिन्नं बर्हिरूर्णाम्रदु- स्वाहेति। सकृदाच्छिन्नस्य स्तरणमिति । निष्क्रम्यान्यागाराद्दक्षिणे पूर्वोत्तरे देशे सकृदाच्छिन्नं- -

१-" उलूखले करोति" द्र० दर्शपूर्णमास प्रकाशः पृ० १८३ ।

फलीकरणं नाम कणापाकरणार्थस्तण्डुलाघातः।अपरेणान्वाहार्यपचनं प्रत्यगुदग्ग्रीवे कृष्णाजिने, उलूखले प्रतिष्ठितेदक्षिणाप्राची तिष्ठन्ती पत्न्यवहन्ति पराघातमविवेकम् ।अविवेकं अविविच्याविविच्य सू०वी० द्र०दर्शपू० प्र० ,पृ०१८३-८४।
समाहननं च हननादग्नी त्वर्थलुप्तम् । तेन अध्वर्य्वेऽपि अध्वर्यौ अग्नीदेव कुर्यात् ।
समाहननं च अदृष्टोपकारकः पदार्थः तेन यावदुक्ते निवर्तते । पत्नी आग्नीध्रो वा

CC.O Sampurnanand University Collection. Digitized by eGangotri

हविषः कण्डनं कुर्यात् ।पितृणामनूतेषु व्रीहिषु स एव - " ओं

CC.O Sampurnanand University Collection. Digitized by eGangotri

४

न्यं स्तृणीयाद्दक्षिणतश्चोल्मुकमुपस्थापयति च बौधायनो मन्यते विशेषमिति शालीकिः । न चाप्युल्मुकमुपस्थापयति ।

अथ बर्हिषि उत्थाय दक्षिणामुखः प्राञ्चलिः प्रह्वः पितॄनावाहयति ।

उशन्तस्त्वा० इत्यनुमन्त्रयति । अमीभ्यः पितृभ्यो एतत्पित्र्येण त्वयि आसनं इदं अंकारा इति । अलंकृतेन दर्भेणाग्रेण स्फ्याच्छिन्ने बर्हिषि दक्षिणापवर्गमार्जयति । मार्जयन्तां पितरो मार्जयन्तां पितामहा मार्जयन्तां प्रपितामहा इति प्रतिमन्त्रम् । अथ परोक्षेषु पिण्डं कृत्वा स्फ्याच्छिन्ने बर्हिषि पूर्वापरदक्षिणाभिर्धारितास्वेव पिण्डान् ददाति । एतत्ते तात ये च त्वामन्वेतत्ते प्रपितामह ये च त्वामन्विति प्रतिमन्त्रम् । यत्रानित्यस्य स्थाने संख्यानाम् ग्रहणं पितामहीनाम् । कथं नु जीवपितुः पिण्डदानं भवतीति- येभ्य एव पिता ददाति तेभ्यः पुत्रो ददाति । द्वाभ्यां जीवपिता ददाति । एकस्मै जीवपितामहो न जीवन्तमति दद्यात्- इत्येके । पितृव्यस्य (दद्यात्) येषु सगोत्रस्य दायमुपयच्छेत् कथं तत्र पिण्डदानं भवतीति यस्मिन्काले पितृव्यस्य दद्यात् । यत्र येषु सगोत्रस्य दायमुपयच्छेत् कथं तत्र पिण्डदानं भवतीति स्वीन्याचित्वा प्रतिपद्य बर्हिर्लोम्नां वर्हिः- प्रभृति-

- -

इति मंत्रेण एतेन सूर्यगृहीत्वा ॐ प्रतिष्ठा वर्णायुक्तेषु इति मंत्रेण कपिण्डं दधि, उलूखले निधाय कुल- सूर्यं निदध्यात् । ॐ पराम्रुः ददा: पराम्रुः वक्तव्यः इति मंत्रेण शूर्पेण निष्पूय तुषान् पृथक् कृत्य, अप उपस्पृश्य "कर्ता पावन्ते विविनक्ति" इति मंत्रेण अपिहितान्तर्धानेन तण्डुलान् निविष्य (पृथक् कृत्य) कैण्डान्यन्तस्य कण्डितान्पुनरुलूखले प्रक्षिप्य कण्डनं कृत्वा पुनर्निष्काष्य सूर्यं कृत्वा तुषान् पृथक् कुर्यात् । ये मेक्षणे पूर्णाहुत्याः संक्लिष्टास्तण्डुला जीवतण्डुलावोपनाय तथा व्यपरोतः । तानेव स्त्रीयामाहुतिमन्त्री अश्यपाकाय कृत्वा मेक्षणमन्त्री सूर्णो प्रक्षालितव्यः ।

- पु० दर्शपूर्णमास प्रकाशः, पृ० १८६।

२- उत्पूतेन नवनीतेनानुत्पूतेन वा सर्पिषा स्थालीपाकः ।

३- पु० बौ० श्रौ० सू० २०-२१-४०।८।

४- बौ० श्रौ० सू० २४।३२।२६८।८।

५- यजमानो वा ऊर्ध्वं प्राचीनावीती कर्माणि करोति मार्जयन्तां मम पितरो- मार्जयन्तां मम पितामहाः मार्जयन्तां मम प्रपितामहा इत्येकस्मुयायां श्रीनवका- श्लोकोऽस्मिनर्पित। प्रत्यक् वा त्रिः परिषिञ्चति श्रोन्नुपपातान्योपजनोयिनः - समाप- वन्ति, तत्वं सान्नाय्यावयीन पाणिः स्फ्याच्छिन्ने बर्हिषि दक्षिणां -

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पिण्डं दद्यादपि वांगार एव स्थालीपाकं श्रपयित्वा बर्हिःप्रभृत्येव पिण्डं दद्यात् अमुकामुष्मिकापुत्र्येत्यादि प्रयोजनाभावान्नलिखितम् ।

अत्र पितरो यथाभागमन्दध्वमित्युक्त्वोदङ् पर्यावृत्य⁶ ओष्मणो व्यावृत उपास्तेऽथावृत्य ऊष्मेति प्राहुः, व्याभिपर्यावृत्य एवं पठन्नवजिघ्रति स्थालीस्थं सर्वं - ये समाना: ० कल्पताम्, ये सजाता: ० शतं समा- इति द्वाभ्यां, तथैवाभिमर्शयति । तत एव कुंभात्पूर्णपात्रविशिष्टाभि: मार्जयन्तामिति त्रिभि: ।

अथाञ्जनं ददाति - आंक्ष्वां पितर: आंक्ष्वां पितामहा आंक्ष्वां प्रपितामहा: । अथाभ्यञ्जनं ददाति - अभ्यङ्क्ष्वां पितर: अभ्यङ्क्ष्वां पितामहा अभ्यङ्क्ष्वां प्रपितामहा: इति प्रतिमंत्रम् ।

अथ वासांसि ददाति , दशां छित्वा नीवीं ददाति । ⁸ एतानि नु पितरो वासांस्येतानि वः प्रपितामहा वासांसीति प्रतिमन्त्रम् । उत्तर आयुषि लोम छिन्दीतेति ब्राह्मणम् । कस्मिन्नु खल्वेतत् कालेऽवपन्तमिति ऊर्ध्वं खलु पञ्चाशतो वर्षेभ्यो षष्टाभ्यस्य मासेभ्य: इत्येव । तस्मिन्नेवैतत् काले ऽवपन्तमिति- तथाप्यौर्ध्वं मंत्रै: ददाति, लोम्नामावानं वाससां प्रत्याम्नानम् ।

अथ षड्भिर्नमस्कारैर्विपर्यासमुपतिष्ठते । विपर्यासमिति सव्यान्ते

- -

यद्यतु पिण्डान्दद्यात्येतद्वे ततासौ ये चत्वामन्वित्यैतै: प्रतिमंत्रं तूष्णीं चतुर्थं तन्त्राच्च: प्रपितामह प्रभृतीन्वा ।

द्र० दर्शपूर्णमास प्रकाश: पृ०१६१ ।

६- दर्शपूर्णमास प्रकाश: पृ० १६२ ।

७- पूर्वदिक्प्रभृतायां अपि श्रीकुशं स्थालीमुनिनयाऽऽ ल्लनाभ्य स्वैनुवासस्य- मिरनुपिण्डं ददात्याङ्०ल्य ततोवाङाल्य, पितामहावाचाङ्०ल्य प्रपितामहा- दविन्वा स्वधैवमन्य स्वकम्यङ्०ल्येति मंत्रं संभाति ।

द्र० दर्शपूर्णमास प्रकाश: पृ० १६३

८- एतानि न: पितरो वासांस्यतोऽन्यत्पितरो मा योष्टेति वाससो दशां छित्वा निदध्यात्पूर्णां तु वा पूर्णं ददाति । उत्तर आयुषि स्व लोम ।(

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वर्षान्ते सर्वान्ते समाम्नातम् । [१] पितरो नमो व इत्येकैकस्यान्ते कुर्वीतेत्यर्थः। नमो वः पितरो रसाय पितरो नमो वइत्यादि वसिष्ठो भूयासमित्यन्तम् । नमो वः पितरः शुष्माय पितरो० भूयासम् । नमोवः पितरो जीवायपितरो० भूयासम्। नमोवः पितरो ० स्वायै पितरो० भूयासम् । नमोवः पितरो मन्यवे पितरो० भूयासम् । नमोवः पितरो घोराय पितरो नमो वः ० वसिष्ठो भूयासमिति जपति:। स्ववीरं याचते । स्वीरंमे पितरो दत्त पितृमानहं युष्माभिर्भूयासं, सुप्रजा मया यूयं भूयास्त । वीरं मे पितामहा देवत्त पितृमान ० भूयास्त । वीरं मे प्रपितामहाइदत्त ० भूयास्त इति ।

२

[illegible] नुत्थापयति मन्त्रा ० उत्तिष्ठपितरः प्रेत शूरायमस्य पंथामनुगाता पुराणं धत्तादस्मासु ० देवतास्वियति कौतान् संस्थापयति । स्थापनम्((संसाधनं) कलशसंराधनं स्वस्थानन्यनं मनीव ० यन्तु० पितरो यथालोकं मनसा जवेन ।पहैत पितरः ० मवतीति ।

[illegible] पितृभिर्मन आहूयते मनोन्वाहुवामहे , आन एतु मनः पुनः, पुनर्नः पितरो मन इति । कौतान् पिण्डान् दक्षिणान्गुणान् प्रहरति । पिण्डानामनु प्रहरणम् इति सूत्रं शालीकेरेकस्मात बौधायनो [३] नैव ते पिण्डा परिधयोरन्नुच्छिष्टा इमे भवन्ति पितृभिर्दत्तं हुत्वापिति ।

पिण्डप्राशनम्

४(क) ४(ख)

अतिरिक्तस्य प्राशन इति स्वयं यजमानः प्राश्नीयादिति बौधायनः । पुत्रायवान्तेवासिने वा दद्यादिति शालीकिः । पत्नी [५] प्राशयेत् प्रजा-

- -

१- वीतोष्मसु पिण्डेषु नमो वः पितरो रसायेति नमस्कारान् जपति , गृहान्न पितरो दत्त सतो वः पितरो देष्मेति पितृनुपतिष्ठते । प्र०का०पू०प्र० पृ० १९५।

२-मनोन्वाहुवामहे इति मनस्वती मिरुपतिष्ठत उत्तिष्ठतपितरः प्रेतशूरायमस्य-मन्थामनुगता पुराणम् । धत्तादस्मासु द्रविणं मद्रं प्रणो ब्रूतात्भागधां देवा-स्विति । पितृनुत्थापयति परेतपितरः सोम्या इति- प्रवोक्ष्यापितृन्प्रवापयति ।

पू० दर्शपूर्णमास प्रकाश: पृ०१९६ ।

(वैदिक स० पृ० प्र०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्त्रैणा भवती त्योपमन्यवोऽगुल्या यावन्मात्रमवघ्रायाधैतरदग्नावनु प्रहरेदित्यौ-[६]
पमन्यवोऽपुत्रौ भस्मोत्कर उद्वास्य सम्प्रक्षालयेदित्यांबिन्याविरपोऽभ्यवहरे-
दिति माण्डूकः। उभा(वा) पिण्डावशिष्टस्य यावन्मात्रमादायावजिघ्रति
इत्यनेन विकल्पिता स्त्री पक्षाः। कातीयानां शत्यार्थं ३. ३. उवाकस्तिउवान-
यन्ति कस्मात् स्थानात्।

[८] अथ यज्ञोपवीतं कृत्वा प्राजापत्ययर्चागार्हपत्यमुपतिष्ठते- प्रजापते न
त्वदेतान्यन्य इति। कीदृशं द्वितीयां अपतियदन्तरिक्षं पृथिवीमुतधामिति।
[६] उपतिष्ठते पिण्डपितृयज्ञः। अयं च पिण्डपितृयज्ञः वाचितः, प्रभृति मन्त्राप-
ठनात्पिण्डदानप्राधान्यात्, तच्च स्वेभ्यः पितृभ्यो दीयत इतितत्सन्नियोगाच्च।
सर्वविशेषित्वेन परिक्रयाभावादप्यर्थमुक्तवचनाच्च। यावित एव प्राचीनावीतं कुर्वीत,
सप्राचीनावीत्येवस्यादप्राजापत्याया इतिविधिसूत्रेणापितः। प्रक्षालनकर्मसंकल्प-
वचनाच्च।

अत्र गोपालः-

अमावस्यापराह्णे स्यादाचमानं पितृक्रिया।
इष्ट्वा तत क्रियांगत्वे स्वातंत्र्येऽपि नापि वा॥
प्राणानायम्य संकल्प्य यज्ञोपरिसमूह्य च।
परिस्तीर्य दक्षिणा० प्रागग्रकैः॥

- -

३- बौ०श्रौ० सू०२०-३१-४७।८।

४(क) अतं तथा इत्यवशिष्टानामेकं यजमानः प्राश्नाति वा।पृ०व०पू०पृ० पृ०१६८।
अपां त्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं धत्स्वेति मध्यमंपिण्डं पत्न्यै प्रयच्छत्या-
धत्तपितरो गर्भं कुमारं पुष्करस्रजम्। यथेहपुरुषोऽसदिति तं पत्नी प्राश्नाति।
पुमांसं जातुकं भवतीति विज्ञायते।आनुकावनशीता पृ०शु०वी०व०पू०पृ० पृ० ६
१६८-१६६।

४(ख)पृष्ठ बौ०श्रौ० सू० २०-३१-४७।८।

५- तत्रैव २०-३२-४८।८।

७- प्राचीनावि: इति सूत्रं वा ?।

७- (वैदिक अ०पू०पृ०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पात्रासादनम्

सादयित्वा दक्षिणाग्निं पात्राण्येकैकशो न्यसेत् ।
एरकादीनि कृतानि चरुस्थालीं समेक्षणम् ॥
आज्यस्थालीं स्रुवं, शूर्पं कृष्णाजिनमुलूखलम्।
मुसलं प्रोक्षणीपात्रमेकैकश्चापि सादयेत् ॥
निरूप्य प्रोक्षणीपात्रे उत्पूय वारिभिः।
प्रोक्षेत् पात्राणि च प्रोक्ष्य,
उत्पूतमुल्मुकम् ॥
उद्धृत्यापसव्यमनुक्त्वा प्रोक्षणीरिता ।
स्तृणीयात्तत्कृताच्छिन्नमित्युचा उदीरिणा॥
इत्येवं ० पितृनावाहयेत् स्थितः।
आसनं स्नानं चैवं इत्येकं चापि कल्पनम् ॥
ततोऽग्निधार्याग्निभ्यामुपव्यान्तमसौ पदे ।
त्रिष्विमानामतो पिण्डं एकैकस्मिन्कुशे रयेत् ॥
जीवत्पित्र्याज्ञिको येभ्यः, पिता तेभ्यो ददाति च ।
ताभ्यां जीवपिताथवाप्येकस्मिन् जीवति स्थिता ॥
इत्येकेऽन्ये न जीवंतमतिदद्यादिति स्थितिः।
पितुर्यदाद्धमाद् पित्रे दत्त्वावधाव्य वानुगे ॥
स्वगोत्रस्य दायादः स्वेभ्यो दत्त्वा पृथक् पचेत् ।
दक्षिणाग्न्यावनारे वा बर्हिः प्रभृति दीक्षात् ॥
पुत्रिकापुत्र एवं मातुः पित्रादिभिस्त्रिभिः।
स्वेभ्यः पितामहादिभ्यस्त्रिभ्यो दद्यात्तत्क्रमात् ॥

७- आंगीरसः इति शुद्धं वा ? ।
८- प्रजापते नत्वदेतानीति यज्ञोपवीती गार्हपत्यं देशं गच्छति ।
कान्तारिदामिति पठ०ऋचा गार्हपत्यमुपतिष्ठते । कु०प०पू०प० , पृ०१६७।
९- कु० दर्शपूर्णमास प्रकाशः ,पृ०१६६।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रविधानविधानेन देयं ना[1]माविधानका ।
स्वधा पितृभ्य: पृथिविषद्भ्य इत्यादिभिस्त्रिभि:।।
[2]यज्ञोशिर्व्वंविनापूर्वै: यद्वेतदेवादिभि:।
यतां मेधा पित्र्येभ्यो यथाकुवासांसि मंत्रवत्।।
ज्ञानायुस्स्वधा कुर्यादुराकुत्सकुरम् ।
पितरो मम० इत्यादिरनुगादृस्वपि ।।
पितृणा(न) इमित्यादिरनुगच्छेत च त्रिषु ।
प्राचीनावीतमाशौचाद्धोमौ यज्ञोपवीतिना।।
प्राचीनावीतमुद्धृत्याथापराह्ने स्थिते ।
यज्ञोपवीत्युत्थायानयवादिप एव स: ।।
प्राचीनावीतवान्कि कुर्यादाग्नेरुपस्थिते: ।
परं यज्ञोपवीतीत्यादिति दैधमिहेष्यते ।।
पिण्डा परिस्थीरन्त्या-दीक्षिवैव वाऽन्ते ।
वग्न्यग्निं यावत्तितीर्णं च यज्ञपत्न्यवदात्मव:।।

<u>कात्यायन:-</u>

[3]प्रेतेभ्यो ददाति- पिण्डपितृयज्ञस्याधिकारिनिरूपणाय इत्युक्तम् । जीवपितृकोऽपि ददातीत्येव जीवान्तरहितोऽपि दानं प्रवर्तत एव । अप्र शब्दस्याशेषे विषयत्वात् । जीवपितृक[4]स्य होमान्तं कर्म स्यात् ।

- -

१- यदि नामानि न विद्यात् स्वधा मम पितर या स्वधा मम पितामह, यांश्चाहं मम प्रपितामह इत्या स्वधा। पित्रादिषु मध्ये यस्य यस्य नाम न विद्यात् तस्य यथालिंगं सर्वत्र भवति ।द्र० दर्शपूर्णमास प्रकाश:पृ०१६४ ।

२- यज्ञोपवीतेनैवेति वचनान्तस्य पितृयज्ञेतु नीतु ।द्र०का०श्रौ०सू०४-१-१०,।

3-द्र०का० श्रौ० सू० ४-१-२३। प्रेतेभ्यो ददाति जीवपि तृकोऽपि जीवान्तर्हितोऽपि।

४-" न जीवन्तमतीत्य ददाति" इति शास्त्रान्तरेण श्रवणात् । आहोमान्तं कर्म स्यात् । कर्का० का०श्रौ०सू० ४-१-२३-२४-२६-२७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुत:- न व्यवेयी जातूकर्म्य:। जीवतां व्यवाये जातूकर्ण्या दानं न देये। किमिति -" न जीवन्तमति ददातीति श्रुते:[1]। ततो हविषामन्तं कर्म स्यात् यथैवं तनारंभो वा, तनारंभ एव स्यात् । कुत:- दानस्य० प्रधानत्वात् । न हि प्रधानाभावे अंगानां प्रवृत्तिरस्ति। अतोऽनारंभोवेत्यवधार्यते । यदि जीवपिता ददाति होमात्० कृत्वा विरमेदित्यापस्तम्ब:[2]।

प्रधानभूतत्वाऽत्र हि प्रधानाभावे अंगानां प्रवृत्तिरस्ति। अतोऽनारंभ एवेत्यवधार्यते ।
(यदि जीवपिता न ददाति होमात् कृत्वा विरमेत्, इत्यापस्तम्ब:)

कौत्सी शाखायै ,पर्णानि प्रच्छिद्य उपपर्णं० गार्हपत्यं निदधाति। एतस्या इतिपर्णशाखाया मुख्या(या)मुख्यत्वख्यापनार्थम् । पर्णानीति उत्तरकाणि प्रष्टव्यानि । पर्णात्तरूकाणामित्यन्यत्र विनियोगे उत्तरदर्शनात् । यथैनामधस्तात्परिवास्यमनेन गार्हपत्यं प्रवीमुपवेषाय- निधाति[3]। एनामिति शाखाया: प्राधान्यार्थम् । तथा च प्रयोजिका शाखा

१- कु० का०श्रौ०सू०४।१-२५ ।

२- कु०श्र० आप० दर्श सू० ६-१-३-६ (दर्शपूर्णमासप्रकरण:) अयमर्थ:- त्रिष्वपि पितादिषु मध्ये यदि कश्चिज्जीवेत्तदा न दद्यात्पिण्डान् होमान्तमेव कृत्वा कर्म समाप्नुयादिति सू०वी०।

३- कृत्वास्प्रावेशे परिवास्य तेन परिवासनानि निदधात्यन्तर्वेदिशाखाया पला- शान्यवर्णानि प्रशाल्य मूलत: अग्रत: परिवास्योपवेषं करोत्युपवेषोऽसि यज्ञायत्वां परिवेषमधारयन् । "परिवास्योपवेषं करोति" इति न क्रियाद्वयम्। पौर्वापर्यमेकेनपरिवासेन यत्नेनोपवेषेण सह पर्णवल्कपातनं शाखायामुपवेषा- त्पृथक्करणार्थं परिवासनं न स्वतार्थमत:प्रमादाद्विनाकृतानुत्पादनेन पुन: परिवा- सनमनुनिष्पादितत्वात् । उपवेषार्थो- मन्त्र:। "उपवेषोऽसीति" लिंगात् । उपवेषाभिधानपरत्वाद्देवता सम्बन्धि हवि: करणाभिधानपरत्वाभावाद्वाक्या- भाव:। "मूलत: परिवास्य तदेवमूलमुपवेषं करोति । अंगार प्रेषणार्थकाष्ठमुप-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ब्रुवीत उपवेष इति स्थापितं भवति ।

अथस्तात्परियाय मूलः छित्वा स्थविमतस्तु वेदाग्रं[4] करोति ।
व्याख्या: प्रादेशमात्रं प्रमाय दर्भनाडी: प्रवेष्ट्य तस्मिन्नूर्ध्वाग्रवापित्वंकरोति ।
तस्मिन्नुत्पन्ने दर्भ: करोतीत्यर्थ पति:। वत्सा इति पर्णशाखाया: प्रकृतत्वात् , अन्यस्यापि ग्रहणं यथा स्यादिति सामान्यवचनम् । प्रादेशमात्रं मीत्वा प्रादेशमात्रमिति न शाखापरिमाणं, प्रादेशमात्रं दर्भनाडी: प्रवेष्ट्येति सम्बन्ध:- शाखाया: पधिकरणत्वेन वचनात् त्रिवृत्त्वात् इति । त्रिवृत्त्वात्त: शाखायामिति च ।

वीजमयिनस्य करण इति - [6] श्रोणिकृतानि कृत्वा त्रिवृतं रज्जुं संग्रस्तायाग्रग्रन्थिं[7] छित्वा वेदस्याग्रमभिसम्पन्नं भवतीति बौधायनोऽभिप्रेत्या-

- -

वेद" इति समाख्यायते । द्र० दर्शपूर्णमासप्रकाश:, पृ० १७५ भाष्यवृत्ति सुबोधिनिका।

४- स च शान्नाख्यार्थमुत्पन्न: प्रकृत्यात्पुरोडाशस्याप्युपकरोति ।उपवेषं प्राक्तेष पाशाणीति लिंगात्।

भारद्वाज:- वेदमाने कार्पि कृष्णपत्वादेकेषाम् पौर्णमास्यामुपवेष इति ।

बौधायन:-" पौर्णमास्यामुपवेषकरणं" इति कुर्यादिति बोधा यनो न कुर्यादिति शालीकि:। द्र० दर्शपूर्णमास प्रकाश: पृ०१७६ ।

५- त्रिवृत्संध्यं पवित्रं कृत्वा कुशानां पविनमतीति शाखायां शिथिलमवयति मूले मूलान्यग्रेऽग्राणि । न ग्रंथिं करोति । पवित्रं प्रादेशमात्रं मंत्रलिंगादिति । त्रिवृत्संध्यविं प्रादेशमात्रम् । इति भा०५०
प्रादेशमात्रं पवित्रं प्रादेश संमित इति मंत्रलिंगात् द्र० दर्शपूर्णमासप्रकाश: ,पृ०१७७ सूदी०

६- बौ० श्रौ० सू० २०-२-४-११ ।

७- त्रिवृद्ध्यावर्तनमिति कुः पाठः प्रतिभाति।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

च, शाखीकिमूलानि बध्वा- त्रिगुणां रज्जुं संप्रस्ताय मूले मूलानि परिहृत्य त्रिगुणं रज्जुं संप्रस्तावाग्नी निधायावेवमत्याग्रे ग्रथितं सम्मन्नं भवतीति ।कौशल-पवित्रस्य करणे शाखामूले दर्भमूलानि बध्वा दीर्घं कृत्वा प्रादेशात् प्रदक्षिण-मावर्त्य त्रिगुणं कृत्वा वामूलात्पुनर्मूलादारभ्य त्रिगुणं कृत्वाग्रे बध्नीयादेवकुर्यात् एकसम्पदि:। स्तरपदी मूलादारभ्य त्रिगुणां[1] शाखा तृतीया, स्वमग्रं संपदिति त्रिवृ-त्पलाशखां दर्भं त्रिवृत्पलाशे दर्भं चयादिति च । शाखायामाधारसप्तमी त्वेकस्य दातरस्य निकायसप्तमी निमित्तसप्तमी वा ।[2] ततश्चशाखा तृतीया, तथा सह त्रिवृदिति ।पलाशलिंगत्वान्मन्त्र: सम्यं निरुक्ति, न च विशेषवचनात् (न च विशेष-वचनात्) वाक्यभेदिरिति वाच्यम् । पलाशशब्देनशम्याभिधाना उपपदे: प्रकृतानुक-प्रतिषेधाच्च ।

अथ सायं हुतेऽग्निहोत्रे उत्तरेणगार्हपत्यं तृणानि संस्तीर्यते ।चतुष्टयं संसादयति - दार्शपौर्णमासिकं, सान्नाय्यपात्र्यौ रथ्यादिस्थानानीति । चतुष्टयग्रहणं प्रदर्श-नार्थं। रथ्यादीनां प्रोक्षणं पंक्तिलिंगदर्शनादिति केचित् । नियमार्थमित्यपरे ।लिंग-प्राप्तस्य विशेषात्कथनं[3] शाखकार्यानियमार्थं सान्नायेनैव संसादिति परिभाषित-स्यादित्यपि तथा ह्यन्यथैव स्तानीति चतुष्कमित्यर्थम् । सायमग्निहोत्रं हुत्वा अग्निहोत्रोच्छेषणं प्रातर्निदधाति । अग्निहोत्रोच्छेषणस्य करणमिति तस्मात् दधिपयसी दध्यन्यतरेणैव वा प्रक्रान्तं स्यात् ।यद्यीतरं सायं जुहुयात्तदा त्वा-ऽग्निहोत्रोच्छेषणं कुर्यादित्यक्षीरस्यैव शाखीकि:। नसमाप्ते काम चावच्छेद्, यस्या-ण्येन पयसेन वा (प्रक्रान्तं स्यात्) तस्य हुत्वा तदेवाग्निहोत्रोच्छेषणं कुर्या-दिति ।

१- `दर्भं यानिधिव शाखायाम्' इति पाठभेद:।

२- द्र० दर्शपूर्णमास प्रकाश:, पृ० १७७ ।

३-सान्नाय्य पात्राणि पृथक्त्व ह्यन्यानि पात्राणि प्रकृतानि।

द्र० दर्शपूर्णमास प्रकाश:, पृ०२०४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दोहनं दारुमयं कमण्डल्वाकारमायतेनकम् । पवित्रं शाखापवित्रम् ।
सान्नाय्यं तप्यते ययोस्ते सान्नाय्यतापन्यौ स्थाल्यौ ।

अंशान्स्रुचि:प्रोक्षति- शुन्धध्वं० कन्याया इति त्रि:। सकृन्मन्त्रेण त्रिस्तूष्णीं, प्रोक्षणस्य प्राधान्यात् संख्या प्रोक्षणेन सम्बध्यते । मंत्र: सकृदेव, अभ्यासकार्याभावात् । अमन्त्रकस्याभ्यास: कृते तत्र मंत्रस्याप्यावृत्ति: ।

सान्नाय्यपात्र प्रोक्षणम्

सान्नाय्यपात्राणां प्रोक्षण इति तूष्णीं संस्कृताभि:(अद्भि:) प्रोक्षेदिति बौधायन: । कमण्डलूतामिरिति शालीकि:। अथ अनेन गार्हपत्य-मुपतिष्ठेतेषीगणोनावीर्घोऽगारान्मिकइति[1]- मातरिश्वनोधर्मोऽसीति । तेन सान्नाय्यतापनीयमभिज्वलयति- धौरसि - - - धृंहस्व माह्वारिति। तस्यां प्राचीनाग्रं शाखापवित्रं निदधाति -[2] वसूनां पवित्र० शतधारमिति । तदन्वारम्भ वाचंयम आस्ते ।

अथ गा वाचयति: प्रतिष्ठन्त्या आयन्ति० इन्द्री रमयतु गाव इति। महेन्द्र इति वा , यदि महेन्द्रयाजी भवति ।गोरूपणं प्रति परार्थत्वादित्यनूहशंका० स्यात् । तन्निवृत्त्यर्थं महेन्द्र इति वा । यदि महेन्द्रयाजी भवतीति तस्य० सम्प्रदान-त्वात्प्रमाणमार्थमेवेति प्राधान्यादिन्द्रस्य नैमित्तिकत्वादूहित: । अविशेषात्

१- निष्टप्तं रक्ष निष्टप्ता अरातय इति गार्हपत्ये सान्नाय्य पात्राणि प्रतितप्य धृष्टिरसि ब्रह्मयच्छेत्युपवेषमादाय निरुढं जन्यं भयं निरुढा: सेना: अभीत्वरीरिति गार्हपत्यादुदीचो गारान्निरूह्य मातरिश्वनो घर्मोऽसीति तेषु कुंभीमधिश्रयति ।
२- ध्रुवाणामङ्गिरसां तपसा तप्यस्वेति प्रातिष्ठणांगारै: पर्यूह्य वसूनां पवित्रमसीति तस्यां प्रागग्रं शाखापवित्रमत्याधायाधातीत्युक्तं प्राक्:- कुम्भ्यामारभ्य वाचं यच्छति पवित्रं वा धारयन्नास्ते ।आ० दर्शपूर्णमास प्रकाश: ,पृ०२०७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

[1]
गतश्रीऽपि संवत्सरमिन्द्रेण्यास्तीति बोध्यति । नाश्रुत्वाऽगतश्रीऽपि संवत्सरादू-
र्ध्वमपि नियम इति । अत्र सूत्रम् - अथो भवति नागतश्रीर्महेन्द्रं यजेत, त्रयो वै गत-
श्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषां महेन्द्रो देवतेति, स योऽन्यस्तेभ्यो महेन्द्रं
यियक्षेत् न संवत्सरमिन्द्रमिष्ट्वाऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति
सिद्धेष्टिः सन्निपत्तौऽपि याऽमावास्याऽऽगच्छति तस्यां महेन्द्रं यजेत् ततोऽपि ऊर्ध्वं
महेन्द्रयाज्येव भवतीति । अथैव भवति यो वै स्वां देवतामतियजते, प्रस्वायै देवतायै
च्यवते , न परां प्राप्नोति० पापीयान्भवतीति । अथ वै भवति संवत्सरमिन्द्रं
यजेत् , संवत्सरं व्रतं, नाति स्वा वैनं देवतेज्यमाना भूत्वा श्रेयसीयान्भवतीति।
अथ वै भवति संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत्, संव-
त्सरमेवैनं व्रतं अग्निनासंपाद्य व्रतपतिस्थितमालभ्यति । ततोऽधिकामं यजेतेति । अथ वै
भवति ।

नासोमयाजी सन्नयेदनागतं[2] वा एतस्य० पयो यो असोमयाजी, यद-
सोमयाजी सन्नयेत् - परिमोष एव सोऽनृतं करोत्यथोपरैव सिच्यते । सोमयाज्येव-
सन्नयेत् ,पयो वै सोमः पयः सान्नाय्यं, पयसैव पय आत्मन्धत्त इति । सोमयाज्ये-
वेत्यवधारणात् प्राक् सोमयागात् न सान्नाय्यमित्याचार्यमतिः[3]। न सोमयाजी

- -

१- अथाप्यत्र नागतश्रीर्महेन्द्रं यजेत् । त्रयो वै गतश्रिय इति तत्र । त्रयो वै
गतश्रिय इत्यस्य व्याख्या । शुश्रुवान् विद्वान् ब्राह्मणः । अतः सामानि यजूंषि वा
ऽपि श्रीरिति मता प्राप्ता श्रीर्येषु गतश्रीरित्युपनाम्नातस्तेन देवताभिधानाच्च।
य एवं विद्वान् स एव शुश्रुवान् गतश्रीर्भवतीति । द्र० दर्शपूर्णमास प्रकाशः ,पृ०२२५।
२- ना सोमयाजी सन्नयेदुपांशुरितरायणा वाऽऽनवरुतावाऽऽसोमयाज्यपि नवरूपान्यूना-
ऽसोमयाजी सन्नयेदिति [illegible] श्रौ० १।८।१।३।१५ ।
३- तस्यार्थः- सान्नाय्याग्नीषोमीयेष्टिविकारा ऊर्ध्वं सोमात्प्रवृत्तिवदिति न्याया-
त्सोमयाज्येव संनयेदग्नीषोमौ वै देवताब्राह्मणः, न सोमेनेष्ट्वाऽग्नीषोमीयो भवतीति
न सोमयागोत्तर कालस्य सान्नाय्याग्नीषोमीयानन्तराधिकाराणां च नाधिकारस्त-
त्कालप्राप्तिरसत्कालसम्पादन सामर्थ्यमेवेतिविकृतिष्वपि तत्काल प्राप्तेस्तत्काल सम्पादन-
सामर्थ्यमेवाधिकार । इति । द्र० दर्शपूर्णमास प्रकाशः प० सू०८।१४।२४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सन्नयेत् सन्नयेदित्यापस्तम्बः। अथ इदं - नागतसोमो महेन्द्रं ० यजेतेति स यो न्य- स्तोम्यो महेन्द्रमपि यजेत् स संवत्सरमिन्द्रमिष्ट्वा महेन्द्रेज्यां लभेतेति बौधायन, तत एवापि संवत्सरमिन्द्रमिष्ट्वा महेन्द्रेज्यां लभेरन्निति शालीकिः। संवत्सरमि- न्द्रं० यजेत संवत्सर० इति द्वयं नास्तीति सूत्रं शालीकेरभावस्मात् बौधायनीयस्या- ममावास्यायामागते इन्द्रं यष्टुं प्रक्रमेत् संवत्सरे पर्यवेते वाऽतऊर्ध्वं महेन्द्रयाज्येवस्या- दिति कात्यायनोऽपमन्यथाऽव्याकृतः तत्सर्वमेव संवत्सरो भवति । यस्याममावास्या- यामागते इन्द्रं यष्टुं प्रक्रमेत् संवत्सरे पर्यवेते या ततः पूर्वामावास्या तस्यां महेन्द्रं यजेत, सोऽत ऊर्ध्वं महेन्द्रयाज्येव स्यादिति ।

अत इदमाह-

नागतसोमो रित्यादि शुश्रुवानित्यो न्यो यो महेन्द्रं यियक्षेत स संवत्सरमिन्द्रमिष्ट्वा तत ऊर्ध्वं महेन्द्रं यजेत । स्तोम्यस्त्वन्यः सर्वदा महेन्द्रो दे- वता यो वैश्वामीतीतरविषयः । अन्ये यदि महेन्द्रं यजेरन् , एवावै देवतायै प्रच्यवेरन् । स योनो मा भूदिति संवत्सरमिन्द्रमित्यादि ततोऽधिकारं यजेरन्निति तत एवापीत्यादि - एवापि शब्दः समुच्चयविषयः । यथा देवदत्तोऽप्यागत इति तदेते चान्ये च । विकल्पार्थो वा एवापि शब्दो यथा गोधूम यवपिष्टाना- मपीति तदेत एवा इतरे पि वा । अयमभिप्रायः- गतश्रियां महेन्द्रो देवता सान्नाय्यस्यैन्द्रं दध्यैन्द्रं पयः इति विधानात् । तत्र यो वै कृत्स्नस्य स्वां देवता- मिन्द्रमतीत्यागतश्रीर्महेन्द्रं यजेत स स्वायै देवतायै कृत्स्नस्य(प्रच्य) प्रच्यवते ।अन्य- देवत्यमन्यस्मै ददत् ततश्च नोत्कर्षं प्राप्नोति पापत रो भवति । अतः संवत्सरमि- न्द्रमित्यादिवक्ष्येन्द्रस्यदेवतेज्यमानो भूत्वा इदं वसीयान् भवति इतरेषां एवैव देवतेति न किञ्चिदुक्तं भवति ततोऽधिकमप्यितरेषां गतश्रियां महेन्द्र एवेति - तस्यापि वा विकल्प इति । संवत्सरमिन्द्रमित्यादि सूत्रं प्रथमायाममावास्यायामा- रभ्यमाने या प्रथमामावास्या अपरे मासे भवति त(म)स्यांमहेन्द्रं इति । उपक्र- मेण पूर्वो मासः, तत्र यागः परस्मिन्संवत्सरेपूर्वेषुरपूर्णत्वादिन्द्रः प्रक्रांत इति । तत्रेन्द्र एव परस्यां महेन्द्र इति, इतरो यागादिस्तोऽमावास्या एव गृहीत्वात् । तत्र यामावास्या तस्यां पूर्वस्यां आपस्यांपूर्ती तस्यां महेन्द्रं इतीतरः । न सोमयाजी सन्नयेदिति सोमयागनिमित्तत्वात् यस्यां पौर्णमास्यां सोमः० समारभ्यते ततश्च तत्पूर्वपदात् पूर्वममावास्यातस्यां पूर्णो संवत्सरः प्रतिपदियागोऽतिरिच्यते ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उभयो विघ्ने यद्यप्यपूर्ण इन्द्रकालः, तथापि यागविकारोऽतिरिच्य-
भवति । तस्य प्राधान्यात् अनुरोधान्महेन्द्र एवेति । अतायं निष्कर्षः प्रतिभाति
आगतश्रियः एकादश्याममावास्या(याम्) इन्द्रमिष्ट्वा चतुर्दश्यां त्रयोदश्यां द्वादश्यां वामावास्यायां
महेन्द्रयाग इति ।

अथापस्तम्बः:-

"नागतश्रीर्महेन्द्रं[1] यजेत" तत्र त्रयो गतश्रिय इत्युक्तमिति । अत्र-
भरद्वाजः:-

"सान्नाय्य देवता विचार:"

अथ सान्नाय्य[2] देवताव्यवस्थां ब्राह्मणोक्तां दर्शयति ।
नागतश्रीः ० इत्युक्तम् । एवं प्रतीकेऽब्राह्मणे यदुक्तं तदेवानुसन्धेयं, न
पुनर्निर्धार्यत[3] इति भावः तत्र नागतश्रीर्महेन्द्रं यजेतेति प्रवृत्त्यगतश्रीशब्दार्थस्तावद्-
व्याख्यातः- त्रयो वै० राजन्य इति तत्र शुश्रुवान् देवतयोर्थोः शुश्रुवान् । ग्रामणी
वैश्यपरिवृढः। राजन्यः, क्षत्रियः । अत्र केचित् शुश्रुवच्छब्दार्थं विवदन्तेऽवदन्ति च
शुश्रुवानिति त्रिवेदपिवेदाध्यायी, त्रिवेदवित् । गतश्रीशब्दव्युत्पत्तिबलात् गता प्राप्ता
श्रीर्येन स गतश्रीः, श्रीश्च त्रिवेदविदुणां त्रयः, सामानि, यजूंषि ।ऋग्भिरेव
रत्नावसान०मित्युक्ताप्तिसमुच्चयः प्रमाणवाक्येन विरोधः स्यात् एकैकस्यापि वेदस्य
श्रीत्वोपपत्तेः। न हि गौर्हिरण्यं ब्रीह्यो धनमित्यत्र तेष्वेकैकमतां धनत्वादि न
गच्छति । अतो गतश्रीशब्दाविरोधात् शुश्रुवच्छब्दानुरोधाच्च यथोक्त एव शुश्रुवान्,
गतश्रीः शब्दार्थः । एवं नित्या गतश्रियो त्रिविधा इत्यादावपि द्रष्टव्यम् । अथ तेषां

१- द्र० दर्शपूर्णमास प्रकाशः , पृ० २१५।

२- तत्रैव पृ० २१५।

३- तत्रैव - पृ० २१६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

महेन्द्रो देवतेत्यर्थः । तेषां गतश्रियां नित्यं महेन्द्रो देवता, ततो न्येषां सर्वेषामपि नित्यमिन्द्रः । यदि ते पि महेन्द्रं यियक्षेरन् तदा सान्नाय्योपक्रम-प्रभृति संवत्सरमिन्द्रमिष्ट्वा ततो प्रातस्तो० मिष्टिं निरूप्य तत ऊर्ध्वं कामं महेन्द्रं यजेरन्निति । अयं चार्थः- कल्पान्तरेण, व्यक्तो ग्रन्थेषु: यथा शुश्रुवादीनां नित्यंमहेन्द्रं यागमुक्त्वाह-

भारद्वाज:-

" कौमार इन्द्रयाजिनः स इन्द्रयाजी महेन्द्रं यियक्षेत स संवत्सरमिन्द्र-मिष्ट्वेत्यादि ।

अथो गतश्रियामपि मध्ये केषांचिन्निवृत्तिरस्या(यां) न्याहीकं विशेषमाह:- यौवनां गोतमो भारद्वाजवन्तो ऽन्धारं सोमेज्याया महेन्द्रं यजेरन्निति । वै ऽ मीमांस्य: ते सोम- यागात्प्रभृति नित्यंमहेन्द्रं यजेरन् प्राक् सोमान्नित्यमिन्द्रम् । न तु तेषां संवत्सरमिन्द्रयागाद्विनियम:। स चायं कल्प: पूर्वोक्तेन वा विकल्प्यते, शाखांतरत्वात् । व्यवस्थितो यं विकल्प: , यौवनादीनामित्यन्ये ।

अथेमं विधिं (सर्वेषां) गतश्रियामगतश्रियां च विकल्पयति । यो वा करिष्यतीति । अनन्तरमित्यादेरनुषङ्गो यवेति विपरिणामश्च इति ।

अथाहोपसृष्टां मे प्रब्रूतादिति । अध्वर्यु: परिकर्मिणामिति शेष: ।

१- श्रौ० स, आप० सू० १०(दर्शपूर्णमासप्रकरणे, पृ०२१७ ।

२-(श्रौ०) स० आ० श्रौ०सू०(दर्शपूर्णमासप्रकरणे) पृ०२१७ ।

३- उपसृष्टां मे प्रब्रूतादिति संप्रेष्यत्युपसृष्टामीत्यामंत्रयत । आयमावे: प्रजया संसृजामि रायस्पोषेणाभक्ता भवन्ति ।।" इति " वत्सानुपसृजति गा न्वोपसृष्टां विहारं चान्तरेण मा संचारिष्टेति संप्रेष्यति ।

(श्रौ०) स० आप०श्रौ० सू०(दर्शपूर्णमासप्रकरणे),१-३-१२।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दोग्धा गर्हं च मानां गतामेकस्यावत्तमुपसृजति । उपसृष्टां प्राहुः । परिकर्मेण उपसृष्टेति प्राहुः। वत्सुवनमभिघ्राणार्थं वः कल्पसूत्र । दोग्धा वां दोग्धि । दोह्यमानामनुमंत्रयते - कुस्तीके० - । द्यावापृथिवि-भ्यामिति दोह्यमानामितिप्रकृतिशब्देनाभेदेन विकारापन्नात् । दुग्ध्वा स्थाली-ष्यन्ती , अन्यस्यकर्मणो भूतत्वात् । नार्तेव कर्मत्वेस्तोकानुमंत्रणं इति ऽथ वचनं दु-र्गमं स्यात् । ब्राह्मणे च मंत्रस्य स्तोक जोपार्थत्वदर्शनात् विपिनाकी नामासि:। तस्यनिघृणो भागधेयमिति ।
" स्तोकानामनुमंत्रणं " इति सूत्रम् । शालीकेरास्यात्मोपमन्यवस्यानो कुम्भाकाधा-यन पाततंच्चैव स्तोकानुमंत्रयेत् त(स्मि)न्नेवस्तोकानामंत्रभिवदतीति ।

" स्तोकानुमंत्रणम् "

स्तोकानुमंत्रणं कुस्तीके इति सूत्रम् । प्रत्येकं दोह्यमानानाम्[1]मनोह्य-मानानामपिमन्यवस्यानेव स्तोकानिविवक्षैव सर्वतोऽन्ते । बौधायनस्यात्तंच्च सर्वेषान्ते । दोग्धा पवस्तीर्थेन प्रपाद्य पुरस्तात्प्रत्यङ्मुखः स्थालीमुपधारयन्त्यां स्था-ल्यामानयति । पुरस्तात्प्रत्यगानयन्तं पृच्छति - कामधुक ? इति । आनयन्तीं स्थालीं प्रापयन्तां स्थाल्यादीनामित्यन्ये । यथेमं(ं)विधिं गतश्रियानतश्रियां च विकल्पयति ० यो० वा कश्चिदिति[2] । अनन्तरमित्यादेरनुगृह्णा[3]त्यत्रैवेति

- -

१- " कामधुक् " इति प्रश्न: । पु० का०आ० सू० ४।२-२४ ।
" कां पुष्यामसि " इति दोग्धारं पृच्छति । इति शर्माध्यम् ।
२- यो वा कश्चिदित्यस्य त्रिधा योजना आपाणित्यतिरिक्तानामगमकीणामपि दोमात्पूर्व्वं महेन्द्र एव । अथवा श्रीनर्दीनामेवनत्श्रीरनतश्रीर्वा सोमात्पूर्व्वं महेन्द्रं यजेतेति । पु० (भा०द०श० आप० श्रौ०सू०१२(दर्शपूर्णमासप्रकरणे) १-४-१४ ।
३- सूत्रे० - तत्रैव - ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

विपरिणामकस्य, इति ।

यद्येषोपसृष्टां मे प्रब्रूतादिति । अध्वर्युः परिकर्मिणमिति शेषः । दोग्धा(गार्हपत्यानां) आगच्छात् यजमानस्य एवमस्तु समुत्सृजति, उपसृष्टां प्राहुः । परिकर्मिण उपसृष्टेति प्राहुः । बहुवचनमविवक्षितम् । यः कश्चन प्राङ्मुखो गां दोग्धि । दोह्यमानामनु मंत्रयते - कुरुक्षेत्र० । द्यावापृथिवी सिंचेतं इत्यर्थः ।

आहरापः आग्नीध्रीति वेदेन निर्देशाद्धरणादन्यो न्यस्यर्थो वर्तीकः इति गम्यते ।

तथा चापस्तम्बः संततमानयन्दोग्ने पय आनीय संतापात्मानयति यावता मूलामिष्यन्मन्यते तावदानयतीति च । अमूमितीतरः प्रत्याह । कामधुक्षत्येतावान्मन्त्रः । अमूमिति वचनं नाम मात्रं, महेन्द्रायेति वचनात् । याज्ञिकाणां समस्त पाठात् ,प्राणो वाममूमिति नाम गृह्णातीति वचनात् । प्रतीकेन मंत्रोपदेशे विशेषविधानानर्थक्यत्वात् । पूर्वाद्यविवचनयोश्च समाप्तत्वात् । अन्ये उभयोर्मंत्रयोः प्रतीकग्रहणमित्याहुः । महेन्द्रायेतिवचनमितरेषां प्रदर्शनार्थत्वात्, तेषुवचन मिन्द्रशब्दस्य पठितत्वादिति पाठादवचनमुपपद्यते । अभिधानीयचिह्नयास्समस्तपाठः । प्राणो च मन्त्रस्य स्वरूपादेव प्राप्तत्वान्नामग्रहणमेव विधीयते । मधुमेतासां कांचिष्करोतीति प्रतीकपदस्योपपद्यते । त्रैणाभ्यासे वक्तव्ये कश्चन प्रयोजनम् आपद्येत एकस्मिन् विग्रहे निवृत्त्यर्थं पञ्चपदपक्षव्यवस्था निवृत्त्यर्थमिति केचित् । अन्येषां पञ्चाद्युच्चाद्यवचनं बहुपदी प्रदर्शनार्थं त्रैणाभ्यासस्य, त्रैणाभ्यासवचनम् एकस्य-पदी पञ्चपदनम्यासार्थमिति ।

प्रतीकपदी- कामधुक्षः प्रणो ब्रूहीन्द्राय हविरिन्द्रियामिति पृच्छति । अमूं यस्यां, देवानां मनुष्याणां पयो हितामिति० प्रत्याह । अमूमित्यस्य स्थाने गोनामग्रहणं , यदस्या नाम भवति गंगामित्यादि । तामनुमन्त्रयते सा विश्वायुरिति[1] । एवं द्वितीयां दोक्ष्यति, उपसृष्टाम् इत्यादि(यमु) यमुनां यस्यां देवानामित्यादि-प्रतिवचनम् , यद्वास्या नाम भवति । सा विश्वव्यचा इत्यनुमन्त्रणम् । एवं

१- प्रकि सा विश्वायुरित्यादि ।(का० श्रौ०सू० कं०मा० ४।२-२५)।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तृतीयायाम् उपसृष्टामित्यादि, सरस्वतीं यस्यां देवानामिति प्रतिवचनम्, एतत्ता-
ह्वा नाम भवति । हा विश्वकर्मेत्यनुमंत्रणम् । यथाम्नातम् ।

' वाग्विसर्गः '

त्रिष्टुभ् दुग्धायां वाचं विसृजेदच्छुष्मीन्द्राय ० कल्पतामिति ।
महेन्द्रायेति वा यदि महेन्द्रयाजी भवति । दोग्धारं प्रतिमन्त्रवचनमिति केचित् ।
दुग्धा गा अनुमन्त्रयत इत्यन्ये । धोक्ष्यमाणा इत्यपरे । अच्छुष्मीत्यिवर्जीय मन्त्र-
वचनं, निर्वचनस्य मन्त्रान्तराविधानत्वात् । त्रिर्वा प्रत्येकमनुक्रान्तानुविमानैः
सम्बन्धात् । अच्छुष्मीति वैकल्पिकस्य नोविधायकत्वेनार्थवत्वात् । त्रिष्टुभ् दुग्धा-
स्विति हरथा च वाचं विसृजेत्' इत्येतावदस्तु । तेनास्य नित्यविकल्पः ।
विसृजेदिति प्राग्दोहनादित्वाद्वचनमन्यं नावृत्तविशुद्धी भवति, पुनराध्यापन

- -

१- व्यभिचारे उत्तराभ्यां प्रतिमंत्रम् । व्यभिचारे हि परोक्षमिति एवं तथाप्यन्यत्र समस्तः
क्रियापदेशः । एवं तु विशेषः उत्तराभ्यां प्रतिमंत्रमभिदधाति ।

का० श्रौ० सू० ४।२-२५ ।

२-विसृजेद्वाचमुत्तरां कल्पतामर्थे (का० श्रौ०सू० कर्का० ४)२-२६ ।
३-' उत्तरायोक्त्वाति ' इत्येतावत्युक्ते न ज्ञायते कियत्यो दुह्यन्ते इति । अथवा-
' तिस्रो वा नित्यत्वात् ' तिस्रो वा दुह्यन्ते ' नित्ये हि. नित्यं अनुवचनं
व्यवस्थितमिति कर्काचार्यः । पृ० का०श्रौ०सू० ४।२-२७ ।
४- यथ्यायं नरो भवति आशिषुणां दोग्धावर्णमे क्वोऽविदाघ्यो यां तस्मा ऽ इति।
पृ० श० प्रा० १-७-१-७-७-१५ ।
५-अनुमिति ' हा विश्वायुः' रित्यथ द्वितीयां पृच्छति कामधुगा इत्यमुमिति '
हा विश्वकर्मीत्यथ ' तृतीयां पृच्छति कामधुगाऽइत्यमुमिति ' हा विश्वधाया'
इति तत्पृच्छतिवेदायुर्यानेता स्वेतद्धाति तिस्रो दोग्धि अर्धो वाऽतर्वोत्सोका
ऽन्य ऽस्त्रीनोतस्तोकेन्द्रः सम्वत्सरस्य कामंभवति । पृ०श०प्रा० १।७-१-१७-७-१६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रयोजनाभावात् । विसृष्टवागनन्वारभ्य तूष्णीमुत्तरां दोहयित्वा । तूष्णीं ग्रहणं वागिन्द्रियव्यापारनिवृत्तिः । यजमानं च अनन्वारभ्येत्याद्युक्त्यर्थम् । उत्तरान्तु इत्यपरिसंख्यार्थम्, एवमपरिमितार्थत्वाद उपपद्यते । उत्तरां दोहयित्वेत्यपरिमितानापेक्षतयुक्तं भवतीति कर्मान्तम् ।

कथं नाम: सान्नाय्यदुहः कल्पनाः समाम्नाताः भवन्ति, तावदेतत् तिस्र एवस्तु: । प्रथमामुत्तमां वा चतुर्विगृह्णीयाच्च च । एत द्यूत्तरामितरेतरां त्रिस्त्रिर्विगृह्णीयाच्च नैकैकस्य तामेव तत्कृत्वा विगृह्णीयादिति च कर्मान्ते । कल्पनाः , उपरि निमर्गो(नि) नास्तिप्रथमां वेत्यादि । त्रिमन्त्रेण सकृत्तूष्णीं विच्छिन्नं गृह्णीयात् । यदि प्रथमां यजिधोयमां मंत्रेण त्रिः दोहयित्वा उत्तमामेव द्विस्तूष्णीं विगृह्णीयात् , यदि द्वे- प्रथमां त्रिमन्त्रेण द्वितीयां त्रिस्तूष्णीं , एकैकस्यातामेवं यादृक्कृत्य:, त्रिमन्त्रेण विच्छिद्य त्रिस्तूष्णीं विसृष्टवागित्यादि त्रिष्वेव प्रथमां वाग्नियम्यते । त्रिर्दोह्यस्य वा , एताः पुरा मनुष्येभ्यश्चाप्यायते- इति साकल्यवचनात् ।।

अत्र यदि पंच सान्नाय्यदुहः, स्युः, प्रथमां चरमां वा त्रिर्विगृह्णीयादपि तत्र: प्रथमामुत्तमां(चरमां) वा त्रिर्विगृह्णीयादित्यपिर्विकल्प । उत्तराधारां दोहन इति विसृष्टवागनन्वारभ्योत्तरां दोहयेदिति बौधायन, आनीयमानमन्वारभेत वाचं च यच्छेदिति कात्यो, कुम्भं लभमानस्य वत्सापाकरण प्रभृतीन्मन्त्रान्तु साधयेदिति[1] बौधायन, दोहनप्रभृतीनिति शालीकिः, वत्सापाकरण प्रभृतीनिति कृष्टार्थताप्यान्त्रा(ना) तु सान्नाय्यादिति इतरेऽपेक्षाप्रसत्यावासेवनप्रभृतीनित्यर्थेति । दोहने[2] ऽप आनीय संक्षालनमानयति ,संपृच्यध्वं० सातय

१- द्र० दर्शपूर्णमास प्रकाश: पृ०२११ ।

२- दोहनेऽप आनीय संपृच्यध्वमृतावरीरिति कुम्भ्यां संक्षालनमानीयापिधानाभ्यन्युक्तं करोति कृ.४.६ गा कृ.६ गोपतिं मानीयकपतीरिमाविति वर्त्म कुर्वन्नांगुला लघ्वङ्गुष्ठाङ्गुल्यैकया ज्योतिष्कणाभ्यां पेकार्थे, द्वे, इयत्ते वा पुरस्तादुपसंधानातन्वितार्थं दोहयित्वा सन्ततमभिजुहोत्यापिधानादेन शीत कुम्भमातनक्ति ।

द्र० दर्शपूर्णमास प्रकाश:, पृ० २११ ।

CC.0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इति । अथैतदप्स्वपिगृह्य शीतीकृत्यातिरःपवित्रं दध्नाऽऽतनक्ति सोमेनत्वा[1]॰न्द्रायदधीति । महेन्द्रायेति वा यदि महेन्द्रयाजी भवति । पूर्वेद्युरपिकल्पितेन दध्ना, शीती कृत्वेति छान्दसो ल्यबभावः, अपपाठो वा । यावता पूर्वेद्युर्विदध्यन्मन्यते तावदातनक्ति ।

तृतीये सूत्रे चतुर्थ इति च, सूत्रं भित्त्वा कृत्वा संख्याविकल्पवचनात् । सूत्रेणातञ्चननियमं सर्वाः श्रुतिनियमः । अत्र तु पदान्तरमपि संभवति । येनकेनचित्तत्कृत्य यावतापूर्वेद्युर्विदध्यन्मन्येत वचनात् । यावता दध्ना आनीते घनीभावं सान्नाय्यं मन्यते तावदित्यर्थः । चतुर्थे सूत्र आम्नेयावतापूर्वेद्युर्विदध्यन्मन्यते इति

१- सोमेनत्वाऽऽतनच्मीन्द्राय दधीति दध्ना । महेन्द्रायदधीति महेन्द्रयाजिनः । (द्र० दर्शपूर्णमासप्रकाशः, पृ० २१२) । अयमपि न गृह्यमातञ्चनाभावात् इति भा० वृ० । पयसैव दध्नाऽऽतनक्ति इति सूत्रदीपिका ।उद्धृत्यातनक्ति प्राग्भूत शेषेणेत्यस्येति द्र० का०श्रौ०सू०४।२-३३ प्राग्भूत शेषेण पूर्वदिने कृत्वाऽग्निहोत्र होम शेषेण दध्ना दुग्धमातनक्ति । अवशिष्टं दधि दुग्धमध्ये प्रक्षिपति दधिसम्पत्त्यर्थम् ।

केचित्तु प्रातर्होम शेषेण, केचित्प्राग्दिनस्य सायं होमशेषेण, केचिदुभय होम शेषेण ।

शाखान्तरे नोपवसथस्य पुरस्तादेकाहे, द्वयहे, आतञ्चनस्योपकल्पनमुक्तमपि तदग्निहोत्रोच्छेषणेण दध्नातनक्तीति तद्दिने सायंहुतावशिष्ट यवाग्वा पिण्डमवदधातीति मानवं आपस्तम्बः एकस्याश्वोस्त्रिसृणां वैकाहे द्वयहे, त्र्यहे, चतुरहे वा पुरस्तादुपवसथादातञ्चनार्थं दोहयित्वा तेन शीतदुग्धेनातनक्तीति । अत एवचतुर्दश्यां रात्रावग्निहोत्र होमः कार्यः इति प्रतीयते । कुरोणस्य स्थालीस्थोग्राह्यो न स्रुग्गतः न वामावास्यायां सायं यवाग्वा हुताग्निहोत्र शेष होम शेषेण आतञ्चनार्थत्वाप्रसिद्धेः दध्ना इति श्रुतत्वाच्च । उच्छेषणाभावे तण्डुलैरोषधीभिर्वातञ्चनात् पञ्चाविकल्पत्वर्जम् ।

द्र० का० श्रौ०सू० वै० स० ४।२-३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

बोधायनस्तृतीये सूत्र आग्नेयं यावतामूर्ध्वमिध्ममन्वक्तीति शालीकिः । चतुर्थे सूत्रे यावता धनोभवतीति मन्यते तावतानयति । तृतीय इति वचनाच्चतुरिति नान- यनेन विनाचतुरानयनेन एवेति सूचिका (वा) तञ्चनस्य विशेषणं वा पदा- न्तरं वा । आतञ्चनं निमित्तकत्वात् बोधायनीयविरातंचनान्वीतानि भवंतीत्यतो ऽस्मात् शालीकिरपि तत्वात ञ्चनार्थं सृष्टं भवति । तस्मिन्नविद्यमाने स्तेनापि केनातंच्यापिति अविष आतञ्चनं दधि तस्यातंचनस्य नान्यस्यैति पूतिकादी- नि यद्यपि न विज्ञानीतिसिद्धवदनुवादात् दधि सत्यितिविज्ञात्वा तर्थोऽनु- वादः । अविद्यमानार्थोऽपि इंधनेदिति तस्मिन्नु वधन्याहति अर्थप्राप्तं पूतिकादीनि ग्रहणानि वाक्यशेषभूतानां ग्रहणं न्याय्यमिति । तथा च यत्सूत्रोक्तेत्यादि ग्रहणविज्ञानं पूतिकादीनां तृणानां - आतंचनेनेति सामान्यवचनात्लौकिक स्यापि तिरिक्तस्यातंचनस्य च अन्योऽभावे ग्रहणं भवति । अग्निहोत्रोच्छे- षणमभ्यातनक्ति - [1]यज्ञस्य संततिरसि० अन्वाहेति । [2]अग्निहोत्रोच्छेषणाभ्या- णमभ्यातनक्तीत्युक्तं शालीकेस्तोऽस्मात् बोधायनोऽग्निहोत्रोच्छेषणमानीय हविरातंचनार्थमेवमस्याभिप्रायमन्यानकं भवतीति ।

अथैतदुन्वता कांस्येन चमसेन वाऽपिदध्यात्ऽयमसि० हरत इति । उदन्वता पिधायचार्यां रात्रिं परिहार्यावितिबोधायन: तदन्वतापिधाय स्थिता अपो पिवध्यातिति शालीकिः । उदन्वतापिधायायोऽन्यत्र स्थिता पात्रेणापि धाम्नु , एतावता रक्षां धात इति द्वितीयः ।

१- यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनुसंतनोमीत्यग्निहोत्रोच्छेषणमन्वाधा- यं पयः सोमं कृत्वा दध्यां योनिमपि गच्छतु । पर्णवल्कः पवित्रं सौम्यः सोमादि निर्मित इति पतिवासन शकटमन्वबध्नाति ।

द्र० दर्शपूर्णमास प्रकाशः, पृ० ११२ ।

२- द्र० बौ० श्रौ० सू० २०।४-५-२३।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ तृतीयोऽध्यायः

तदुपरि इव निदधाति [१] यत्र पुष्पं मन्त्रो- विष्णोर्हव्यं रक्षस्वेति । निधानमन्त्यागार एव मन्त्रव्याख्यावकाशाभावात् ।अस्मिन्काले दर्भैः प्रस्तरशिरसि वत्सानपाकरोति तूष्णीम् । अपाकरणं वत्सानां दर्भैरित्युक्तं, शाखया विच्छिन्नकत्वात् अध्वर्युप्रतिपत्तौ शाखाभिधानाभावात् मन्त्रव्याख्यानाभावात् पर्णशाखया[२] वत्सानपाकरोतीति च श्रुतार्थत्वात् , मंत्राणां च तत्सम्बन्धत्वात् पृथक् कृत्स्नविधानात् ।शाखामाच्छिनत्तीति[३] वैकल्पस्य विकल्पितत्वात् साधारणत्वेऽपि दर्भैरित्युक्तं, दर्भैरिति वचनमुपेक्ष्यम् ।

अग्निपरिस्तरणम् [४]

अग्नीनां परिस्तरण इति सूत्रमाचार्यैरनोक्तमाकीर्णमन्यत्र उपस्तथ एवाग्नीन् यथाऽत्यन्नं परिस्तृणीयादेवं हि ब्राह्मणं भवत्युपासितम् एवो वक्ष्यमाणो

- -

१. विष्णोर्हव्यं रक्षस्वेत्यनधो निदधाति । न भूमौ निदधात्युपरि निदधातीत्यर्थः । इति भा० श्रौ० द० पू० प्र० पृ० ११३.

२- स वै पर्णशाखया वत्सानपाकरोति । तद्यत्पर्णशाखया वत्सानपाकरोति यत्र वै गायत्री सोममच्छापतत्तस्या आहरन्त्या अपादस्तान्यायत्य पर्णं प्रचिच्छेद गायत्र्यै वा सोमस्य वा राज्ञस्तत्पतित्वा पर्णो भवत्तस्मात्पर्णो नाम तद्यदेवात्र सोमस्य न्यक्तं तदिहाप्यसदिति तस्मात्पर्णशाखया वत्सानपाकरोति ।

श० प० ब्रा० १।७-१-६-१६-१ ।

३- तस्माच्छिनत्ति । इषे त्वोर्जे त्वेति वृष्ट्यै तदाह यदाहेषे त्वोर्जे त्वेति यो वृष्टाद् ऊर्ग्रसो जायते तस्मै तदाह (कृ० य० ब्रा० १।७-१६-१६)

४- स हैवं यत्र उवाच । नग्नताया वै बिभेमीति का तेऽनग्नतेत्यभित एव मा परिस्तृणन्त्विति तस्मादेतदग्निमभितः परिस्तृणन्ति । क्षुधायाः वै बिभेमीति का ते तृप्तिरिति ब्राह्मणस्यैव तृप्तिमनु तृप्येयमिति तस्मात् संस्थिते यज्ञे ब्राह्मणं तर्पयित वै ब्रूयात्तस्मैतत्तर्पयति । श०(श० ब्रा० १।२८।१-३-४-१-१३)।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१०१ दैवता भवन्ति य एवं विद्वानग्निमुपस्तृणातीति सूत्रकृतौ: कात्यायनीयकल्पेना-
ऽश्नीयादिति बौधायनस्यापि पक्ष एव नक्तमेव न विकल्प:, यथोत्पन्नं गार्ह-
पत्यादिब्राह्मणोक्तपरिस्तरणविषयमेव न प्राग्गार्हपत्याग्नि: ।

अरण्याशनविचार:

आरण्याशन इति आरण्यं चापरवाश्नीयादिति बौधायनोऽप्येवेति शालीकिनारण्यं नापरमश्नीयादित्यपिमन्यन्ते । अत्रापि पक्षा:- ब्राह्मणोक्ता: यजमानेन ग्राम्याश्चेत्यादिकल्पसूत्रे अशनावच(न)मशनादि ग्रहार्थं ब्राह्मणोक्तपरिग्रहार्थं वा । एतदेव युक्ततरं दृश्यते, अशनाशने द्वैधमपि मन्यन्तेत्युक्त्वा
द्वयोरूपन्यासेन ज्यायसाँ
सिद्धे श्रयाणामुपन्यासादशनमेवाभिप्राय इति गम्यते । आहवनीयागारे यजमान: शेते, गार्हपत्यागारे वेति यावदन्तेऽस्य । इत्यौपवसथ्यं कर्म । प्रमादादुपवसथे-ऽतिक्रान्ते प्रधानयागकालेऽप्रतिपदि यजनीयेऽन्वारम्भाधानादीनि क्रियन्ते । पौर्णमास्यां उपवसथता शाखान्तरात् । अमावास्यायां तु सन्नयतो दध्यभि-भ्यदे: प्रधानविरोधादापिन उपवसथेति । अन्ये तु कुर्वन्तोऽत्र इति भार-द्वाजादिवचनात् लौकिकेऽपि दधनि मंत्रप्रयोगोपदेशात्तस्यापि उपवसथकाललभ्यत इति । तथा चाभियुक्तवचनम्-

अन्वाधानादिवर्हिर्वेदुपराधान्नलङ्घ्यते ।
कालस्य लक्षणमुक्तत्वात्तत्काले पि वार्धिके ॥
स्वस्थात्सान्नाय्ययागेऽपि दध्यानीयाभिमंत्रणमिति ।
विध्यपराधात्सर्वं प्रायश्चित्तं कर्तव्यमन्यस्यावचनात् ॥

१- स वा आरण्यमेवाऽश्नीयात् । या वाऽऽरण्या ओषधयो यद्वा वृक्ष्यं तदु ह स्माऽऽहाऽपि बर्कुर्वार्ष्णो माषान्मे पचत न वा एतेषां हविर्गृह्णन्तीति तदु तथा न कुर्याद् व्रीहियवयोर्वा एतदुपजं यच्छमीधान्यं तद्व्रीहियवावेवैतेन भूयांसौ करोति तस्मादारण्यमेवाऽश्नीयात् । श०ब्रा० १-१-१।१०-२२ ।

(श्रौ०टि० भा० पृ० ३०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

६ अथ प्रातर्होऽग्निहोत्रे स्तरिंपूर्णी[५] - कर्मणे वां वेषेभ्यः स्थेयामिति। उत्तरेणाहवनीयं तिष्ठन् पाणी संमृशेदिति बौधायन उत्तरेण गार्हपत्यमिति शालीकिः। नक्तं परिस्तीर्णा अग्नयो भवन्ति यदु वा परिस्तीर्णा भवन्त्या-हवनीयमेवाग्रे पुरस्तात्परिस्तृणात्यथ दक्षिणतोऽथ पश्चादथोत्तरतश्चैवमन्वा-हार्यपचनं परिस्तृणात्येवं गार्हपत्यम्[७] । नक्तं परिस्तरणं ब्राह्मणवचनात्, उपा-स्मिपचो वक्ष्यमाण इत्यादि ब्राह्मण एवाहुरिति पक्षान्तरस्य चोदितत्वा-दितरः पक्षः। अथवायमेव क्रमः पूर्वोऽग्निरपरश्चेतिवचनादवधारणाच्चाहव-नीयमेवाग्रे इतिपरिस्तरणविधिराचारात् सिद्धः। दक्षिणा उदगग्रा अथ-स्तात्पश्चिमा उत्तरेणाप्युपरि प्राच्योऽपि स्याच्च परिधी मध्यस्य दक्षिण-मवोक्षितुरनिति क्रमोऽयाचारात् सिद्ध इति चेन्न। प्रागुदगारम्भापवर्गत्वात्, प्रादक्षिण्यवचनम् आचारात् सिद्धस्य[८]संग्रहार्थं परिस्तरण इति सूत्रे शालीकेराख्या-तमपि पक्षमन्यस्यात्रीकस्मात् बौधायनो गार्हपत्यमेवाग्नेः पुरस्तात् ० सांचरत

- -

२- स आहवनीयागारे वै तां रात्रिं वसीत । गार्हपत्यागारे वा देवान्वा एषऽउपावर्तते यो व्रतमुपैति स यानेवोपावर्तते तेषामेवैतन्मध्ये वसोऽधः वसीताऽधस्तादिव हि श्रेयस उपचारः। द्र०(श०ब्रा० १-१-१-१०-२२)।

३- द्र०(श०ब्रा० १-१-१-१०-२२-७)।

४- सर्वा वा उपवसथकालायां सर्वं क्रियते । प्रमादादौपवसथेऽतिक्रान्ते प्रधानभूत यागकालानतिपत्तौ तस्मिन्नेवान्वाधानादीनि क्रियन्त इत्यविरोधात् ।

द्र० दर्शपूर्णमासप्रकाशे ,द्र०(ब०भा०प०सू०१७-१-४-१४)।

५- कर्मणे वां वेषेभ्यः स्थेयामिति हस्तावपनिज्य यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्तृणामि संतत्यै त्वा यज्ञस्येति गार्हपत्यात्प्रक्रम्य संततामुपराजीं स्तृ-णात्याहवनीयात्पूर्णी दक्षिणामुत्तरां च ।

द्र० दर्शपूर्णमासप्रका, पृ० २२२ ।

६- द्र० बौ० श्रौ० सू० २०-४-५-१३।८ ।

७- अथ तूर्णीं परिस्तृणाति । द्र० श० ब्रा० ११२-२-१.१५-२२.

८- द्र० बौ० श्रौ० सू० २०-५-१४।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवमेनान्वाहार्यपचनं[1] परिस्तृणात्येवमाहवनीयमिति । परिस्तरणीयानिण् तृणानि परिभोजनीयेभ्यः ।

अग्न्यायतनेषु दर्भं संस्तृणाति । अथाहवनीयं निरस्यतीति सिद्ध-वद्वचनात् दक्षिणेनाहवनीयं ब्रह्मासनमुत्तरेण यजमानस्योत्तरेणाहवनीयं प्रणीतानां वेदा उत्तरां श्रोणिमुत्तरेण होतुरुत्कर आग्नीध्रस्य जघनेन गार्हपत्यं पत्न्याः काले काल एव वा दर्भान् संस्तृणात्येकैकस्य चौकमण्डलाकुपं च स्यादा-चमनार्थं इति दर्शनाच्च ।

यज्ञायुधानां सादनम्

अथ उत्तरेण गार्हपत्यं तृणानि संस्तीर्य[2] तेषु द्वन्द्वं यज्ञायुधानि संसादयति । द्वन्द्वं च यथाविहितानि । स्फ्यश्च कपालानि चाग्निहोत्रहव-णीं च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषदुपले च जुहूं चोपभृतं च ध्रुवं च ध्रुवां च प्राशित्रहरणं चेडापात्रं च वेदाग्रं च पिष्टोद्वपनीं च प्रणीताप्रणयनं[3] चाज्यस्थालीं च वेदं च दारुपात्रं च योक्त्रं च वेदपरिवासनं धृष्टिं चेध्मप्रव्रश्चनं चान्वाहार्यस्थालीं च मदन्तीं च यानि चान्यानि पात्राणि तान्येवमेव द्वन्द्वं सादयति, स्फ्यादिविशेषानुक्रमणं सामान्यवचने[4] तत्सिद्धे द्वन्द्व-विरोधं निरासार्थमेवमेव द्वन्द्वमिति अन्यग्रहणं योक्त्रमदन्तीवेदपरिवासनेडापात्रा-

---

१- कु० दर्शपूर्णमास प्रकाशः, पृ० २२४ ।

२- तत्रैव पृ०२२३ ।

३- अप्सु गृहीता आपः प्रणीताः, तासां स्थापनं स्व स्थाने निधानम् प्रणीता-प्रणयनम् । अथ प्रणीताः दक्षिणतः परीत्य निनयति । कु०के वा एतद्यज्ञ-स्यैव तनुते यन्न निनयेत्पराङ्गुष्ठ विगृह्य एव यज्ञो यजमानं प्रदक्षिणीया स्यादेव यज्ञो यजमानं न प्रदक्षिणाति तस्मात्प्रणीता दक्षिणतः परीत्य निनयति । कु० (श०ब्रा० १।९-३-२४-६-३१)।

४- यज्ञिदारणं लौकिकमिदम् । मदन्तीनां पात्रं मदन्तीपात्रम् । तप्तास्ता आपो मदन्त्य इत्युच्यन्ते । "वेदः" दर्भमयो वत्सजानुतुल्यः स च याज्ञिक (शो०टि० श० पृ० कु०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुनःसंग्रहार्थम् । अत्र भाष्ये यजमानादीनां सादनार्थमप्युपग्रहणमिति वचनात् । कर्को यजमानादीनां सादनमनुक्तमिति शास्ते । पुन: छन्दोग्रहणं परिमाणार्थं सर्वत्र सान्नाय्यपात्रादिषु अनुवाक्यान्तत्वात्पुनःसंग्रहार्थम् ।

ब्रह्मत्वं करिष्यन्नप्युपवीत्यपआचम्याग्रेणाहवनीयं परीत्य दक्षिणत उदङ्मुखस्तिष्ठन् ब्रह्मसदनमुपतिष्ठते " नमो ब्रह्मसदनायेति । एतस्मिन्काले ब्रह्मा, यज्ञोपवीती अजिनेन वाससा सूत्रेण वोत्तरासंगि अक्लिष्टाभिरद्भि: प्रतीचीत्याद्युक्त्याचमनं कृत्वा तीर्थेन प्रपद्याग्रेणाहवनीयं समपरेण वा ० दक्षिणतो गत्वा ब्रह्मसदनस्य दक्षिणत उदङ्मुखस्तिष्ठन् ब्रह्मसदनमुपतिष्ठते । ब्रह्मण उपवेशन इ:स व्यवेत्य दक्षिणेनाहवनीयमुपविशेदिति बौधायनोऽव्यवेत्य[5] दक्षिणेनाहवनीयमिति शालीकि: । सामान्येतानि कुर्यात्प्रणीता आहवनीयं ब्रह्माणमिध्माबर्हिरिति यज्ञस्य शिर इत्येतमाचक्षते ।

[6] आसनात्तृणं निरस्यतीत्यत्र दैक्षिणस्य ० पाश्चात्य इति । अपउप-स्पृश्य उपविशति । स्वायतन उदङ्मुखो दक्षिणाचिरे वोपस्थेनोपविशति- उन्नि-यत उद्धृतासन मैथुनमिति ।

- -

मारत्वक्षमन्तस्य:" वत्सतं पशुकामस्य" इत्यनेन विहित:। (द्र०) दर्शपूर्णमास प्रकाश:, पृ० २ ।

५- ब्रह्मासनादेकं तृणं गृहीत्वा " ॐ निरस्त: पराश्वा वसु तेन यं द्विष्म: इति मंत्रेण नैऋत्यां दिशि निरस्य अप उपस्पृश्य " ॐ इदमहं बृहस्पते: सदसि सीदामि प्रसूतो देवेन सवित्रा तदग्नये प्रब्रवीमि तद्वायवे तत्पृथिव्यै" (का० श्रौ० सू०२-२-१) इति मंत्रेण ब्रह्म सदने आहवनीयाभिमुख: उपविशेत् ।(द्र०) कातीयेष्टिदीपक: पृ०५।

६- द्र० बौ० श्रौ० सू० २०-५।१४।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथैनं समीदाते (तं) पात्रमाणावापृथिवी ० यथान्ह इति । इमे द्यावापृथिवी, मंत्रलिंगात् । उपविश्य जपति – भूर्भुवः (स्वः) सुवः क इदं ब्रह्म भविष्यति स इदं ब्रह्म भविष्यति प्राणः प्रजापतिर्यज्ञोऽहं(यज्ञो) यज्ञो ब्रह्मणावेदवाचो बुधुर इव वन्हि बलिवर्द इव युक्तो हव्यं वदयाहं देवेभ्योभूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः प्रपद्ये वायुं प्रपद्ये ब्रह्म प्रपद्ये, दासंप्रपद्ये – स्वान्माकूर्णं प्रपद्ये प्रजापतेर्ब्रह्मकोशं प्रपद्ये नार्तो देवतां वाचं प्रपद्य इति । तं यजमानो वृणीते–" भूपते भुवन ० वृणीमहे वीत हव्यो पुरोक्षितं येनायन्नुत्तमं स्वर्देवा अंगिरसो दिवंमिति । वृतो ब्रह्मा जपतिअहं भूपतिरहं० (जपं) ज्यंकरिष्यामि ब्रह्माणं मावृधावीतहव्यो पुरोक्षितं येनायन्नुत्तमं स्व देवा अंगिरसो दिवम् ।

देवसवितरेतन्त्वावृणीते० बृहस्पतिर्देवानां ब्रह्मास्मा मनुष्याणां बृहस्पते यज्ञं गोपायेति । असको देवदत्त इति स्वनाम गृह्णाति । एवं ब्रह्माणं– दक्षिणत उपवेश्य पृष्ठ्यां स्तृणाति संतता गार्हपत्यादाहवनीयायाचत्स्य संततिरसि० त्वा यज्ञस्यस्तृणामीति । गार्हपत्याहवनीययोर्मध्येऽप्र सारिता रज्जुः पृष्ठ्या।पृष्ठे भवा, तत्सम्बन्धाद्यत्प्रदेशवचनः पृष्ठ्याशब्दः, मध्य इत्यर्थः । पवित्रयोः पृष्ठ्यास्तृणानामिति दर्शनात् स्तरणवचनाच्च तृणमिति गम्यते , कत्यायेरी परिभाषिनीभ्यः इत्युक्तं पृष्ठ्यायेस्तरणवात सूत्रं बौधायनस्य, होमत्व पृष्ठ्यां स्तृणीयादिति शालीकिः ।

- -

१– विहारस्योत्तरतः उदङ्मुखोपविष्टो यजमानः प्राङ्मुखोपविष्टं ब्रह्माणं– सादातेन च हिरण्येन दक्षिणहस्तेन ब्रह्मणे दक्षिणं जान्वालभ्यवमुक्तोत्रोऽमुकर्तृ पौर्णमासेष्ट्याऽहं यक्ष्ये , तत्र " ॐ भूपते भुवनपते महतो भूतस्यपते ब्रह्माणं त्वावृणीमहे ।

बौ० का० श्रौ० सू०२१९–२७ ।

२– ॐ भूपतिरहं भुवनपतिरहं महताभूतस्यपतिर्भूर्भुवः स्वर्देव सवितरेतन्त्वा वृणीते बृहस्पति ब्रह्माणं तदहं मनो प्रब्रवीमि मनोगायत्रीगायत्री त्रिष्टुभे , त्रिष्टुब् जगती जगत्यनुष्टुभेऽनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम । इति जपेत् – (बौ०) (का०श्रौ०सू० २१९–२८) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

" पवित्रकरणम् "

१

बर्हिषः पवित्रे कुरुते प्रादेशमात्रे समे अप्रतिच्छिन्नाग्रे अनखच्छिन्ने एवे प्राणापानौ० शोधने इति । बर्हिर्ग्रहणं स्तरणार्थात् ग्रहणार्थं पृथ्व्यां-तृणानामिति प्रत्युपक्रमाच्च । पवित्रकरणं स्तरणार्थादिति गम्यते । समग्रहणं परिणा(मा)णार्थं पवित्रग्रहणे नियमः सर्वकृत्वात्, सर्वस्याप्राप्तिं- र्भिन्नो व्याचारात् । पवित्रयोः करण इति सूत्रं बौधायनस्य, पुष्पाणां तृणाना- मित्यापस्तम्बो , येऽनुयुक्ताः कुशास्तेषामिति शालीकिः। सूत्रमिति वैदि- स्तरणार्थेभ्यः ।

३

कौ पवित्रैरनुमार्ष्टि- पवित्रेस्थो वैष्णव्यौ स्थो वायुपूतस्थो विष्णो- र्मनसा पूतेस्थो यज्ञस्य यजनेस्थ इति ।

४

अपरेण गार्हपत्यमुपविश्य कंसं चमसं वा प्रणीताप्रणयनं यावति।

- -

१- कौशं बर्हिः। कुशा एव बर्हिः शब्देनोच्यते न संस्कारः । कुत एतत् ? असंस्कृते- ऽपि प्रयोगदर्शनात् । " उपदिशन्ति कुशानि बर्हिर्विस्तरन्ति । इति। साधुत्वात् तत्प्रयोग इति चेन्न । इतरेतराश्रयदोष प्रसंगात् । बर्हिशब्देनोद्दिश्य संस्कारविधा- नात् , संस्कारनिमित्तत्वे बर्हिष्ट्व इति। जाति निमित्तत्वे पुनरेषदोषो न भवति, तस्माज्जातिनिमित्तो बर्हिष्ट्व इति । चिन्तायाः प्रयोजनम् " बर्हिषा यूपा- वटमुपस्तृणाति " इत्यत्र संस्कारा न कर्तव्या ।

" कुशा कार्यः तस्येदं कौशम् " शैषिकाधिकारस्थेन " तस्येदम् " इत्यण् साधुत्वम् ।

पृ० का० श्रौ० सू० ११३-१२ कर्का०

२- बौ०श्रौ०सू० २०-५-१४।८ ।

३- पवित्रेस्थो वैष्णव्याविति यजुर्वै पवित्रम् यजि वैरस्य इत्येतदाह ।

पृ० (श० ब्रा०१।१-३-४-२)।

४- वानस्पत्योऽसि देवेभ्यः शुन्धस्वेति प्रणीता प्रणयनं चमसमद्भिः परिदा- स्यति तूष्णीं कंसं मृन्मयं च कंसेन प्रणयेद्ब्रह्मवर्चसकामस्य मृन्मयेन प्रतिष्ठा कामस्य

(शौ०टि०श्रौ०सू० पृ०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वा ब्रह्मा गोदोहनादिपरिग्रहार्थः । प्रयोजनार्थानां पात्राणां संस्कारापि: प्रोक्षणं प्राक् प्राक्प्रोक्षणादिति केचित् । तूष्णीमिति कल्पः इति भाष्यम् । स्वनेव प्रयोगवृत्तिः । तस्मिंस्तर: पवित्रमप आनयन्नाह-

अथ प्रणयनम्

[५] ब्रह्मन्नपः प्रणेष्यामि यजमानं वाचं यच्छेति । तदुक्ता[६] प्रतीति- "देवसवितः प्रसुव यज्ञं देवता यज्ञपतिं नाकस्य पृष्ठे स्वर्गे लोके यजमानो अस्तु । सप्त ऋषीणां सुकृतां यत्र लोकास्तत्रेमं यज्ञं यजमानं च धेह्योंप्रणयेति प्रतीति। अनुज्ञां ददाति - ॐ प्रणयेत्युच्चैः, परार्थत्वात् । अध्वर्युः प्रणीता प्रणयनाग्निः पूरयति । प्रणीतानामुत्पवनादिकेचिदिच्छन्ति रश्मिपवित्राभिरिति लिंगात्, नेत्यन्ये लिंगं चादित्य रश्मिभ्याभिरित्यपि संभवति इह च नोकमिति। एवं प्राणधार्यमाणोऽविभिन्नत्त् कुत्वोत्तरेणाहवनीयं दर्भेषु सादयित्वा दर्भैः प्रतिपाद्य, प्रणयन मंत्रो - न आपः प्रणयामीति अन्येतिकरणानुक्तं पृथिवीं मनसा ध्यायेत्[७] । एवं मनसा प्रणयनमेवं मंत्रलोक: , ब्राह्मणार्थस्य परिग-

---

गार्हपत्येन पशु कामस्यापरेणगार्हपत्यं पवित्रान्तर्हितं चमसं निधाय तस्मिन्नपो वा- गृह्णाति स वो गृह्णात्, कस्मै वो गृह्णामि, तस्मै वो गृह्णामि पोषाय च इत्यप आनयति ।। द्र० दर्शपूर्णमास प्रकाश: ,पृ० २२७)

५- उपविष्टं चमसं पूरयित्वा प्रोक्षणीवदुत्पूयाभिमन्त्र्य ब्रह्मन्नप:- प्रणेष्यामि यजमान वाचं यच्छेति संप्रेष्यति सर्वत्र प्रावी उक्तेकरोति ।

(दर्शपूर्णमास प्रकाश:, पृ० २२८)।

६-तत ब्रह्मा ॐ प्रणय यज्ञं देवतावर्धय त्वं नाकस्य पृष्ठे यजमानोऽस्तु । सप्त- ऋषीणां सुकृतां यत्र लोका स्तत्रेमं यज्ञं यजमानं च धेहि - (का० श्रौ०सू० २।२८) इत्यन्तमुपांशु पठित्वा " ॐ प्रणय " इत्युच्चैः अध्वर्यो: अनुज्ञां दद्यात् यथा अध्वर्युः शृणुयात् ।(द्र० कातीपक पृ० ६) ।

७- कोऽप: प्रणयति स व: प्रणयत्वपो देवी: प्रणयानि यज्ञं संतन्वन्तु:। उरं

(शौ०टि० क० पृ० ५०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

क्षीतो भवति उभयं कर्मान्ते वक्ष्यते । प्रणयन्न् व्याप: प्रणयानीति पृथिवीं मनसा ध्यायेदिति पूरयित्वा प्रणयेत् एवं सुपर्णमि व्यग्निमिति (विशेषं) विशेषणं कस्यचीच्छी पूरणे भवति । वत्प्रभावार्थमिति चैन्न । अन्यत्र वत्वं कुर्वीन्नित्यादौ यत्कारणान्तमपि वक्तव्यं स्यात् । अस्मिन्नभिप्रायो पूर्णपात्र-मिति च सिद्धवन्नो वचनात् । पाकार्थमपनयने दर्शो तदिह पूर्णं उपपद्यते । इध्मा प्रणीतात् प्रणीयमानात् वाचं यच्छत्या हविष्कृत: वान्नायुं वीक्षमान यातयो यजेत अतु पुष्यरिति अधिवपने वाचं यच्छत्याक्पालोपधा-नात् संवपने वाचं यच्छत्यासमभिवासनात् इध्मवर्हिराद्धीयमाण आप्रोक्षणी-नामासादनात् । आहविष्कृत: हविष्कृता सह हविष्कृता वाचं विसृज्येति वर्त-नात् यातत: यातस्मात् यदाहाध्वर्युर्हविष्कृद्धीति । आकपालोपधानादित्यभिविधि: आ समभिवासनात् सर्वेषामभिवासनं यावत् भस्मनाभिवासयत्वेनाभिवासयति प्रोक्षणीरासादयेति वाचनिकम् ।

अध्वर्युयजमानानां वाग्यम:

अध्वर्युयजमानानां वाग्यम: प्रणीताभ्य (भाजस्य) उमा वाग्यमौ भवतीति प्रणमु: (ज:)

हविष्कृता वाचं विसृज्यैवं चैव च करोतीत्येत (व) त्सामानकर्तृत्वादध्वर्यो तद्वि-त्वेति यजमानस्यैव प्रकृतस्य मंत्रविधाने विध्यौवरंकायां आविष्करार्थमुकमा हविष्कृद् इत्यतावि-(इत्याविधि) परिसंख्यार्थम् । तत आरभ्य (ते) तत्रैव वक्तव्यं स्यात्,काल-विप्रकर्षोऽर्थक: स्यात् । प्रदक्षिणमावृत्य प्रत्युदावृत्याऽदर्शनात् सव्यहोतृ-णमित्येन शूर्पं वैणायत्वीति । वैणायत्वेति शूर्पादानमंत्र: । वैणायं इतिवादय

- -

भवन्ती घृतपृष्ठा उपाकु: उत्पवीनं यजमाने न्यच्छन्तीरिति समं प्राणीधार्यमाण: स्फ्यैनोपस्तूयाविषि च्छन्दति ।

पु०(दर्शपूर्णमासप्रकाश:, पृ० २२८)

८- पृथिवीं च मनसा ध्यायति "(पु० दर्शपूर्णमास प्रकाश:,पृ० २२६) ।

९- प्रणीयमानात् वाचं यच्छतोऽध्वर्युर्यजमानश्चाऽऽहविष्कृत: ।

पु० दर्शपूर्णमास प्रकाश:, पृ० २२६

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्यर्थाभावा(तं) नैतयोश्च शाखि(वि) णीकेणांशुणावान् । एवं च नानावीजेषु तंत्र तुल्यत्वानभिव्युपपद्यते । अन्यकल्पे व्यावृत्त्येवा विशेषा-भावात् [1] विनस्थानाम्नातत्वादयमेवाभ्यर्थ इत्यन्ये सम्भवमित्यर्थः । आम्नातव्याध्याहारात् च समुदायावेदार्णं च शब्द शब्दस्य समुदायविषय स्योपपत्तेः । गार्हपत्ये प्रतिपत्ति - प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति त्रिः । एतदेव त्र्यं प्रतिपत्ति सह्य सकृन्मन्त्रेण त्रिस्तूष्णीम् । अथ अनेन गार्हपत्यमग्नि ष्टमानो भवति । व्रीहि[1]भिरुद्धव्यमद्धुवा , व्रीहिभिरिष्ट्वा व्रीहिभिर्यजेतायवेभ्यो, यवैरिष्ट्वा यवैर्यजेत व्रीहिभ्योऽपि वा , व्रीहिभिर्यजेत यवैर्वा यजेतेत्याग्रायणप्रकारप्रकरणपाठात् । व्रीहिभ्यानां मेधः पुनरत्यमान इति शाखान्तरे सकरणमंत्रलिंगाच्च । अग्निस्थमग्निमापीपस्थम्, मनः [2] शष्टं प्राणमन्नाऽस्मिन्नभिधीयन्त इति वा ।

शकटधूरभिमर्शनम्

तस्योत्तरां धुरमभिमृशति - "धूरसि धूर्व० धूर्वाम इति तस्य समीपमेत्य धुरिति युगच्छि(द्रे)द्वेऽन्तरालमुच्यते ते द्वे भवतः युगस्य, तयोरुत्तरामभिमृशति ।

[3] पत्नीऽभिमन्त्रयते - त्वं देवानामसि सस्नितमा इति । विष्णोः क्रमोसीति दक्षिणमनस्य प्राप्तिं क्रमित्वा । अग्रप्राप्तिम् अग्राग्रं क्रमित्वा तस्मिन्नपरं विन्यस्य । [4] पश्चात्कृत्य प्रउगे पूर्वं निदधाति । शकटमन्यात्कृत्य तस्य प्रउगे पूर्वार्धे पूर्वं पूर्वं पश्चि पश्चिमे निदधात्येव ।

- -

१- "व्रीहीन्यवान्वा हविषि" (का० श्रौ० सू० १।६-१ क० भा०)।

१- हविषि चोदिते व्रीहीन्यवान्वा प्रतीयात् " कर्काचार्य: ।

२- धूरसीति दक्षिणां युगधुरमभिमृशत्युत्तरां वा ।

३- त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं जपति ।

४- कं स्तौति सव्ये चक्रे दक्षिणं पादमत्याधायाक्रमासि इत्यारोहति।

द्र० दर्शपूर्णमास प्रकाश: , पृ० २३१(का० श्रौ० सू० १।५-२०- सूत्र-५-६-७)।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ पुरोडाशीयान्प्रेक्षते[१] – मित्रस्य त्वा० हिंसिषमिति । अमंत्रेण निर्वपति मुष्टिनैव गृहीत्वाग्निरित्यापिमन्त्र इत्याचार्यवचनलिंगात् ।

अथ स्वाभूते हविर्निरुप्यमाणं यजमानो नुमन्त्रयते – अग्निं होतार० मे अस्त्वीति । एककल्पितविरुद्धं हविरित्येकवचनान्निरुप्यमाणमिति वर्तमाननिर्देशाच्च वर्तमानक्रियायोगोऽप्यग्निं होतारमिति सकृत्क्रियान्तरेण व्यवायादित्यन्ये । स्वाभूत इति वचनम् , वीतं सान्नाय्यस्येति वचनात् निर्वापस्थानत्वादोहनस्य तत्राप्यनुमन्त्रणप्राप्तेस्तन्निवृत्यर्थम्, आज्यनिर्वापेऽपि च पवत्त्या हविष्कृत इति वचनात् ।

- -

१– उरुव्यचा असीति परिणाहमपह्नाय मित्रस्य त्वा चक्षुषा प्रेक्षे इति पुरोडाशीयान्प्रेक्षते । द्र० दर्शपूर्णमास प्रकाश: पृ० २३२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ चतुर्थोऽध्याय:

हविर्निर्वापविचार:

ब्रीहीनेव निरुप्यमाणं स्पृष्ट्वा अपातितवृत्त्या वाचं यच्छत्या- हविष्कृत:। तदभिमन्त्रणानुकृत्या वाचं यच्छति । अध्वर्यु: एतामेव प्रतिपदं कृत्वा-ऽग्नीषोमाभ्यामिति[1] , पौर्णमास्यामिन्द्राय वैमृधायेति; ऐन्द्राग्निभ्यामित्य-मावास्यायामसन्नयत० इन्द्रायेति , सन्नयतो महेन्द्रायेति० वा , यदि महेन्द्र-याजी भवति । एतामेव या पूर्वकृत्ता प्रतिपदामेवात्रापि प्रतिपदं प्रभृति कुर्यात् देवस्यत्वेत्यादिमादिकुर्वेत्यर्थ: । देवस्य त्वा हस्ताभ्यामग्नीषोमाभ्यां जुष्टं निर्वपामीति[2] निरुप्तेन यजुषा सकृत्तूष्णीं । निर्वपति एवमुत्तरेणापि ।

अमावास्यायामाग्नेयादुत्तरमिन्द्राग्निभ्यामित्यसन्नयतस्सन्नयत-स्त्वैन्द्राग्न्यो: स्थाने इन्द्रायेत्यादि । निर्वपणात्[3] पर्यावृत्तं प्रक्रामेदिति बौधा-यनोऽवान्तर इति शालीकि: , प्रवान्तर इत्यपि मन्त्रवत्वात्प्रत्यावृत्त्यावित्यौपमन्य-वी पुन:। निर्वपण इति सूत्रं शालीकेरत्र कस्मात् बौधायन: अष्टावेव निरुप्तो व्यभिमृश्यादपाहितं ब्रीहिष्णाद्धरत्वा कृतामिति । पुरोडाशीयान् ब्रीह्याभिमृ-श्यवन्तां पङ्क्तीति त्रियजुषा सकृत्तूष्णीं, चतुरवत्तिनां त्रियजुषा द्विस्तूष्णीं,

---

१- एवमुत्तरं यथादैवतमग्नीषोमाभ्यामिति पौर्णमास्याम् । ऐन्द्राग्निभ्यामित्य-मावास्यायाम् ।(द्र०) दर्शपूर्णमास प्रकाश:, पृ०२३२-३३ ।

२- यच्छन्तां पञ्चेति मुष्टीं गृहीत्वा स्रुचिमुष्टिमोप्य देवस्यत्वेत्यनुद्रुत्याग्नये जुष्टं निर्वपामीति त्रियजुषा तूष्णीं चतुर्थम् ।(द्र० दर्शपूर्णमास प्रकाश: पृ०२३३)

३- बौधा० सू० २०-५-६-१५।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पञ्चावत्तिनां सर्वाणि पञ्चावृणोति । काल्य:- निर्वपणादारभ्य पंचावर्तं पंच संस्था कार्या । अवदान इति पुरोडाशावदानादारभ्येति । प्रदान इति आज्यभागादारभ्येति । चातुष्प्राश्यं चतुष्प्राशनार्थम् सूक्त इति इडादारभ्ये- त्यर्थ: । आज्यस्यैव निर्वपण इति सूत्रं शालीकेरशीकस्मात बौधायन शौनकयान्तं कृत्वाग्नीन्नपेक्षितत्व(बउ) शर्मिण: प्रोक्षणं लभत इति ।

द्रव्यदेवताविचार:

अथ द्रव्य-देवतापरिज्ञानार्थं किञ्चिद्विचार्यते । यदाग्नेयो ऽष्टाकपालो- ऽमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति श्रुतिरुभयत्र भवत्याग्नेय: ।

१- अतो पञ्चावत्तैव भवति । पाङ्क्तो यज्ञ: पाङ्क्त: पशु: , पञ्चर्तव: संवत्सरस्येमां पञ्चावत्तस्य सम्पद् अनुरूप प्रजया पशुभिर्भवति । यद्येषं त्रिगुण: पञ्चावत्तं क्रियते एतदन्यैव जौरूपा ज्यादं यज्ञानुरूपं तस्मात्पञ्चावत्तं भवति ।
(तु० श० ब्रा० १।७-२-८-१६) ।

२- चतुर्भिरध्वर्युं प्राशित्रि दीक्षित्भि: प्राशितुं योऽध्वर्यादिनं चातुष्प्राश्य इत्यर्थ: ।
(तु०) टि० श० ब्रा० २१-४-३-११ ।

३- इडाशब्देन इडा पात्रस्थावत्तं पुरोडाशादि द्रव्यमुच्यते ।(टि०श०ब्रा० १।८-१-१३-२५) ।

४- तु० का० श्रौ० सू० २०-८-२०।८ ।

५- तु० बौ०श्रौ० सू० १२-२०।८ ।

६- यदाऽग्न्यसात्पुरोडाशस्तत् । य अच्चौ यज्ञं प्राऽरोचयस्मात्पुरोडाश: , पुरोडाशो ह वै नामैतद् यत्पुरोडाश इति त एण अथवाऽच्युताऽऽग्नेयोऽष्टा कपाल: पुरोडाशो भवति ।

(तु०) श०ब्रा० १।६-३-६-१२-४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उपांशुयागविचार:

अथोपांशुयागविचार: । उपांशुयाजस्य करण इति सूत्रभिन्नत्वस्या-
श्रीकन्नाद बौधायन चौगलस्योपांशुयाजं कुर्यादग्नीषोमीयं पौर्णमास्यां वैष्णवममा-
वास्यायामिति कात्यायनाश्मरथ्यौ किरात्यस्योपांशुयाजं कुर्यात् सौम्यं पौर्णमास्यां
वैष्णवममावास्यायामित्यनौदुम्बरायणमन्यत्र चौगलस्योपांशु याजं कुर्यात्सारस्वतं
पौर्णमास्यां सरस्वत्या अमावास्यायामित्युभयत्राज्यस्यैव वैष्णव इतिराधीतरी-
श्रीकन्नाद कौण्डिन्यायनाग्निरचरुरेव स्याद्वैष्णवश्च स्यादित्येवं चैव यजमान: प्रा-
श्नीयादिति । सूत्रम् । प्राजापत्यमुपांश्वाज्येन यागो भवतीति । चौगलस्येति-नरा-
यण्याभिमनति पुरोडाशादिद्रव्यादिति ।

आश्वलायन:

अन्तरेणेति विष्णुमुपांश्वैतरेयिणाग्नीषोमीयं पौर्णमास्यां वैष्णव-
ममावास्यायामेकैकं यजतीति । हविर्भिर्देवते इत्यनर्थान्तरम् , अग्नीषोमाविन्द्राग्नी
विष्णुरिति वैकल्पिकानीत्यत्र नपुंसकनिर्देशं करोति तेन हविर्भिर्देवतैरित्यविशेषेण
इति सिद्धम् । एकस्यैतावता सिद्धे यजतीतिवचनं शास्त्रान्तरविहितानां प्राजापत्या-
दीनामप्युपांशुयाजानां प्रतिषेधार्थम् ।

आपस्तम्बस्तु आज्यहविरुपांशुयाज: पौर्णमास्यामेव भवतीति वैष्ण-
वो ग्नीषोमीय: प्राजापत्यो वेत्याह ।

१- एतेन वै देवा: । उपांशु याजेन यं यमसुराणामकामयन्त तमुपत्सर्य वज्रेण
वषट्कारेणाघ्नंस्तथो एवैष एतेनोपांशु याजेनात्मानं हिनन्तं भ्रातृव्यमुपत्सर्य
वज्रेण वषट्कारेण हन्ति तस्मादुपांशुयाजं यजति ।(शु०) श०ब्रा० १।६-३-३५-२)।
२-अन्तरेण हविषी विष्णुमुपांश्वैतरेयिण:।। पु०आश्व०श्रौ०सू० १-६-३-१२।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथाग्नीषोमीय विचार:

यद्यपि स्तीर्यविरस्य पुरोडाशस्यापराधविषयत्वादग्नीषोमाभ्यामिति पौर्णमास्यामिन्द्राय वैमृधायेति वेति कुर्वन्नाचार्यो ज्ञापयति । आग्नेयस्योत्तरो वैमृध: संभवतीति तेन प्राक्सोमयागादनित्योऽग्नीषोमीय इति भाष्यम् । अनित्य: कृताकृत: ।

तथाच कल्पकार:-

प्राक्सोमयागात् विकल्प्यतेऽग्नीषोमीय आचार्यमतेनाविशेषमिति । प्राक्सोमयागात्कर्तव्य एवाग्नीषोमीय: आग्नेयो वै ब्राह्मणो देवतया ससोमेनेष्ट्वाग्नीषोमीयो भवति इति श्रुते:। नासोमयाजिनो ब्राह्मणस्याग्नीषोमीय: पुरोडाशो विद्यत इत्यापस्तम्बश्च ।

आश्वलायनस्तु अग्निम् अग्नीषोमाविति पौर्णमास्यामित्यविशेषेणैवाह । देवतास्वोपांशुयाजैन्द्रमहेन्द्रवर्जमिति । सूत्रे उपांशुयाजेन्द्रमहेन्द्राणामेव प्रतिषेधं कुर्वन् ज्ञापयति अविशेषेण नित्योऽग्नीषोमीय इति ।

अथ वैमृध: स च नित्य:, ब्रह्मवादिनो वदन्ति हत्वी दर्शपूर्णमासौ यजेत य एतौ सेन्द्रौ यजेतेति वैमृध: पौर्णमासे तु निरुप्यो भवति तेनपूर्णमासेन्द्र, सेन्द्रं, सेन्द्रं यदमावास्यायां तेनामावास्या सेन्द्रेति श्रुते: । केचित्वनेनाभावस्य सेन्द्रौ भवत इत्यैन्द्राग्नेन पुरोडाशेनेत्येव ब्रूयादित्याचार्यवचनात् कल्पसूत्रे निरूप्येन्द्राय वैमृधायेति वचनाच्च । अनित्यश्च यदि निर्वपेन्नेव निर्वपेदिति शाखान्तरादेवशब्द: प्रकृतिन्यमार्थ: , तथा च प्रथमप्रयोगे यदि निर्वपेत्, द्वितीयादावपि निर्वपेदेवेति । यदि निर्वपेदितिवचनात् सर्वदा न निर्वपतीति । कश्चैवाग्नीषोमाभ्यामिन्द्राय

१- द्र० दर्शपूर्णमास प्रकाश: पृ० ६८ सायणभाष्यम् ।

२- तत्रैव ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वैमृधायेति च पौर्णमास्यामिति वक्तव्ये व्यवधानेनोपदिष्टमग्नीषोमाभ्या-
मिति पौर्णमास्यामिन्द्राय वैमृधायेति चेति तस्मादग्न्याग्नीषोमाभ्यामुत्-
त्यत्वात् क्रतुत्वस्यार्थं वानित्यत्वात् अननुष्ठेयत्वमपीति यावत् तन्त्रमेवास्याप-
नार्थमिति चेन्न । पौर्णमासवैमृधाभ्यामित्यादिना स्थापितत्वात् किं चा-
मावास्य [1]अष्टौ दक्षिणत एकादशोत्तरत एवमेतौ पुरोडाशमधिश्रयति ।

पुरोडाशश्रपणविचार:

उत्तरं पुरोडाशं श्रपयति पात्र्यां देवोपस्तृणाति उत्तरं पुरोडाशमुद्वासयति इत्यादि । एतान्यपि तन्त्रभेदस्थापनार्थानीति चेन्न, पौर्णमासवैमृधाभ्यामित्या दिना स्थापितत्वात् ।

अथ निर्वपणे च वैमृधः पौर्णमासेन समानतंत्रो नानातंत्रो वा भवति। तथा अग्नीषोमाभ्यामिति पौर्णमास्यामिन्द्राय वैमृधाय चेति कल्प एव समान तन्त्रताभिधानात् समानतन्त्रता । पौर्णमासवैमृधाभ्यामिष्ट्वेत्यादिवचनात्[2] नानातंत्रता । अतो विकल्पः । आपस्तम्बस्तु संस्थाप्य पौर्णमासीमिन्द्राय वैमृधाय पुरोडाशमेकादशकपालमनुनिर्वपति । समानतन्त्रमेके समामनन्ति तस्य याथाकामी प्रक्रमे प्रक्रमात् नियम्यत इति ।

अथ वैमृधस्यानुनिर्वपण इति सूत्रं बौधायनस्य, तानिष्ट्वा प्रथमामेना-

---

१– ध्रुवमादाय प्रथममुद्वासयामि ' इत्येवं आग्नेयस्य प्रथमकपालम् उत्तरत उद्वास्य, द्वितीयं, तृतीयं, चतुर्थं, पञ्चमं, षष्ठं, सप्तमं, अष्टमं– इत्थमेव क्रमेण उद्वास्य, अग्नीषोमीय पुरोडाशस्य प्रथमादीनि अष्टमान्तानि एवमेवोद्वास्य, नवमं, दशमं, एकादशमित्येवं त्रीणि उद्वासयेत् । (वर्षे द्वादशमधिकम्)उद्वास-यामीति सर्वत्र शेषो बोध्यः ।

२– द० दर्शपूर्णमास प्रकाश:, पृ० ३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नुनिर्वपेदिति शालीकिरिति द्वैधमुक्तात् व्यवस्थितो वा वैमृध:[१] । मृधमिति – सोम-
याजिन इतरस्य चाविशेषेणोक्तत्वादनिष्टत्वाऽपि प्रथमपौर्णमासेनानुनिर्वपेत् ।
इतरस्य पदस्य सोमयाजिनो यथामावास्यायामैन्द्रा, तथैव वैमृधेन पौर्ण-
मासो ऐन्द्रा कर्तव्येत्यभिप्राय: । नैन्द्राग्नेन ऐन्द्रत्वोपपत्तिरिति । ऐन्द्र:
पुरोडाश: श्रुत्यन्तरविहित इति समाम्नातम् आचार्येण महेन्द्रायेति महेन्द्र-
याजीन इति वक्तव्ये कस्माचित् गतश्रियामेव ग्रहणं स्यादिति यथा व्यवस्थितं
महेन्द्रयाजित्वापि ग्रहणार्थं यदि शब्द: । वा शब्दस्त्वनर्थक एव, तस्य ग्रहणं पुरो-
डाशविकल्पार्थं, कथं पुरोडाशो उक्त इति चेत् शाखान्तरे समाम्ना(ना)त् इन्द्रा-
य त्वा जुष्टं प्रोक्षामीति मंत्राम्नानाच्च । इतरथा पूर्णानुमन्त्रणवत्कर्म -
ऽप्रकरणाम्नातमनर्थकं स्यात् , यदर्थमप्रसिद्धत्वात् मन्त्रविकोपा वाक्यप्रयो-
जन शाखान्तर एव प्रसिद्धत्वाद्विकल्प:। स्वशाखायां नास्ति विधानमिति नित्य-
वदाम्नातमाचार्येण तदाह दारुपात्रेण दुह्यात् । अग्निहोत्रे दारुपात्रं यद्दारुपात्रेण
दुह्यात् । ~~अग्निहोत्रे दारुपात्रं यद्दारुपात्रेण दुह्यात्~~ यातयाम्ना हविषा यजेत् ,
दारुपात्रे दोहनमग्निमत्वायातयामत्वेनायोग्यं तं निवृत्त्यर्थम् ।

कपोलत्वात् पुरोडाशमुखानि वै हवींषि, नेत इत: पुरोडाशं हविषो
यानीऽस्तीति कामनेन दारुपात्रेणदुह्यादिति । अस्त्यपि दारुपात्रदोहने एतस्य:
कारणे पुरोडाशं हविषो याग:शास्त्रो नास्ति , तस्माद्यदि दारुपात्रेण यद्यन्येन
वा दोहनमस्तु सर्वथा अयातयामत्वार्थं पुरोडाश: कार्य इति विधीयते । अतस्तेनैव
यातयामत्वसिद्धि: कामनेत्यपातयामत्वमेवानूद्यते । आग्नेयेन पुरोडाशमुखत्वमिति
चेन्न, भिन्नत्वात् तस्याग्नित्वे नैवेतरस्य दोषो निवर्तते । किमा(?) ग्नेयम-
दृष्ट्वा यातयामत्वमुक्तं ? नह्यन्यस्य स्नेहाभावेनावसानुवृत्तिरन्यस्य तदस्तित्वेन
निवर्तते । कथं तदुक्तमिति चेत्- आग्नेयेन पुरोडाशमुखत्वे कथं सर्वथा वचनेन विग्रह:
समुदाय: समासार्थ इत्याश्रयणीयम् । यदि पुरोडाशेनायातयामत्वमभिप्रायितम् ,
कथं नायामत्वम् न सर्वत्र विधीयते ? प्रकरणादेव पुरोडाशो विधीयते इति न दोष:।

१– पौर्णमासीमिन्द्राय वैमृधाय पुरोडाशमेकादशकपालमनुनिर्वपति ।
द्र० दर्शपूर्णमास प्रकाश: , पृ० ३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ निरुप्तान(म)भिमृशतीदं देवानामिति[1] अमून् यदीतरे ति-
(दे व)शिष्टा भवन्ति , तानभिमृशतीत्येव, स्फात्यै त्वानारात्या इति ।
यविनियुक्तो यं मन्त्र:। अत्र हेतु:- अवशिष्टानामावपन[2] इति तान् कोष्ठे वा
पल्ये वावपेदिति बौधायनो ऽवशिष्टानावपे(यु)दिति शालीकि:। कोष्ठ:कुसूल:।
पल्य: पलालकलितकपर्पुपरिवेष्टितधान्यावापविशेष:। चतुरोमुष्टीनिति
वचनात् पृथक् हीनत्वात् सर्वप्रधानत्वात्(सं)कर्मवात् चैत्यमेवेति भाष्यम् । शालीकि-
मते- अवेवेति निरुप्तेष्वावपेत् । निर्वापार्थं पृथक्कृतानां निरुप्तेष्वावपनौचित्यादपे-
क्षितत्वाच्च । अतो शायते वाक्यशेष पृथक्करणमिति । तथा च स्फात्यैत्वेत्य-
विनियुक्तमन्त्रस्यावपनस्य च परस्परापेक्षत्वात् सम्बन्धो युक्त: । यत उ तत्रान्त-
रितं प्रकल्पयेदिति स्थानात् स्थानं प्रतिविभागसिताभिरूपेण वा प्रीणियेत परि-
भाषितत्वात् स्फात्यैत्वेति वृद्धिंगानुरूप्यनिरुप्तेष्वपेक्षितावपने विनियोगो
युक्त इति गम्यते । अभियुक्ताचाराच्च स्फात्य इति कोष्ठादौ शिष्टावपनमिति
भट्टभास्कर:। कोष्ठे पल्ये निरुप्तेषु वेत्यर्थ: ।

अथाहवनीयमीक्षते

स्वरभिविख्येषं वैश्वानरं ज्योतिरिति ।

अथ गृहानीक्षते:-

दृंहन्तां[2] दुर्या द्यावापृथिव्योरिति ।

अथैतानाचार्योपतिष्ठति । स्तान् क्षीरीन् । एत्युर्वन्तारिदमन्वि-

- -

१- इदं देवानामिति निरुप्तानभिमृशति । अमून् यथेत्यवशिष्टान् ।स्फात्यै
त्वा नारात्या इति निरुप्तानभिमन्त्र्यैवमेव निर्वपणस्थानाद्दिशमुप निष्क्रम्य
स्वरभिव्यख्यमिति प्राङ्प्रेक्षते ।

कु० दर्शपूर्णमास प्रकाश:पृ० २३४ ।

२- कु० बौ० श्रौ० सू० २०-५-१४।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

हीति । समन्त्रमन्त्र: , नोत्थाने , तथा कर्मान्ते , नान्कीजानां निर्वपणे । यज्ञोपवीताभिक्रमणं परिधानमिति तन्त्रं भवतीति वचनात् उर्वन्तरिक्षमन्विही- त्यांगमेत्याहेति ब्राह्मणाच्च । दक्षिणेन गार्हपत्यमुपसादयति । आदित्या स्त्वोपस्थेसादयामीति , गार्हपत्यमभिमन्त्रयतेऽग्नेहव्यं रक्षस्वेति । यथा निरुप्तं परिववी परिववीतेति बौधायनोऽप्युक्तवाद् आहोकिरग्ने हव्यं रक्षस्वेत्येव ब्रूयाद्विष्णो हव्यं रक्षस्वेति यथाविष्णुर्हि यज्ञं गोप्ता भवत्यग्निरीणधस्येति । यथा- निरुप्तं भवत्यग्निरीणधस्येति ।यथा- निरुप्तं अग्ने, हव्यं रक्षस्वाग्नीषोमौ हव्यं रक्षेथामित्यादियागदेवताभ्य: परिदानं युक्तमिति निर्वापमन्त्रवदुपपत्ति: । मन्त्रो यथाम्नातमेव युक्तं रक्षणार्थत्वात्, अग्निश्च सन्निहितो रक्षितेति यथा सान्नाय्यस्य विष्णुरिति ।

३- युक्तमिति स्थ्येयमिति सर्वविधरमण्ठीदाते । वैश्वानरं ज्योतिरित्याहवनीयं स्वाहाद्यावापृथिवीभ्यामिति स्कन्नानभिमन्त्र्य संस्कृत्वां दुर्द्यावापृथिव्योरिति प्रत्यवरोक्ष्योर्वन्तरिक्षमन्विहीति हरति ।

द्र० दर्शपूर्णमास प्रकाश: ,पृ० २३५ ।

४- तत्रैव ।

५- द्र० बौ०श्रौ० सू० २०-६-१६।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ पञ्चमो ध्याय:

उत्पवन विचार:

अथैतस्यामेव स्रुचि तिर:पवित्रमप आनीयोदीचीनाग्राभ्यां पवित्राभ्यां त्रिरुत्पुनाति- देवस्त्वा सविता०[1] रश्मिभिरिति मन्त्र:। एतस्यामेवेति निरपि कृतौ प्रणीतायां स्रुक्तायामेवेति । मन्त्रेणाँ स्थापनं स्थालीभिरेव नवं निर्पिषित्येतस्मिन्नादौ स्रुच्येव यथा स्यादिति च ।मन्त्र उत्पुनातीत्यन्ते। निराकांक्षी भवति ततश्च पादेन पादेनोत्पुनातीत्युक्तं[2] भवति । मन्त्रेणाँ पदां त्रिरुक्तं मन्त्रान्ते त्रिरुत्पुनातीति । प्रोक्षणीनामुत्पवन इति सूत्रं बौधायनस्य त्रिर्देवेनैवामुवं त्रिरुत्पुनीयादिति आलीकि: , पूर्णमिति (पदा) मन्त्र उत्पवनं मन्त्रान्तेनापित्र्यैतिवचनात् निगदेनैवेति मन्त्र उच्चार्यैस्त्रिरुत्पुनाति।

अथैता उत्सयन्नभ्युपतिष्ठत्या यो देवी: ० शुक्रार्ये इति ।ऊर्ध्व ऊर्ध्वनावे, गमयतिश्चपूर्वार्थ । स्रुव एवोपमनं न स्तेनापामुल्लोपणम् । एतामिति सर्वासां कर्मत्वेन ग्रहणात् स्तेनोल्लोपणे तदभावादुच्चालनमित्यन्ये । मन्त्रमेव केवलं जपति, नैव पूर्वेति । अद्भिरेवाप: प्रोक्षति- प्रोक्षिता:स्थ: प्रोक्षिता:स्थेति त्रि:अद्भिरप:प्रोक्षणं स्रुव एव प्रकृत्य एकदेशेन- प्रोक्षणं मन्त्राभिरद्भिरित्यपरे । अद्भिरेवेत्यवधारणादपामिरेवेति गम्यते ।एतेन ग्रहणं पात्रारान्न क्रियते । यत्र मन्त्रे वीप्सा तत्राभियं त्रिरावर्ती । अत्र कर्मावर्तते इत्युक्तम् । मन्त्रोच्चारणमेवात्र प्रोक्षणं अप्रोक्षिता एवेतिकर्मान्तवचनात् क्वो विकल्प: ।

१- स स्रुकायामग्निहोत्रहवण्यामप आनीय पूर्ववदुत्पूयाभिमन्त्र्य अपप्रोक्षिष्यामीति ब्राह्मणमामन्त्र्य देवस्य त्वेत्यनुद्रुत्याग्नये वो जुष्टं प्रोक्षामीतियथा दैवतं हवींषि: प्रोक्षत्याग्निमभिप्रोक्षेत् । द० दर्शपूर्णमास प्रकाश: ,पृ० २३६ ।

२- द० पौ० श्रौ० सू० २०-६-२६।८ । शुक्ला धान्यपुच्छादि शते स्व० डी०

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ पुरोडाशीयान् प्रोक्षति

देवस्यत्वा० इत्ताभ्यामग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्या-
मनुष्मा । अमुष्मा इति (यथा दैवतम्) यथादैवतमिति ।अग्ने, अग्नये वो जुष्टं
प्रोक्षाम्यग्नीषोमाभ्यामिंद्राय वैमृधायेति पौर्णमास्याम्, अग्नये वो जुष्टं
प्रोक्षामीन्द्राग्निभ्यामित्यमावास्यायामसन्नयत इन्द्राग्नी: स्थान इन्द्रायेति,
सन्नयतो महेन्द्रायेति यदि महेन्द्रयाजी भवति ।मन्त्रान्तेन निरूपणीम् ।
अत्र अग्नयेऽग्नीषोमाभ्यामिन्द्राय वैमृधाय वो जुष्टमिति बहुवचनेनाऽग्नये वो
जुष्टंप्रोक्षाम्यग्नीषोमाभ्याममुष्मा इत्येव प्रोक्षणमन्त्रवचनं पृथक्निर्वाप इति च
कृत्वा अस्मिन्दर्शने द्रव्यभागेन पृथक् प्रोक्षणमेव। अग्नये वो जुष्टं प्रोक्षाम्यग्नी-
षोमाभ्यां वो जुष्टमित्यादि प्रतिदैवतं आवृत्तिरनुवृत्ति , द्रव्यविभागस्य
मानसिक: अत्र च मन्त्रविभागेन निर्वापे अनुष्ठानार्थता माभूदिति ।एकस्मिन्नपि
सर्वनिर्वाप इति माभूत् । पृथक् प्रोक्षणमित्यस्मिन्दर्शने आवृत्तिमनुकृत्याग्नये वो
जुष्टं प्रोक्षाम्यग्नीषोमाभ्यामिन्द्राय वैमृधायेति यथा दैवतमेव मन्त्रपाठात्
द्रव्यस्य आवृत्तिकत्वात् । पुरोडाशीयानां प्रोक्षण इति अग्रावृत्त: प्रोक्षेदिति
बौधायनो देवता: समनुद्रुत्य सकृदेवेति शालीकि:। अग्रावृत्त:, समनुद्रुत्य समनुद्रुत्य अग्-
नये वो जुष्टं प्रोक्षामीति सकृदुक्त्वा त्रि: प्रोक्षति । एवमग्नीषोमाभ्यां वो
जुष्टमित्यादि । सर्वा: सर्वदेवता: समनुद्रुत्य त्रिरेवेति यथासमाम्नातमेव ।

अन्वाधानेयकम्

स प्रोक्षत्यग्नये वो जुष्टं प्रोक्षामीत्याग्नेयं[1] पुरोडाशं तथैवाग्नी-
षोमीयं करोति , ये यथं यथापूर्वं [illegible] ।उत्तानानि पात्राणि
कृत्वा प्रोक्षति - शुन्धध्वं: यज्ञा: इति त्रि: ~~[illegible] बौधायनो [illegible]~~
~~[illegible] शालीकि:~~ । कृत्वा प्रोक्षतीति समान कर्तृकत्वमेव विवक्षितम्
अन्येनोत्तानीकृतेषु प्रोक्षतीति केचित् ।

१- उत्तानि पात्राणि पर्यावृत्य शुन्धध्वं दैव्याय कर्मणे इति त्रि: प्रोक्ष्य प्रोक्षणी
शेषमग्रेण गार्हपत्यं निधाय देवस्यत्वा सवितु: प्रसव इति कृष्णाजिनमादायावधूतं
रक्षोऽवधूता अरातय इत्युत्करे त्रिरवधूनोत्युर्ध्वग्रीवं बहिष्प्राचीनग्रीवम् ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

द० दर्शपूर्णमास प्रकाश:, पृ० २३० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

(क) मन्येन कोणेण तेनैकस्थानीति व्यपदिश्यन्ते । यथा- कुशीयित्वा प्रविश्याग्नि मार्जित्वा स्वाँसूर्यमुपगच्छतीति। का पुरुषार्थत्वे तदाणां स्यात्पदं तेषुगारि कर्मव्यपदेशः नाड्गिभर्ता: कुम्भत्वावावसंलब्धवानिति ।नु यथापूर्वमेव एवं स्यात् पु० - - - यथावत् । एकेन हस्तेन प्रदक्षिणीधार्यस्य अपरेणोत्तानकरणेन कश्चिद्विशेषः तस्मान्मुख्यमेव समानकर्तृत्वं लभ्यते । यानि कर्मसु युज्यन्ते (कर्मस्वनुयुज्यते)तानि सर्वाणि प्रदीपाति । बहुवचनेन सर्वेषामुक्तत्वात् मन्त्रादृष्टप्राविनाभावात् सकृन्मन्त्र:, त्रि: प्रदक्षिणम् ।

प्रतिशिष्टा: प्रदक्षिणीनिधाय । अग्रेण गार्हपत्यं निधायेति कल्पान्तरम् ।प्रतिशिष्टानां परिशायन इति एता एव परिश्रीरन्निति बौधायन: ।विकल्पैता वा उपरिष्टात्मन्या: संस्कुर्वीतेति शालीकि: । सिकता उत्सृज्य कार्यत्वात् उपरिष्टात्पुरभान्या: संस्कृत्य गृह्णीयात् । कृष्णाजिनमवधूनो-त्यूर्णं ग्रीवतुहलोऽ कृत्वा बधून् ० - - - परास्त इति त्रि: । सकृन्मन्त्रेण त्रिस्तूष्णीं पश्चात्प्रतीचीनमवधूनोतीति कल्पान्तरम् । कृष्णाजिनस्यावधून इति, उपनिष्क्रम्याग्न्यागारात्पूर्वेऽपरेऽवान्तरे देशे कृष्णाजिन मवधूनुयादिति बौधायनोऽन्तरे वैतांविदमिति शालीकि: ।

- -

१- पु० बौ० श्रौ० सू० २०।६।७।१७।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृष्णाजिनास्तरणविचार:

१

अथैतत्पुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणाति अदित्यास्त्वगसि प्रति-
त्वा पृथिवी वेत्त्विति । स्तृ कृष्णाजिनं पुरस्तादिति नान्यापेक्षकृष्णाजिन-
स्यैकदेशापेक्षं पुरस्तादेवारभ्य स्तृणातीति । कृष्णाजिनस्यास्तरण इति ,
तस्मात् बौधायनो ब्रवीत्युन्मेदेत् कं कुर्यात् कृष्णाजिनावधननादास्तरणादेव-
मुलूखलाध्यूहनात्पुरोडाशीयानामावपनादेव मुसलस्याधानाच्छूर्पस्योपधानादेव-
मधिवपनात्प्रस्कन्दनादेवं कपालोपधानादाच्यु(च्यू)तान्यामेवं प्रस्तर बाहूनां
सादनादेवमग्न्याधानादासननादेवमौपभृत्यां अग्निहोत्रादेवं यूप आपरिव्ययणादि-
ति। यथोपपादमेवैतान्निकुर्यादिति शालीकि:। आयोगाभ्यूहाभ्यामिति क्वचि-
त्पर्यासे योगस्यानित्यत्वात्तदाति योगे आयोगात् आयत्वात् व्यूहात् । एवं प्रस्तरे
पुनर्भीवी । यथोपपादं यथासंभवमनुत्सृजन् विसृज्य वा । तदंगादभिविधौ ।
अविदर्ग सव्येनान्वारंभ: दक्षिणस्य व्यापरणीयत्वात् , तस्मिन्नु खलु उलू-
खल (पूर्वोक्ति) – अधिवर्तयति० वेत्त्विति। तस्मिन्कृष्णाजिने। तस्मिन्पु-
रोडाशीयानावपत्यग्नेस्तनूरसि० गृह्णामीति । आवपनं सर्वेषां पुरोडाशीया-
नां द्वितीयया समस्तवचनात । मुसलमवधात्यद्रिरसि वानस्पत्य: स इदंदेवे०

- -

२- आदित्यास्त्वगसीत्युत्तरेण गार्हपत्यमुत्करदेशे वा प्रतीचीनग्रीवमुत्तरलोमो-
पस्तृणाति ।(उ०) दर्शपूर्णमास प्रकाश: पृ०२३८ । पुरस्तात्प्रतीचीं ग्रीवामुप-
समस्यति- "ग्रीवास्फटिप्रदेश:" उपस्तृणात्विति द्विगुणीकरोति इति भा०वृ०(
वृ० दर्शपूर्णमास प्रकाश:, पृ० २३८ ।

३- अनुत्सृजन्कृष्णाजिनमधिवर्तयामीति तस्मिन्नुलूखलमधिवर्तयति ।

४- अद्रिरसि वानस्पत्य इति मुसलमादाय हविष्कृदेहीति त्रिरवदन्ति ।अन्वार-
भ्या हविष्कृतं ह्वयति । हविष्कृदाह्वाननमंत्र उपांशुप्रयोगमिति । हविष्कृदेहीति
आह्वानमन्त्रार्थो मंत्र: कथात् मन्त्रत्वे हविर्यज्ञपक्षाभावाच्चाउच्चैस्त्वं
सकृत्प्रयोग:(भा० वृ०)

(उ०) दर्शपूर्णमासप्रकाश: ,पृ०२३९।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शमिधीति । कतमधात्पुरुषो । हविष्कृतमाह्वयति- हविष्कृदेहि हविष्कृदेहीति

त्रि:। मन्त्रस्यापि विराड्युक्ति: । कर्मान्ति हविष्कृदेहीति[1] पर्जन्य एवैतदुक्तो भवत्यथाप्युदाहरन्ति, हवि: संस्कारिणमेवैतदाहेति हविष्कृच्छब्देन पर्जन्य उच्यते । स हि वर्षणेनौषधिनिष्पादनेन पुरोडाशीयादिहवि: करोति । पत्नी वै उक्ता भवतीति सा हि हविरवघातादिना संस्करोतीति भाष्यम् । एवञ्चाध्वर्युर्वाग्यतपत्न्या समाख्यानवशात् कथञ्चो तृणान्कृत्वेत्यादिविधानात्कर्म- कर्त्रायत्तनाच्च पर्जन्यावाह्वानमदृष्टार्थं निर्वर्त्यति त्रिणत्या हि देवा इति वचनाच्च । अथापीत्यादि यानुषस्यया वक्ष्यमाणाह्वानं यदि हविरवघातादिना संस्करोति ।

अत्र रुद्रदत्त:

आह्वानञ्चात्र देवतारूपस्य हविष्कृतो वेदितव्यं या एवं देवानां हविष्कृत: तान् ह्वयतीति श्रुते: । मानुषस्यैव वा वक्ष्यमाणस्याह्वानं (संनिधे:) सन्निधे: । तथा च बोधायन:- हविष्कृदेहीति पर्जन्य:हवि:संस्कारिण- मेवैतदाहेति ।

श्री[illegible]

पत्न्यवहन्ति[2] शूद्रा पिनष्टीत्यन्य० वचनात्पत्नी वावहन्ति ।

१- हविष्कृदेहीति ब्राह्मणस्य , हविष्कृदागहीति राजन्यस्य, हविष्कृदाद्रवेति वैश्यस्य , हविष्कृदाधावेति शूद्रस्य ।

द्र० दर्शपूर्णमास प्रकाश: पृ० २३६ ।

२- दासी पिनष्टि पत्नी वा । अपि वा पत्न्यवहन्ति शूद्रा पिनष्टि।

द्र० दर्शपूर्णमास प्रकाश: , पृ० २४६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ दृषदुपले[1] तृणाग्रैरेणोर्ध्वैः समाहन्ति इत्यापस्त० ज्योक्तेति।
तृणाग्रैः पात्राणि समाहननं सर्वेषां पात्राणां दृषदुपलयुक्तानां प्रदर्शनार्थं यज्ञायुधानामुक्तत्वादिति वर्णनात् । ब्राह्मणोर्ध्वैः समाहन्तव्यं चाहेति वचनात्। ऊर्ध्वैः समाहन्तव्यं इति सम्प्रैषो न भवति, चाहेति वचनादयं संप्रैषः, त्रिष्फ-लीकुर्वा चाहेतियथा सम्प्रैषकरणपदा चाहननमन्यस्य व्यापारः, यथाग्नीध्रः पारिशेष्यात् । दृषदुपलयोराहननविधिः क्रान्तिरुक्तः । दृषदुपले तृणाग्रैरेणो-र्ध्वैः समाहन्तीति विज्ञायते । ब्राह्मणोर्ध्वैः शाखया वा चाहविर्विजित्य, यावन्तो-स्य भ्रातृव्यास्तावद्भ्रातृव्यवदनामुपहन्ति, ते परामन्नन्तीति त्रिर्दृषदि यदु-पलायां, नवकृत्वः सम्पादयतीति विज्ञायते इति । त्रिर्दृषदीत्यादिभिः नव-कृत्व इति वचनात् । प्रतिपर्यायं मंत्रावृत्तिः । दृषदुपले तृणाग्रैरेणोर्ध्वैः समा-हन्तीति[2] सूत्रं बौधायनस्य सव्यं[3](वा) चेति शालीकिः । दृषच्चोपला च दृषदु-पलं, तस्मिन्समाहन्ति यजुष्केन मन्त्रेण त्रिर्दृषदि यजुरुपलायां च यथैकः पर्यायः। एवमेव पुनरावृत्त्या[4] नवकृत्वस्समाहन्ति, पर्यायास्त्रयः, प्रतिपर्यायं मंत्रा-वृत्तिः । समाहननं च तत् दृषदुपलसंस्कारत्वादपर्यायितन्त्रेण क्रियते । यथोक्तं भारद्वाजेन, क्रतावृत्त्येण कर्मलोपो यथावत्तुः समाहननमाधेय्यो नित्यमिति रुद्रदत्तः। अवहत्य तुषान्[5] कृत्वा तरल सूर्पमुपवपति वर्षवृद्धमसीति । तुषान् उत्करतुषान् । तस्मिन्[6]पुरोडाशीयानुपवपति - प्रतित्वा० वर्षवृद्धं वेत्त्विति । पुरोडाशीयानुपवप्यत्वात् ।

१- बौ०श्रौ० सू० २०.६.८.४६/८

२- बौ० श्रौ० सू० २०-६-३-१७।

३- सावित्रेण वा शम्यामादाय तया समाहन्ति सावित्रो देवस्त्वेति मन्त्र इति
भा०श्रौ० सू०। (द्र०) दर्शपूर्णमासप्रकाशः, पृ० २४१।

४- द्र० दर्शपूर्णमासप्रकाशः , पृ० २४१।

५- वर्षवृद्धमसीति पुरस्तात्प्रत्यङ्मुपविश्य उत्तरतो वा । द्र० पू०प्र० , पृ० २४१।

६- मध्यमे पुरोडाशकपाले तुषानोप्य रक्षसां भागोऽसीत्यधस्तात्कृष्णाजिनस्योप-
वपत्युत्तरमपरमवान्तरदेशम् ।। द्र० दर्शपूर्णमास प्रकाशः, पृ० २४१।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कयाचिदुपर्यापृत्य परापुनाति – परापूतं[1] अरातय इति सूत्रं बौधायनस्य , यां कांचिद्दिशमभिपर्यावृत्य परापुनातीति शालीकिः । तथैव तुषानुप्रहृत्यैनामविरां निरस्यति– रक्षसां भागोऽसीति ।(वल्मीति) स्वल्मीति सामान्यवचनेऽपि रक्षःसम्बन्धात्पश्चिमदक्षिण इति गम्यते । उपहत्यं यावदीत्यर्थः । रक्षोभ्यः[2] त्वम् । अप उपस्पृशति । उपस्पर्शनं यावन्मात्रमपि सम्बन्धात् ।

तुषान् निरस्य

तुषान् निरस्य इति सूत्रं शालीकेरत्रोक्तमात् बौधायनीय(उत) एव यावत् मात्रानुप्रहृत्य कृष्णाजिनस्य ग्रीवात उपवपेद्रक्षसां भागोऽसीति , अथैकं स्पृशेदिति । विविनक्ति वायुर्वोविविनक्त्विति । विविनक्ति पृथक् करोति तण्डुलान् व्रीहींश्चापासीयान तण्डुलान् प्रस्कन्दयति – देवोवः सविता हिरण्यपाणिः प्रतिगृह्णात्विति । विविक्तान् व्रीहीन्तुषा(णां ध्यावह) वोध्यावहत्योदुपानित्यादि वाक्यैव, तण्डुलं प्रस्कन्दनान्तं, या(वत्) तण्डुलीभावस्तावत्कुलः करोति ।

१– परापूतं रक्षः परापूता अरातयः इत्युक्त्वा परापुनाति ।

द्र० दर्शपूर्णमास प्रकाशः , पृ० २४१ ।

२–अग्निः कपालं सस्पर्श प्रज्ञातं निधायाप उपस्पृश्य वायुर्वो विविनक्त्विति विविच्य देवोवः सविता हिरण्यपाणिः प्रतिगृह्णात्विति पात्र्यां तण्डुलान्प्रस्कन्दयित्वाऽवधेन वरवस्तुना वपस्यामि रायस्पोषाय वर्ची सुप्रजास्त्वाय वस्तुनो नोपोधाया शिवमागास इत्यवेक्ष्य त्रिष्फलीकर्तवा इति सम्प्रेष्यति ।

द्र० दर्शपूर्णमास प्रकाशः, पृ० २४३ ।

रक्षसां भागोऽसीति रक्षसामपकारकत्वाद्रौद्रराक्षसेत्युपस्पर्शने प्राप्ते अप उपस्पृश्येति पुनर्वचनाच्चात्र प्रायश्चित्तं भवति। पारिभाषिकव्याकरणे तस्याः पितृमात्रसाधारण्यात्सामान्य विहितं सर्वप्रायश्चित्तमेव प्रकरणविशिष्टाकरणे हि वक्तुक इत्यादि भवति । द्र० दर्शपूर्णमासप्रकाशः, पृ० २४३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अत्र कपर्दी-

पिपिनष्टि पृथक् करोति तण्डुलान्दृषदीव पिष्टीकरणाय अत्र पेषणविवेकीकरणं तुषनिवापनात्पूर्वं प्रतिपत्तव्यं ताम्बूलात् , कपालनिरसनं पूर्वं इति संभवति । उक्तं च विरोधे ऽर्थस्तत्परत्वादिति सूत्रकारेण । यथाश्रुती-त्यतोऽपि इति ।

अत्र यावन्मात्रानुपत्स्यैति धिपत्नी तु न क्रमभंगदोषः । अवहन्ति प्रवहन्नाह, त्रिष्फलीकर्तै त्रिष्फलीकृतान्कुरु प्रक्षालयिति । शाखान्तरात्पत्नी-दासी वा कर्त्री उलूखले तण्डुलानोप्य मुसलेनावहत्य फलीकृत्य परापुनात्येवं त्रिः फलीकरणात् प्रक्षालनं विधाति , प्रतिपत्तिवचनात् त्रिष्फलीकृतान् प्राहुः । बहुवचनान्निकमार्थं च: क्वचन प्राह- त्रिष्फलीकृता इति । त्रिष्फलीक्रियमाणानां० प्रक्षालयित इति तण्डुलप्रक्षालनमन्त्रेऽपि निनयत्युत्करदेशे वा शकृत्पांसीयान् तण्डुलान् प्रक्षाल्य निरनुक्रन्दति - रक्षोभ्य इदम् , अप उपस्पृश्य:, अत्र यज-मानो वाचं विसृजते । तदुपित्वा वाच यजमानस्त्वा हविष्कृत इति, आतण्डुलावेक्षण-निनयनादित्यर्थः। आतिष्ठे हविष्कृता वाचं विसृज्येति प्रस्तुत्य: कृष्णाजिना-वधवनैनैतिष्ठत्य प्रतिपद्य इतिवचनात् हविष्कृतां वाचं विसृज्यामि कुर्यात्। कस्मिन्नु खल्वेना काले कुर्यादिति प्रक्षालनान्तं कर्म कृत्वा ततस्तस्मिन्नेना काले कुर्यादित्याहुर्गुणो वचनं , दर्शनान्तरम् स्तवेपनानादीपेषु एवं च तण्डुलावेक्षणनिनयनान्तं भविष्यतीति भाष्यम् ।

कर्मान्तिमाभ्ये प्रक्षालनान्तं कर्मकृत्वेतिनानन्तर्यं कृत्वाप्रत्यय: किन्तु पानीयांस्तण्डुला(ना)मिति यावदध्याय समाप्तेरित्यर्थ इति ।

१- अथ विरोधः पाठक्रमार्थक्रमयोः तत्र कथमिति ।यथा सर्वपर्णशाखया वत्सानपाकरोति तामाच्छिनत्ति इषेत्वेति " इति पाठः पर्वस्तुनैव निवर्त्यते । वत्सापकरणार्थं हि शाखाच्छेदनम् । तेन पाठक्रमार्थक्रमयोरर्थ क्रमो बलीयान् ।। क० भा० पु० का० श्रौ० सू० १।५-५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यजमानः उपविश्य वाचं विसृज्य यज्ञं योगेन युनक्ति - कृत्वा युनक्ति[१] कृत्वा युनक्तीति । युञ्जते मन इति यो एव योगो मन्त्रः तस्य जपाराध योगः तस्मिन्काले प्रातर्दोहं धेनुर्यां व्यत्युपक्रमेण पवित्रेण नाशानन्विता। अंगारनिष्क्रमणादि संधानानयनान्तनु याल स्वनपिधानन्यानर्द- मु ।

अथ प्रोक्षणं, पिष्टपोहणं, तथैव कृष्णाजिनमधूनीत्युपर्यं ग्री- वमुखापुत्याबद्धा० तथ इति त्रिः ।

१- प्राणाय त्वेति प्राचीमुपलां प्रतीच्यपानायत्वेति प्रतीचीं व्यानाय त्वेति मध्यमेष्यवधारयति प्राणायत्वा पानायत्वा व्यानायत्वेति सततं पिनष्टि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

षष्ठो

१२७ ## अथ षष्ठोऽध्यायः

पौर्णमासक्रमविचारः

अमावास्याक्रममुक्त्वा पौर्णमासक्रममाह- अथ प्रोक्षितीति तण्डुल-प्रक्षालननिनयनानन्तरमित्युक्तम् । अन्ये निष्फलीकरणवचनानन्तरं कृष्णाजिनावधवननात्तण्डुलादिकनिनयनमित्याहुरिति अन्येषामेतदपि ज्ञापकं प्राक्प्राणिसम्मर्शनात्स्तीर्य इति तथैवेति प्राकृतस्य निषेधवचनत्वात्पुनिष्क्रमणान्तरे वेतामिति वा वक्ती यः पक्षः स एवमासिद्धिरयम् इति गम्यते ।

अथैतत्पुरस्तात् प्रतीचीनग्रीवमुत्तरलोमोपस्तृणात्परिवृत्यां स्तर्पणीत्यादि । पुनरथैतत्पुरस्तादिति वचनादेतस्याभिप्रेतत्वं स्वशाखोक्तत्वात्, एतदेव ज्ञापयति पक्षान्तरमप्यस्तीति तथा च दीपे स्पष्टीकृतः ।

कृष्णाजिनस्य पुनरास्तरण इति सूत्रमाचार्यो: प्राचीनग्रीवमुत्तरलो-(मितर)मित्यपिमन्त्रं वदति । इदमतोऽमुप्रदेशः । कृष्णाजिन उदीचीनकृष्णा[शम्यां निदधाति दिवस्कम्भनीरसि]त्वच्यैद्रिवसि० । तस्याः प्राचीं दृषदमध्यूहति । धिषणासि पर्वत्याप्रतित्वादित्यास्विव० वेत्त्विति । दृषदुपलामध्यूहति - । धिषणासि पर्वत्या प्रतित्वादित्यास्विव० वेत्त्विति । दृषदुपलामध्यूहति- धिषणासि पार्वतेयी प्र० वेत्त्विति । तस्यां पुरोडाशीयानधिवपति देवस्यत्वा हस्ताभ्यामग्नये जुष्टमधिवपाम्यग्नीषोमाभ्याम् (मा)च्य । अमुष्मा इति यथादेवतं प्रोक्षणवदिप्रोक्ष इत्यादि । अधिवपनं समस्तानां दृषदि । सर्वेषां संस्कार्यत्वात् अग्नयेजुष्टमित्यादेरस्य सर्वविषयत्वात् । अधिवपतेधान्यमसिधिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यमिति । अधिवपते अध्यूह्येतं मंत्रं वदतीत्यर्थः । पिनष्टि- प्राणाय त्वापानाय त्वा व्यानाय त्वेति । एको मंत्र यथापपादं पिनष्टि । । अयात् अन्वेवतते दीर्घामनु० प्रसितिमिति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पिष्टहवि:प्रस्कन्दनम्

कृष्णाजिने पिष्टानि प्रस्कन्दयति देवो व: सवितात्विति । पेषण इति सूत्रं शालीकेर्माऽऽस्माह बौधायन: , प्राणाय त्वेति प्राचीं प्रोहमानाय- त्वेति प्रतीचीं व्यानाय त्वेति तिरश्चीं कर्णविध प्राचीं प्रोहदीर्घामनुप्रसितिमा- युर्धामिति । कृष्णाजिनेऽपि पिष्टानि प्रस्कन्दयेद्देवो व:० गृह्णात्विति । सूत्रं एकोऽस्य: प्राणाय त्वेत्यादि: दीर्घामिति बाहु कल्पसूत्रे । उत्तरस्य त्रयो मंत्रा: प्राणाय त्वेत्यादय: दीर्घामन्विति प्राचीं प्रोहति हवि: प्रेष्य यजमानसंवपन्ती पिष्टानि कुरुतादिति । पिष्टानि प्रस्कन्दयतीति न त्वू पिष्टानीति तथाप्यनुचि दर्शेण उपपन्न: तदर्थं हवि:पेष्टी प्रदानं तानि पिष्टानि संवपन्त्यां प्रदाप्य प्रैष:, अन्येषां मुष्टिमात्रमभ्यूह्य पिष्ट्वा प्रस्कन्द्य हवि:प्रेष्ये प्रदानमिति संवपति पतितान् प्रदापति , यथा न पतन्ति तथे- त्यर्थ:। पिनष्टि पुरोडाशीयानन्वारब्ध्यां वधति: यदि परुं पर्वारिन् भवति प्रागधिवपनाच्च पुरोडाशीया विभजेरन् । पिनष्टीति वचनं पत्नीप्रेषमा- नार्थं वरव्यां वधतीत्येवसिद्धे विभागवचनं देवतादिनानार्थमन्वीत्येत्यादिमन्त्रै: बहुवचन उपांशुत्वायेदमेकवपदी ब्राह्मणस्योपांशुत्वमिति ।

-------------- टिप्पणी --------------

१- दीर्घामनुप्रसितिमायुषे धामिति प्राचीमन्ततोऽनुप्रोह्य देवो व: सविता हिरण्यपाणि: प्रतिगृह्णात्विति कृष्णाजिने पिष्टानि प्रस्कन्दयित्वाऽध्वर्युर्न यजमानाऽसौ हत्यवेक्षणा संवपन्ती पिष्टानि कुरुतादिति संप्रेष्यति ।
द्र० दर्शपूर्णमासप्रकार: पृ०

२- द्र० बौ० श्रौ० सू० २०-७-८-१८।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ दशमो ध्यायः

कैतानि कपालानि प्रक्षालितानि अनेन गार्हपत्यमुपसादयत्यध्वर्युः दक्षिणतः एककपालमुत्तरतः सर्वाणीति सन्निहितवचनेनाधान्यप्रभृति पात्राणां धारणं दर्शयति प्रक्षालितानीति सिद्धवदुपदेशात्सर्वाणि पात्राणि प्रक्षाल्यासादयतीति गम्यते । तथा च पात्राणि निर्णिज्य संसादयेदिति वचनं तस्यापि सादने संनिधानार्थं प्रदर्शनार्थं चैतत्सर्वमेषामुपयोज्यद्रव्याणां प्राग्विभागेनान्वाहार्यस्थापनमिति एवं हि साङ्गं कर्म भवति । गार्हपत्याज्याधिश्रयण- पत्नीसंयाजवचनात् श्रपणस्य निमित्तप्राप्तौ नियमार्थं गार्हपत्यग्रहणम् ।

अथ अनेन गार्हपत्यमुपविश्य धृष्टिमादत्ते - धृष्टिरसि० कृणुच्छेति।[2]
[1] धृष्टिग्रहणमनन्तरार्थं, अन्यत्र: शालामुखीयपादितत्वादपवादस्यायामुपवेषः, कपालोपधानार्थः, उपवेषस्य पौर्णमास्यां विकल्पवचनः केवलं सान्नाय्यार्थत्वे पौर्णमास्यां तदनर्थकं स्यात्तस्मादुपवेषाभावे धृष्टिर्वा उपवेष इति दर्शनात् उपवेषेऽपि मन्त्रो न विरुध्यते । गार्हपत्यमभिमन्त्रयते - याग्नेऽग्निपायादं जहीति , दक्षिणाङ्गारं निरस्यति- निःक्रव्यादं सेधेति। अथ उपस्पृश्य आधान्य-(आधान्य)- मावर्जयत्यादेवयत्नं कुरुति ।

अङ्गारनिरसनादर्धं धृष्ट्या केचिदन्यं चं यथापदिमेवैच्छन्ति, केचित्तु न इच्छन्ति निरग्नेऽग्निंक्रव्यादंसेध यत्रोऽग्निं देवयजावहेति ।एवं निराकाङ्क्षत्वा भवतः तं दक्षिणीयां कपालानामग्निनाभ्युपदधाति- " ध्रुवमसि " ० पर्यूहेति सर्वाणि-अन्यैनोपदधाति उपानेष, कपालेष्वधिश्रयत्यपामयामत्वादेत्यव पैलदाग्यवचनात् । अपामयामत्वोऽपि च प्रकृतीन्यङ्गभूतैर्वेवाकुर्या इति ।

[3] अथाङ्गारमधिवर्तयति- निर्दग्धं रक्षो निर्दग्धा अरातय इति । अङ्गारा-

- -

१- द्र० दर्शपूर्णमास प्रकाशः, पृ० २४८ ।

२- (का०टि०भा०पृ० द्र०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दर्शनाधिवर्धने मध्यमस्यैव अदृष्टार्थत्वात् , तस्य रक्षसामुपहत्या इति वचनात् ।

अधिवान्यंगारैरिति दृष्टार्थस्य च वक्ष्यमाणत्वात् ।

४

अथ पूर्वार्ध्यमुपदधाति- ध्रुवमसि० पर्यूहति । अर्धस्थाने पूर्वं मध्यमर्ध्येषु । मध्यमात्पूर्वस्मिन्नन्ते उपधेयमित्यर्थः । अथापरार्ध्यमुपदधाति- धरुणमसि० पर्यूहति । अथ दक्षिणार्ध्यमुपदधाति- धर्त्रमसि० पर्यूहति । अथो पूर्वमुपधिमुपदधाति- चितस्थ० पर्यूहति ।

अथापरं उपधिमुपदधात्येवम् । उपधिकोण प्रदेशोपधेयं दक्षिणार्ध्य- समीप० उपधीयत इति । एवमेव द्वे उत्तरे । एवमेव० द्वे उत्तरे इत्येवाभिसम्बन्धो नाथापरमेवेति चतुर्णामुपधानमुक्त्वा चितस्थेत्यस्यार्थवादे सजातानस्मा अभितो बहुलानीति दर्शनात् । एवमेव द्वे उत्तरतः सम्पृष्टे उपदधाति - चितस्थ० इति । चतुर्णां चितस्थेत्येव । पुरस्तात्प्रथमं, पश्चात् द्वितीयम् , एवमेवेत्यतिदेशात् ।

अथैनान्यंगारैरधिवासयति- भृगूणामंगिरसां तपसा तप्यध्वमिति ।

- -

३- निर्दग्धं रक्षो निर्दग्धा अरातय इति कपालेऽङ्गारमत्याधाय ध्रुवमसीति पूर्वं द्वितीयं संस्पृष्टं धरुणमसीति पूर्वं तृतीयं चिदसि विश्वासु दिक्षु सीदेति मध्यमाद्दक्षिणं परिचिदसि विश्वासु दिक्षु सीदेति मध्यमादुत्तरम् ।

द्र० दर्शपूर्णमास प्रकाशः , पृ० २४८ ।

४- मरुतां शर्धोसीति षष्ठम् । धर्मासीति सप्तमम् । चितस्थेत्यष्टमम् ।

द्र० दर्शपूर्णमासप्रकाशः , पृ० २४९ ।

५- भृगूणामङ्गिरसां तपसा तप्यध्वमिति वेदेन कपालान्यङ्गारानध्यूहयन्ती- रधिवपति । द्र० दर्शपूर्णमास प्रकाशः , पृ० २५० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सर्वत्र गार्हपत्यादेव धूम्र्यांगारग्रहणम् ।

कथैतानि योगेन युनज्मि- यानि घर्मे युक्तामिति । योगोऽनंतरम:, युक्तामिति शाखान्तरीयो मन्त्र: । काले कपालानि युनक्तीति वचनाथाप्यमानोऽपि मन्त्र: । कपालानां योगे[१] इति सूत्राचार्यैरनोक्तमारोपमन्यत्र, तत्रैवास्थितानि मन्त्रैर्युक्तानि वैरूपक्तानि भवन्त्यन्तरा विमोचनमन्त्र एव स्यादिति , सूत्रं यानि घर्मे इत्यनेन विमोकवचनादसंयुक्तस्य विमोकाभावात् योगमन्त्र उत्प्रेक्ष्य:, एष एव मन्त्र इकाम्नात् सामर्थ्याद्युक्तामिति बोधयतीति गत्यंतराभावं एव स्यात् । इत्यत्रत्यन० योग:, वैरूपक्तानि कुर्मादीत्यादिभि: तैरेव युक्तानि इतरोऽपि विमोकार्थ० एव लिंगपाठात् बलीय इति । एवमेवोत्तराणि कपालान्युपदधाति ।

कपान्यमावर्धयत्यादेवनमित्यादिपूर्ववत्, गट्ट कपालान्युपधाय मध्यमस्यापित एकं तत: पूर्वमुपाधि; तथा परमुपाधि, पूर्ववद्द उत्तरत: । विवस्थैत्येव पंचप्रभृति योगमन्त्रान्तम् ।

कपोदरन्त एवमेव वैमृधायिकायश कपालान्युपदधाति योगमन्त्रान्तम् ।

(कपोदरत एवमेव वैमृधायिकायश कपालान्युपदधाति योगमन्त्रान्तम्)
कपाचास्यायामन्यपोऽप्टा उपधायोदत वैन्द्राग्नायासन्नका वैन्द्राय माहेन्द्राय वासन्नका एकादश कपालानि पूर्ववदुपदधाति । सर्वत्र योगमन्त्रान्तम् । कपान्यधि कपालान्युपधवे चरुस्थालीमध्यस्थेति अपणानि तपन्ति पिष्टसंयवनीया अप: । कपीधय इत्यादि अंकुरनं कर्निकमार्थम्, कपीधनमुपरीन्धनम् उपेन्धनं समीपे अध्यते थेलानि अपणानि काष्ठानि मध्यानं प्रक्षिपो यावदर्थं पिष्टसंयवनीया: संयवनार्था भवन्ती: प्रणीतानां पाकार्थत्वात् तत इति । केचित्तु संयवनीया: प्रणीता: इति वचनादप: इति सामान्यनिर्देशात् पूर्णपात्रमन्त्रवेदीति निषतीति चान्ती श्रवणात् ।

---

१. द्र० बौ० श्रौ० सूत्र . २०-८-२०/८.

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मन्त्रा इत्यपरे तथा च प्रणीताश्च स्रुवेणेति उपपत्ती इति शेषः, स्रुवाणी-
मधिकरणं स्थाल्याः तिरः पवित्रमप आनयनं चातुर्मास्यादिषु दर्शनात् ।

अथापरस्तिरः पवित्रं प्रणीताभ्योऽप आनीयेति तत्त्वं भाष्यम् ।
प्रत्यक्षीनामधिकरण इति तिरः पवित्रमप आनीयाधिश्रयेदिति बौधायनो ऽर्था-
पत्त्यादिनमिति शालीकि: । अपरे: धृष्टेरादानं विद्यते न धृष्णुरिति शाली-
किमतेऽस्मात् बौधायन आपित एव धृष्टिमादधीत धृष्टिरसि प्रत्यन्वीति ।
गार्हपत्यमभिमन्त्रितायाग्नेऽग्निमामादं जहीति निष्क्रव्यादं सेधेति दक्षिणा-
माहारं निरस्यैवाग्न्यादि क्रव्यादेवकं वदेति शेषः चरुस्थालीमधिश्रयेद्ध्रुवाऽसि
पृथिवीं दृंह गर्भेण ० पर्यूहित्यधीनां प्रदक्षिणमङ्गारैः परिचिनुयादित्याग्नि० पराश्च
इति , स एव सर्वा चरुस्थालीरधिश्रयेदिति । पुरोडाशसम्बन्धा मन्त्रा इति ,
शालीकिमते धृष्टेरादानादिमन्त्रा न सन्तीति ।बौधायनमते तु वचनादेवानुवर्य
प्रत्यक्षं उपांशुयाजकल्पनं धृष्ट्यादानादि मन्त्रा भवन्तीति एवं यथास्थानं कल्पकर्म-
धर्मा भवन्ति । यथास्थानमेव निर्वापादौ प्रजापतये जुष्टं निर्वपामीत्यादि यद्येव-
त्यो यथोपांशुयाजो भवति प्रशंसाद्धरु धर्मा उक्ताः । वाजसनेयिप्रायस्य स्व-
शाखायामाम्नायेनोपांशुयाजस्य प्रजापतिर्देवत्यो यजा स्यादिति स पार्वणा-
ज्यमपीति वचनात् । तथा तावद्धावन्तौ सानिवाय्यसहित नाम्नांशु पौर्णमास्यां
यजन्तीति शाखान्तरवचनाच्च चरुपदाऽनुकृष्य इति । १

CC.O Sampurnanand University Collection. Digitized by eGangotri

अष्टमोऽध्यायः

अधीरेण गार्हपत्यमुपविश्य यावंमनस्तिर:पवित्रं पात्र्यां कृष्णा-जिनात् पिष्टानि संवपति- देवस्यत्वा० उत्ताभ्यामभ्यो पुष्टं संवपाभ्यमीणा-माभ्यामनुज्ञा अनुज्ञा इति यथावेयतत् । उपवेशनमर्थ्याप्तेऽन्यमाप्यर्थ्यप्राप्ता-नामवनेऽभ्युदंग्रार्थं कृष्णाजिनादितिम्भिमार्थं नानावीजेषु कृष्णाजिनस्यैव-त्वात् , कृष्णाजिनादेव संवाप इति । मन्त्रभेद: प्रोक्षणवत् यथावेयतमिति पूर्ववत् । तस्मायां पिष्टद्विवपन्यां संवपनमाचारात् कर्तव्य । मन्त्राविदन्य-निराप्यो न साधुत्वयवनात् यन्त्रा तन्यंतः पाकानुवे येन येन यत्तवि:संसिध्धे-रितिवचनात् नोष्णादिक्मानेण भवतीति न च पुन: पाकशंका,यन्तुपायत्वात्, मन्यथा उष्णादिकेनापि पुन: पाकशंका स्यात् । मन्द्येपवन्तीभिरेव संवपनं कट पात्रीया: संतापनावचनादिति ।

अथ परि[1]षेचिणामाह अप आनयति आहरति प्रणकार: । प्रणी-ताभ्य: स्रुवेणोपहत्य वेदेनोपयम्य पात्रिं वान्त(न्त) धार्यै मदन्तीभ्यस्ता अपोरातनोपमाना: प्रतिमन्त्रये - समापो मद्भि: ० सृज्यध्वमिति ।तस्ता आपो मदन्ती इत्याद्यायन्ते । प्रणीताभिव्याप्तत्वात् स्रुवस्य अन्येन पात्रेण मदन्तीभ्य आनानमिति प्रणीताभ्य आदाय पात्रान्तरे आनीय मदन्तीभ्य स्रुवेण गृह्णी आहरेत्युकेनानीता भवेयुरिति केचित् ।किमत्रातिविष्टमिति चिन्त्यम् ।परिमाणो वैतावदित्यवस्थस्तत , अन्ये प्रणीताभ्य आनीय पात्रान्तरे निधाय पुनर्मदन्तीभ्य: स्वपतिवेशोऽर्थात् भवतीति ता अपोरे कौ स्थान्यति । एवं ता अपोरित्युपपत्ती, इदि पूर्वमपि पुनरुक्तम् ।

संवपन इति सूत्रं शालीकेरमीकिमाह बोधायन: प्रणीताभ्य: स्रुवेणो-पहत्यप आनीयैवं मदन्तीभ्यस्ता अपोरातनोपमाना: प्रतिमन्त्रये समापो मद्भि-रग्मीतीति सूत्रं, पुनपानयनं तदुपेय मन्त्र: अपोरेवावादिति । वेदेनान्वयनं मंत्र-स्यावृत्ति: भिन्नार्थत्वानुव्यावताभिमीतार: ।

- -

१- तु० का० श्रौ० सू० २।३।८-२।३।८ ।
तु० दर्शपूर्णमास प्रकाश: , पृ० २५२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथानु परिप्लावयत्यङ्गुल्या: परिप्लुतास्य समाप्त्यै: पुनश्चमिति ।

परिप्लावनं मध्ङ्गुलीभि: आनन्तर्यात् पाकस्य सम्यक् भवतीति तथान्ति पिष्ट-संयवनीया: इत्येतदर्थत्वश्रवणात् । संयौति - अन्मत्येत्या संयौमीति । संयवनं मेक्षणेन तदर्थत्वेन दृष्टत्वात् अभिहितत्वाच्च । संयुत्य व्यूह्याभिमृशतिमन्त्रे-त्याग्नीषोमाभ्यामभुमा अनुमा इति यथादैवतम् । संयुत्य व्यूह्याभिमृशतीति श्रवणादानन्तर्यं कुम्भात्र विभागमन्त्रोऽस्तीति दर्शयति । अभिमर्शन एव मन्त्र: ।

पिण्डकरणम्

पिण्डं करोति मखस्य शिरोऽसीति दक्षिणेषां कपालानां प्रत्यूध्यां-गारांस्तेष्वधि वृणक्ति- धर्मोऽसि[1] विश्वायुरिति । कपालेष्वित्येव सिद्धे प्रत्यूढ-वचनमर्धप्राप्तानामङ्गाराणामुपसंग्रहार्थम् । प्रथस्वोरु[2] प्रथस्वोरु ते यज्ञपति: प्रथता-मिति ।

प्रथमकपालेष्वासंवन्, तं तन्वन् कूर्मकारं करोति । सर्वाणि कपालान्य-भिप्रथतीति ब्राह्मणम् । स(न) गुरुर्यो यस्य स तन्वेतम्, संवलयितकान्तन: कार्य: परित: सन्यात्मेधा: कार्या इत्यर्थ: ।

अथ पृथग्वीरं वचनेऽप्यशक्यत्वात् पिण्डकरणकाल एवेत्थंप्रकार: कार्य इत्य-न्ये। ब्राह्मणग्रहणं संहितापाठदृष्टयोरर्थस्थापनार्थं सामान्यविशेषायत्तयोर्वि-कल्पनिवृत्त्यापना । अथ शिर:पवित्रं साज्यत्वात्याम् आज्यं निर्वपतिनक्तीनां - धर्मोऽस्यौ० इत्यत्र० वेदकर्षायामित्यत्रविहरति भस्मनि अङ्गारान्निरूढेष्वधि-श्रयति, उपहत इति साग्नेकस्योपरत: आनन्तर्यात् गार्हपत्यस्य वा तस्य अर्पणार्थ-

- -

१- इयन्तं सैनाया अग्निर्द्यौ मुखमपोहामीति वेदेन कपालेभ्योऽङ्गारानपोह्य धर्मोऽसि विश्वायुरित्याग्नेयं पुरोडाशमष्टासु कपालेष्वधिश्रयति ।

२- उरु प्रथस्वोरु ते यज्ञपति: प्रथतामिति पुरोडाशं प्रथयन्सर्वाणि कपालान्य-भि प्रथयति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

त्वेन दृष्टत्वात् ।

वाक्यस्य निर्वपण इति सूत्रं शालीकेरात्यातं बोधायनस्यानादि-
स्मार्तोपमन्यव: सर्वाणि हवींषि परिभिक्षाप्याज्यं निर्वपेदिति सूत्रमाश्वलायन-
वचनानन्तरं बोधायनस्य चौणधस्यान्तं मन्येति सर्वाणि हवींषि निर्वपेत्यर्थ:
प्रयोजनं हविर्भि: सह प्रोक्षणं स्यात इत्युक्तम् औपमन्यव: ।

सर्वाणि हवींष्यधिश्रित्य प्रथमो, याज्ञनात् पुरोडाशं चाधि-
श्रयतीति विनिर्दिष्टानेकत्वमिति द्वितीय: ।प्रोक्षणकाल: तृतीयस्मान्निर्दिष्टानेक-
त्वार्थं वाक्यमिति । उपस्थाप्यैनावेदीति प्रेषणान्मन्त्रस्य ग्रहणाच्च
प्रेषणपूर्वकान्मन्त्रकाल एव निर्वापे प्राप्ते सह वक्ती वचनात् पुरोडाशमधिश्रित्या-
ज्यं निर्वपेदिति ।

प्रेषणार्थ: शेषसंस्कारो भविष्यतीति सर्वोपितत्वात् ।
[1] पदार्थानुसमये प्राप्ते साम्प्रदायिकैरुक्तम् ।अविरोधिन एकैकस्य कर्तव्या इति
यावन्तो न्यायानित्यैवमादिषु ।

१- समान जातीयेन कर्मणैकैकमपवर्जयति ।(दर्शपूर्णमास प्रकाश:, पृ० २५४)
एक विधि चोदित एको व्यापार: समानजातीयं कर्म। तस्य बहुषु क्रियमाणस्य
व्यक्तिनानात्वात्समानजातीयत्वाभिमान: । तैरेकैकं हविरनुष्ठेयत्वमपवर्जयति
निर्वृत्तार्थं करोति । न तु भिन्नजातीयैरेकैकमित्यर्थ:। तथा प्रथमस्य कृत्वा
प्रथनं द्वितीयस्य करोति तथैव खण्डीकरणादीनि । एवं च पदार्थानुसमय एव
सर्वत्राभिमत इत्युक्तं भवति । तत्राह सत्याषाढ:- संयुक्तानित्वेकापवर्गाणि
यथाऽवदान प्रदाने अवधारणे- निष्पवने चेति ।मीमांसकस्त्वाहु:- संयुक्ते तु प्रक्रा-
न्तं स्यात्तदितरस्य तदर्थत्वादिति ।

द्र० दर्शपूर्णमास प्रकाश: , पृ० २५६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उपांशुयाजवत्प्रचरो यद्वाऽऽज्यांस्तूष्णीं[1] तिरःपवित्रं स्थाल्यामावपति उपांशु-
याजे ऊहेन ध्रुवासि पृथिवीमिति कल्प्यास्वाधिकरणवचनात् शालीकिः ,बोधा-
यनमते तु ध्रुवस्यावदानादेः समन्त्रकत्ववचनात् धर्मास्थविरत्वाद्वा इति कल्प्यामन्त्र।
एवमेवोपरं पुरोडाशमधिवृणक्ति पिण्डकरणादि प्रथनान्तं एवमेवेति बौधायना-
पस्तम्बादि प्राणाद्यभिमर्शनान्तमिति भाष्यम् । एवमेव वैमृधमधिवृणक्ति; अमावास्ये-
ऽपि ऐन्द्राग्नमपि । यद्यपाकृत्य, सान्नाय्ये तूष्णीमधिवृणक्ति एवमित्यवचनात्
प्रधानार्थत्वात् संस्कारस्य । पश्चाच्च विरधिनाधिश्रयणं स्थापनं पेषणेनालोड्य
पिष्टं वपति ।

अथ पात्र्यामप आनीय पक्षाणस्य पुरोडाशस्य त्वचं[2] ग्राहयति त्वचं
गृह्णीष्व त्वचं गृह्णीष्वेति त्रिः। पात्रीदां पिष्टालेपन्यामप आनीय ताभिर-
द्भिरक्तेन श्लक्ष्णीकरोति ।

अथाप आनीय परिमार्ष्टि; मांस एव तत्त्वचं दधातीति ब्राह्मणात्
मन्त्रस्यापि निराकृतिः पक्वस्य त्वचं ग्राहयतीति शेषः ।

अथ पर्यग्नि करोत्यन्तरितं० अरातय[3] इति त्रिः ,तदुल्मुकेन तिरस्तूष्णीम्।
पर्यग्निकरणं सर्वेषां तन्त्रपुरोडाशार्थमेवेतरार्थं ब्राह्मणे पुरोडाशसम्बन्धेन श्रवणात्।

- -

१- तिरः पवित्रः।
२- त्वचं गृह्णीष्वेत्यादिभिः ' श्लक्ष्णीकरोत्यनतिदारयन् । अनतिदारयन् यथा
न्यतरत्कं स्यात्तेन्। बौधा० सू० दर्शपूर्णमास प्रकाशः, पृ० २५७।
३- अन्तरितं रक्षोऽन्तरिता अरातय इति सर्वाणि त्रीणि त्रिः पर्यग्नि कृत्वा
देवस्त्वा सविताश्रपयत्वित्यु ल्मुकैः परि तपति । सांनाय्यमप्यानीय भारद्वाज मतात्।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उत्तरेषां प्रागात् कपुरोडाशविवृत्तावनन्यत्वम् । सर्वाणि हवींष्यधिश्रित्य प्रथमो, यागक्रमात् पुरोडाशं चाधिश्रयति इति विनिश्चितमेकत्वमिति तृतीयः । पर्यग्नि-करणमिति केचित् । एवं सति पुरोडाशानामेव कर्तव्यं स्यात् , नाज्यसान्ना-य्ययोः, विकृतिषु चाज्यं निरुप्याधिश्रित्य पर्यग्निं करोति प्रकृतिवच्चावत्प्रधाना-र्थत्वात् संस्कारस्य तन्त्रोऽप्यावापप्राप्तमिति चेन्न । चावापप्राप्यानामवचनात् इव (विशेषवच) विशेषवचनादग्निकर्षणादधिश्रयणयोः प्राकृतत्वात् तदीकारणा-च्च पर्यग्निकरणमपि प्राकृतमिति गम्यते । तस्मात् साधारणम् पवित्रवतो लपयती-त्युपदेशवचनात् । गार्हपत्यमभिमन्त्रयतेऽग्निस्त्वं दास्य। स्वयमेवोत्तरं पुरोडाशं लपति लपयति । अथ दक्षिणं पुरोडाशं भस्मनाभिवास्य वेदेनाभिवासयति संमृजता पूर्वस्य संमृजतापुनरस्मीति त्रिः । मन्त्रस्यापि त्रिरावृत्तिः, भस्मनाभिवासनस्या-र्थं वेदेनाभिवासनं सांगारेण भस्मनाऽङ्गारैरधिवासने वेदस्य विनाशात् नाकरि-ष्यं वेदकृत्यं द्रव्यान्तरेण कुर्यात् प्रेषरत्नान्तरो(मंत्र) मंत्रप्रयोगो न स्यात् । धृष्ण्या गार्हपत्याद्भस्मापादायावकीर्य वेदेन त्रिः समीकरोति (इति) बौधायनः , यथोत्तरं भस्मनाभिवास्येत्यादि ।

यथाष्टौ दक्षिणत एकादशोत्तरतः उत्तरं पुरोडाशमधि पृणक्ति लप-यति । प्रातीयां दधिपयस्पृणक्ति- उत्तरं पुरोडाशमनुवासयतीत्यादिरूपेकत्वन्तु । वै-मुखस्य सामान्यान्यत्वमपीति स्थापनार्थमावस्थापनार्थं चैत्युक्तम् । पवित्रवतो लप-यतेति वाचं विसृजते, इत्युक्त्वा वाचं विसृजत इत्यर्थः । संवपनविष्टानि वाचं यच्छति तामपिवदंत लपयतीत्येव वाचं विसृजते इति कर्मान्तम् । पवित्रवता लपतीति

१- आपस्तम्बस्य मतानुपुरोडाशः स ईश्वरो यजमानमित्यादिषु पुरोडाशग्रहणं प्रदर्शनार्थमतः सर्वेषां पर्यग्निकरणम् । मीमांसकानां त्रिषु पुरोडाशानामेकवच-नात्र विवक्षाया त्रिषूनां पुरोडाशानां पर्यग्निकरणं प्रकृत्यर्थविवक्षा कारणा-भावात् । अतो न्यायोक्तः । परितं उल्मुकन्यनं पर्यग्निकरणं तदीयोरपि करोति सर्वाणीति वचनात् । तथा च भारद्वाज पर्यग्निकरणकाले यथ्युक्तमातीति । तत्र यत्राप्याज्यानीते हविः श्रपणं भवति तत्राऽपि प्रातर्दोहस्य गार्हपत्यधृतस्यालेना-ग्निना पर्यग्निकरणं सम्भवात् । द्र० दर्शपूर्णमास प्रकाश पृ० २५८.

(श्रौ०टि० भा० पृ० ५०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सम्यग्यथा शृतं भवति तथा श्रपयेत्यर्थः यथासञ्छिन्नं कुर्वन्ति परिकर्मिणः ।
यजमानोऽसंघाटनं गार्हपत्यांगारेणाभितप्यांगुल्यान्तरवेदि प्राचीनं
त्रिरु[3]ल्मुकं[4] निवपत्येतताय स्वाहा, पिताय स्वाहा, पितायस्वाहेति ।
देवा यावाराधनुनीना: प्राणसर्गा: (निवपन्त्यं) निवपनं च प्राणसर्गं ,देवाश्च
स्पृष्टेन करोति । तथा कल्पान्तरात् यथा न संकुर्येरन् तथा तथा निवपति,
तदीन्धो ऽसंमुखं करोति प्रत्य० निवपतीतिवाक्यान्तम् । एकैन मंत्रेणैकनिवपति
प्रत्यगपवर्गम् एतताय , पिताय , पितायेम् । का उक्तं ऋषि: पूर्वं जघन
हात । यदिलवा(वा) द्वौ निवपति - एतताय० पिताय स्वाहेति । को नु
खलु एतत: को पि: कश्चित इति , पिता पितामह: प्रपितामह इत्येके ।पृथि-
व्यन्तरिक्षद्यौरित्येके। अग्निरादित्यो वेदा इत्येके । अन्नेत्रयो ज्यायांसो प्रास
वासन्निधत्येत ऋणय: तां नामधेया बभूवुरित्येके । ते देवा(आप्येष्व) आप्येष्व-
मूलो त्वाप्यनामधेयादेवा भवन्ति । इति कर्मान्तम् । कलो पूर्वमुल्मुकेनाभितपन-
मुक्तं , पश्चाच्च दानं वह दत्त्वा पश्चादभितपेनं चन्तर्वेदि निवपत्यवरुध्य ,उल्मु-
केनाभि गृह्णाति भितत्वायेति प्राक्षणमुक्तापि संभवतीति । अपणकपार्थक्रियो-
विवेदितान्याभ्युक्तमिति भाव: । अत्रान्वाहार्यं दक्षिणाग्नावधिश्रयतीति-
कात्यायन:। पौर्णमास्यामत्र वैविकल्पम् ।

- -

२- भस वा वाचं विसृजेत् । अभिनासयन् विसृज इति वचनात् वर्तमानेऽभिवासने-
वाग्विसर्ग: समाप्तो वा, बभूवसाद्य कालम् । भस वा वाचं विसृजेदिति वचनात्
अविरहंत: श्रपयतीति मंत्रोच्चारणेन वा वाग्विसर्ग: (भा० सू०)
द० दर्शपूर्णमास प्रकाश: ,पृ० २५६ ।
३- घंगुलिप्रक्षालनं पात्रो निर्णेजनं चोल्मुकेनाभितप्य सव्येनान्तर्वेदि त्रिरो देवा
लिखति प्राचीरुदीचीर्वा ।
४- तास्वसंस्पन्दयंस्त्रिर्निवपति प्रत्यगपवर्गमेतताय स्वाहेत्येतै: प्रतिमंत्रम् ।असंस्प-
न्दयन् यथा न भिन्नित्युक्तं रेखाभ्यो बहि:। भा० सं० ।
द० दर्शपूर्णमास प्रकाश: ,पृ० २६० ।
५- निनीय वाऽभितपेदभितपेत् ।द० दर्शपूर्णमास प्रकाश: , पृ० २६० ।
६- (शै०टि० क० पृ० ५०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ वेदमाधत्ते- वर्षं वेद: पृथिवींकरोत्विति , वेदे(न) न वेदिं[८] त्रि: सम्मार्ष्टि- वेदेन वेदिं विवु: ० विवदानिरिति । संमार्गबालाराबास- पुरस्ताद् पुरा(छ०)पर्णा: (पुरुपर्ण:) वेदाग्राण्य० वेदिकरणारंभत्वाद्भुरान्तुा कार्यो वक्तव्येव वचनं प्रयोजनं मतवेदिस्तम्भयजुरेतीतिवचने स्पृष्टवानमृत्वैव यथा-स्यादिति[९] ।

- -

६- वयुष्टायामुपसमुह्य दक्षिणा वा सं उद्देन्वाहार्यपचनस्येतु । दक्षिणा वा संदोहु यदन्वाहार्यपचनो(दक्षिणाग्नि:) नित्योऽभिहित: स एव भवति।

पु० का० श्री० सू० ४-८-१३ कर्क भाष्य ।

७- देवस्यत्वा सवितु: प्रसव इति स्फ्यमादायेन्द्रस्य बाहुरसि दक्षिण इत्यभिम-न्त्र्य हरस्ती मा प्रतिगामिति वर्मेण संमृज्यापरेणाऽऽहवनीयंपश ।

८- वेदेन वेदिं विविदु: पृथिवीं सा पप्रथे पृथिवी पार्थिवानि ।गर्भं बिभर्ति भुवनेष्व-न्तस्ततो यज्ञो जायते विश्वदानिरितिपुरस्तात्स्तम्भयजुषो वेदेन वेदिं त्रि: स-म्मार्ष्टि उपरिष्टाद्वा । पु० दर्शपूर्णमास प्रकाश: , पृ० २६०-२६१-२६२ ।

९- पूर्वार्धाद्वेदेर्विगृह्यो वेदेशात्स्तम्भयजुरिति । पु० दर्शपूर्णमास प्रकाश: ,पृ० २६२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथ नवमोऽध्यायः

अथ अनेन वेदां(दे)स्तिष्ठन् स्फ्यमादत्ते- वेदस्य त्वा० हस्ताभ्या-
मादधाति ।

अथ सम्मार्गानन्तरं निधाय वेदं तिष्ठन्निति उत्तरकार्याणां तिष्ठता-
कर्तव्यत्वार्थोऽनुवादः। उत्तरकार्यानुरूपं सर्वस्थानमासनं वानुष्ठेयमिति ज्ञापनार्थं
अग्निहोत्रे तु स्थानकार्यभावावासीन एवाचरेत् । आदायाभिमन्त्रणं - इन्द्रस्य बाहुः० शतं तेजा ऋती
पश्चिमेन वेदिं संस्पृशति- वायुरसि तिग्मतेजाः अध्युष्टिरसि वानस्पत्यो द्विषतो
वध इति संस्पृशति धारामनुमार्ष्टि । अभिमन्त्रणं प्रधानत्वाद्दक्षिणेन धारणं गुण-
भूतत्वात् सव्येन । संस्पर्शनमप्येवमेव , सव्येनेति केचित् । स्फ्यादानस्यार्थाभि-
धानात् । वेद्यर्थं प्रति विशेषानभिधानात् , सम्प्रैषसम्बन्धाच्च स्फ्यस्य सम्प्रैषेण-
प्रयुक्त्येव सिद्धे स्फ्यमादत्त इति वचनं वेदिकरणाभावेऽमन्त्रकादानार्थं प्रयाजमग्नी-
षोमीयादिषु सकृन्मन्त्रवेदा इति वचनात् स्तम्बयजुषोऽभावे सम्प्रैषार्थं मन्त्रेण
स्फ्यादानमन्यो वेदिकरणमध्ये वचनादर्थमेव, ततश्च तूष्णीमेव स्फ्यादानमिति ।
तृणं निरस्य अप उपस्पृशतीति केचित् ।

स्तम्बयजुषोऽपेक्षणं कुर्यात् । प्राच्यामुदीचीनाग्रं बर्हिर्निदधाति।
पृथिव्यै वर्मासि वर्मकरणार्थः भवति । सौमे वेदिपूर्वार्धादारभ्याद्धरणवर्जनादि हविः
शेषाभावेऽप्यविरोधादिदिग्नानान्यापि स एव धर्मोऽनुष्ठेयः , पूर्वार्धदेवदि-
क्षुविदेशात् स्तम्बयजुर्हरणस्यारम्भः । तस्मिन्स्फ्येन प्रहरति पृथिवी देवयजन्यो०
षधीयमिति । अपामुपस्पर्शनं केचिदिच्छन्ति । प्रहरतिश्च स्वनन्त्यर्थ इति ,प्रहरणा-
नि च फलीकरणात् , अपहतोऽररुः पृथिव्या इत्यादयः । छिन्नेन दर्भमूलेन सकृत्तमादत्ते
स्फ्येन । व्रजं गच्छ गोस्थानमिति हरति। वेदिं प्रत्यवेक्षते - वर्षतु ते द्यौरिति कृत्वो-
त्करे निवपति- बधान० पाप्मानमिति ।

आग्नीध्र उत्करसमीप उपविश्य हस्ताभ्यां पुरुषमिगृह्णाति ,अभि-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गृह्णातीति ब्राह्मण वचनात् । उपमूले लुनीतेति वचनात् तदेवं सति युक्तार्थं भवति । द्वितीयं प्रहरति - पृथिवि० मा हिंसिषमित्यपहतोऽररुः पृथिव्यै देवयजन्या इत्यादि, व्रजं गच्छगोस्थानमिति हरति वेदिं प्रत्यवेक्षते ।

तृतीयं प्रहरति पृथिविदे० किं शिवमित्यपहतोऽररुः पृथिव्यौ देवयजनात् इत्यादि, व्रजं गच्छ गोस्थानमिति हरति, वेदिं प्रत्यवेक्षते, वर्षतु ते द्यौरिति- तृतीयस्मिन् निक्षिपति बधानदेव० मा मौगररुस्तीदिवंमास्कानित्यन्ता-नुवर्तयति । सर्वेषु प्रहारेषु अररुस्ते दिवं मास्कानित्यनुवर्तयतीति केचित् । तन्न ग्रहणानुग्रहणात्, इतरथा अररुस्ते दिवमास्कानिति ब्रूयादिति । अन्ये तृतीय एवानुवर्तयन्ति द्वयमकशब्दोऽप्यर्थवात् भवत्यनुष्ठानस्यपूर्वमन्त्रापेक्षायामुपपद्यते किं वेत्यानोपपद्यते दिवं मास्कानिति भेद्याः । ब्राह्मणं च अपहतोऽररुः पृथिव्या इति पृथिव्या अपि बध्नन्तु । द्वितीयं हरतित्वान्तरिक्षादवैनमपघ्नन्ति तृतीयंहरति दिव एवैनमपघ्नन्तीति पुनः पुनः सर्वान्प्रहरणमावापमन्त्रगतविशेषवचना-र्थम् । तूष्णीं चतुर्थं हरति सर्वहिंसा, तूष्णीमिति मन्त्रनिवृत्त्यर्थः वाङ्नियमोऽपि गृह्यते ।

परिग्रहव्याख्याविचारः

अथ पूर्वं परिग्रहं परिगृह्णाति - वसवस्त्वा परिगृह्णन्तु गायत्रेण

- -

१- पृथिव्यै वर्माऽसीति तनोविग्रहं प्राग्रं वा वर्मं निधाय पृथिवीं देवयजनीति तस्मिन्नस्फ्येन प्रहृत्यपहतो ररुः पृथिव्या इति स्फ्येन सतृणान्पांसूनादाय व्रजं गच्छ गोस्थानमिति हरति। वर्षतु ते द्यौरिति वेदिं प्रत्यवेक्षते यजमानं वा ।
द० दर्शपूर्णमास प्रकाशः ,पृ० २६३ ।

२- बधानदेव सवितरित्युत्करः पुरस्तात्तृतीयदेश उत्करं निवपति परिभिती वा वेदी निर्वपति ।

३- अररुस्तेदिवं मा स्कानिति न्युब्जमानो ग्रीवांऽञ्जलिनाऽभिगृह्णाति ।

४- एवं द्वितीयं तृतीयं च हरति ।

५- तूष्णीं चतुर्थं हरन्तवं वर्म शेषं हरति । द० दर्शपूर्णमास प्रकाशः , पृ०२६५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

छन्दसेति दक्षिणान्तरेणातः । रुद्रास्त्वा० त्रैष्टुभेन छन्दसेति पश्चा-
दादित्यास्त्वा० जागतेन छन्दसेत्युत्तरतः । दक्षिणतः प्रागपवर्गं पश्चाद्-
उदगपवर्गमुत्तरतः प्रागपवर्गं परिगृह्णाति, शास्त्रान्तरात् स्फ्येन परिग्रहः ,
रुद्रास्त्वेत्यत्र नापामुपस्पर्शनं क्रत्वनुकारात् पशुबन्धाच्च पूर्वापराविच्छेद-
वचनमिति च कर्कोऽपीच्छन्ति । रौद्रराक्षसेत्यत्र भाष्यवैश्वानरवद्विकल्पापत्तेः ।
नियम गण(तः) संख्यायाः अविवक्षितत्वाच्च उपि:, स्यादपत्नीत्विनस्त-
सम्बन्धाभाव विधिदृष्टत्वाच्चेति । वेदिं परिगृह्णन् अपि सूत्रं शालीकेरनीह-
स्माह बौधायनः श्रीणि प्रथमं परिगृह्णीयाद्दक्षिणमंसमथोत्तरमंसमिति
पुरस्तादेवैनां प्रदक्षिणं परिगृह्णीयादित्यपिमन्यन्तः । सूत्रमिति दक्षिणतः
प्रागपवर्गं पश्चादुदगपवर्गमित्युत्तरतः प्रागपवर्गमिति पुरस्तादिति दक्षिणांसादारभ्य
प्रदक्षिणमित्यर्थः । प्रथमं श्रोणिपरिग्रहे रुद्रास्त्वेति प्रथमो मन्त्रः । वसवस्त्वे-
ति द्वितीयः , आदित्यास्त्वेति तृतीयः । अत्र उदक्प्रागपवर्गत्वं औत्सर्गिकः ।
अथ करणान्तं अपतिक्रमाकारा: कृणते वैश्वीरेष्य अकृतोरुद्रवतीमादित्वतो
वर्धूर्मं विदो (नारुवा) यात्र पृथिव्या अथायं यजमानो नरिष्यदिति ।करन्नो
कृणुतेति तस्मात् करणसंज्ञा मन्त्रस्य, तंकरोति जपविधि: स्पष्टार्थः । प्रैणत्वे
सम्प्रैषमात्रेत्यत्रदस्तु , कृणुतरिष्टौमित्यादिविधि लिङ्लोटौ न प्रैषः । तथा च
तामेव करणं जपतोत्युक्त्या वैदिकारा वेदिं कल्पयेदिति कारनं यदि सम्प्रैषोऽयमभि-
व्याख्यानमेव स्यात् ।

१- द्र० बौ० श्रौ० सू० २०-८-६-२१८ ।
२- द्र० दर्शपूर्णमास प्रकाश: , पृ० २६७ ।
३- तत्रैव ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पञ्चमो ध्याय:

स प्राचीं स्फ्येन वेदिमुल्लिखेत् देवस्य सवितु:०[1] वेषा इति। उद्धतस्य तन्नत्यायमानुपस्पर्शनं भवति ।

यावान्होता पुरुषोऽवितिष्ठेदिति, तावन्मात्राऽन्योऽपि वदति । उत्तर-वेद्यां कुण्डं कुर्यात्तदे निवपति । पार्श्वं पार्श्वोर्णमासिकी वेदिर्यजमानमात्री भवत्यपरिमिता वा, यथाऽन्यानि त्रीणि अंसयोर्वे शिरस्येषु , प्राञ्ची वेद्यां उन्नतत्वा जघनोपस्य परिगृह्णीत्वे, प्रतीची श्रोणि निःप्रति पार्श्वतस्य परिगृह्णीत्वे , पुरस्तादंसयोरपि पश्चात्श्रोण्यां मध्ये सन्नता एव भवत्येवमेव स्त्रीयोनीति तस्यै यज्ञीयाधितनति प्रजापतिना यज्ञेन संमिताप्रतिष्ठायै तनति । अंगुलं त्र्यंगुलं, चतुरंगुलं त्र्यंगुलमं, हीनावमानीत्येकेषां, त्र्यरत्नि-मात्रीत्येकेषां, यावत्पष्टी वेदिरित्येकेषामेवेन यदन्येषामनुनिष्क्रान्ततरं भवति, वेदिमात्रा परिलेखे दक्षिणतो वर्षीयसी करोति पुरोधवन्ती करोति प्राची-मुदीचीं प्रवणामिति स्वादाति ।

यजमानमात्री चतुररत्नि:[2] अपरिमिताश्च उत्तरप्रमाणावधिक इति न्याय: । अपरिमितां प्रमाणादूर्ध्वं इति कात्यायनश्च । यजमानमात्रपरिमिता-

----

१- देवस्य सवितु: ० स च इति तनोति अंगुलं चतुरङ्गुलं यावत्वा ऽपाघ: पूर्वं तावतीं पूर्णमासी त्र्यरत्निमात्रीं प्रादेशमात्रीं वा पूर्वोत्तरेषु । पार्ष्णी पादस्या-परभाग: पूर्वोक्तस्तत्र । वीततर्जन्यङ्गुष्ठ: प्रादेशो ज्यङ्गुलकु: । (भा०७) पु० दर्शपूर्णमासप्रकाश: , पृ०२६६ ।

२- चतुरत्न्या ऽन्यौ उत्तरे निर्वपति पु० दर्शपूर्णमास प्रकाश:, पृ०२६७- ६८।

३- अपरिमितत्वं च प्रागुक्तमायाच्छ संख्यापेक्षया निर्देशाधिकांश आच्छन्नम्।
पु० का० श्रौ० सू० ११२-२१ क० भा० टि० ५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

पदार्थाधानमन्त्राणि त्रीणि संवेदैवं तिर्यक् पृष्ठ्या[१] (न) उत्तरा प्रतीची विस्तीर्णतरा सन्नततरा सामिप्छतरा । तत्पेक्षया वेदा: क्वचित् शुचिरिति शेष:, स्वोक्तन्त्योत्यविशेषितत्वाच्छ्रुतिपद्धि: । रथवर्त्मात्री च प्राग्विस्तार प्रमाणं वेदेति क्वचिदिमित्यैतदेव सर्वप्रमाणानुगतं भवतीति सामान्यार्थ:। तत्प्राच्यौ मानाभ्याऽतिरिक्तं न स्यात् दक्षिणपश्चिमाभ्यां प्रागुदङ्निम्नांतितिष्ठति निम्नावस्थीत्यर्थ: ।

यजमानोपविष्टस्त्वथ सम्प्रैषमाह- ध्रुवमुत्तरं परिग्राहं परिगृहीष्यामीति । तत: ध्रुवा प्रतीति- वृहस्पति परिगृहाण वेदिं ध्रुवा यजपरिगृहीति: । तत्पार्श्वाणां सुवां यजमानस्तर्भं वसं यजमानं च वेदोत्युपांशुत्वा क(च) परि गृहाणेत्युच्चैरनुजानाति । ध्रुवं उत्तरं प्रतिग्रहं परिगृह्णातितत्क्षीति , पश्चिणाश्च वसवस्त्वीति, पश्चात् त्वां धीरसोत्युत्तरत:। क्व प्रागुदनमपवर्ता बौत्तर्मिका ।

अथ प्राचीं स्पृश्येन वेदिं योयुप्यते-[२] धा असि स्वधा इति प्रतीचीप्रत्यक्षवर्णान्निम्नोन्नतसमीकरणार्थं यद्यति। योयुप्य इति सूत्रं बोधायनस्य , स्फ्येन योयुपित्वा च स्फ्येनोद्धृत्य[३] भावयितेति तल्लोकि:। सूत्रं धा असीत्यनेन समस्तेन योयुपनं च स्त्री स्वीत्यारभ्य स्वधायीत्यन्तेन योयुपित्वा पुरास्फ्येत्यनेनाभिमन्त्र्य इति लिंगात् ।

१- पुरस्तादंहीयसी पश्चात्प्रथीयसी मध्ये संनततरा भवति ।

बृ० दर्शपूर्णमास प्रकाश: , पृ०२६७ ।

२- बृ० श्रौ० सौ० सू० २०-६-१०-२२१८ ।

धा असि स्वधा असीति प्रतीचीं वेदिं स्फ्येन योयुप्यते ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथान्तर्वेदि स्फ्यं स्रुवस्य स्रुचां सम्प्रैषात्- प्रोक्षणी एव तत्र-
ध्माबर्हिरुपसादय, स्रुवं[1] च स्रुचश्च संमृड्ढि, पत्नीं सन्नह्याज्येनोदेहीति । अन्त-
र्वेदि तिरश्चीं वेदीं कृत्वा मध्यमेऽर्वेदि स्फ्यं धारयन् प्रैषति- उत्तरं स्फ्यस्य
अग्नीन्धनीति । सिद्धपक्षार्थं यं परिधानमिच्छायाम् । पश्चाद् वेदेर्निधाय
स्फ्यं निर्मितवत्या संप्रैषो[2]ऽत्रोपलक्षण: । प्रैषार्थश्चा[3]सावर्थरीति केचित् । न
च प्रपन्नार्थ:, अनुरूपता स्मरणार्थ:, अ(च्)व्ययी उपास्यानामनुपूर्विकाया इति
वचनात् । यथा तदा स्रुवं पातयित्वा तदाति तथा सम्प्रैषणं मन: समवस्थानार्थ: ।
वाग्नीध्र: कृत्ते समात्थाया वन्दीर्शब्दो गौण: स्यात् , पंक्षस्य-क्रियामीध्र:
प्रैषतो प्रकल्पानो वैदिताग्निधानाविशेषात् विशेषणात्थापनानात्युत्कर्षं च
सर्वेनाग्नीध्रुक्त्वात्, पत्प्रेषणे च तर्के नानुक्त्वात् , प्राप्तार्थस्य इत्यादिषिन्-
ति, तथा सति प्रैषो गौणं स्यान्नुयात्मा प्रैष्यो प्राप्तकालत्वे च याज्यनि-
यमकं स्यात् । यथ्यमस्य विरुध्यते न वाग्नीध्रेणं प्रयोजनमस्तु यमिष्टौ ति संयमं
यवचितात्म्यनिवृत्त्यनुपूर्विकाया: इत्याग्नीध्रोऽपि (यत्नं) प्रोक्षणीष्वासादने
अनुवनाय प्रापितं वक्तव्यं अणानन्तकल्पकात्यन्तध्रुवंभागविशसनात्या च नि-
श्चयते । यथ्यर्धुरेवात इत्यध्वर्युर्णं अन्यत् , अत: प्रान्त: पदार्था यथैव
कर्तव्या इति । इत्यं ध्रुवा यदिदाणत यास्त इति तस्य वचनाभावात् । परिक्रीतै:
कर्तव्यत्वादभाननयाप्यप्रापित: । वीतुर्कानत्काल: । परिशेषादग्नीध्र: कर्तव्यता

- -

१- पश्चाद्वेदेर्निधायवेदे स्फ्यं निर्गन्त्वं सान्ध्या संप्रेष्यति प्रोक्षणीरासादये-
ध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि पत्नीं सन्नह्याज्येनोदेहीति ।
२-पृ० दर्शपूर्णमास प्रकाश:, पृ० २६८ ।
३- प्रैषणस्य परार्थत्वादाग्नीध्र एतानि कर्माणि कुर्यात् । अध्वर्युरेव वा कर्तृत्व
प्रैषो परानुशासनात् । आग्नीध्रोऽसमानानाग्नीध्रो कीर्णित्वाविकल्प विशेषा-
भावात् । भारद्वाजस्य आग्नीध्र एतानि कर्माणि कुर्यादित्येकमध्वर्युरित्यपरमिति ।
सूत्रा०(पृ०) दर्शपूर्णमास प्रकाश: ,पृ० २७० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

नामग्रहणादिति , इति सन्दिग्धो चेति चाह, रोपामीत्यत्र बोधित-(वाक्ये) - रित्याश्वलनात् प्रैषेऽनुक्तेऽपि सामर्थ्यात् सन्निहितः करोतीति गम्यते । मुख्यस्ने धारयन्नाहवनीयमनैत्येवमादिना कथ्य नाम गृहीतमिव वचनात् ग्रहणप्रयोजनं प्राङ्मुखस्यागार्वन्नित्यस्थापनार्थम् । बहुपत्नीकस्य सर्वासां प्रयोजनांगीकारात्, प्रातिपदिकार्थस्य विधानत्वात्, प्रकृतित्वाच्च, यत्र प्रातिपदिकार्थस्य प्राधान्यात् सन्नह्यमानत्वस्याविवक्षितत्वादविवक्षितमेकत्वं पत्नीसामान्यं वा विवक्षितमतः बहुपत्नीकस्यापि पत्नीः सन्नह्य[1]त्येव ।

आह च कात्यायनः- वर्षा[2] प्रैषितमन्त्रः करोति पराधिकारात् स्वयं वा अविरोधादिति । आहरन्त्येताः प्रोक्षणीरभिपूर्य वेदिपात्रमथवा तां स्पृश्य उपनिनीय स्फ्य[3]स्य वर्त्मन्यादयति । आहरणं बहुवचनमन्यथार्थं, यद्येक वा नेता उपनिनीयमादाने स्वयं कुर्वे, यद्यादन्यैर्बाधमासादयति आकरणीति दाक्षणी वर्ती, ततः बाहुल्य निरिदाधाः स्वयं गृहीत्वा वर्त्मनि सादयति । सान्नोद्ध एव वा ताः निनीय सादयति(वक्तृराणां) अभिपूर्णं वेदिरासादापत्तिवचनात् उत्तरकार्याधिवचनार्थं च एता इति पूर्वनिष्ठितार्थां वपूर्णा-मादिसाधयतीति ।

- -

१- अनेक पत्नीक प्रयोगेऽप्यन्यतर संस्कारार्थमेकवचनान्तस्य प्रयोगः। पत्नीरित्य बहुत्वयोरपि पत्नीं सन्नह्येत्यविकारः प्रकृतावुद प्रतिषेधात् । न च संप्रैषस्य निवृत्तिः पत्नी प्रातिपदिकार्थ समवायी तद्गुणसंख्याविरोध मात्रेण मन्त्रबाधस्यायुक्तत्वात्। (वृ०दी) द्र० दर्शपूर्णमास प्र० ,पृ०२७० ।

२- यथा प्रैषितमन्त्रः पराधिकारात् । का० श्रौ० सू० २।६-२७-२८ क० भा०।

३- प्रोक्षणीरभिपूर्य एवं स्फ्यमपोह्य वेदिमणीय स्फ्यसंसृष्टा उपनिनीय स्फ्यस्य वर्त्मन्यासादयत्स्वाधस्येति द्विधं मन्त्रा व्याख्यन् ।

द्र० दर्शपूर्णमास प्रकाशः,पृ० २७१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रोक्षण्यासादनविचारः

प्रोक्षणीमासादयन् च स्फ्यस्य वर्त्मन्युपनिनीय सादयेदिति[१] बौधायनः, उपनिनीयेति शालीकिः ।

क्वचित्पुनः[२] स्फ्यं निदधन्ति- यो नाकुला० छिन्दन्नीति , इत्यौ प्रक्षाल्य स्फ्यं प्रक्षालयति । स्फ्योद्वासनकाले द्विषद्ध्यानं कर्तव्यम् । ब्राह्मणम् उत्कृत्यालिङ्गयन्ति मह्या इति गौंकं, स्फ्यमुत्कृष्य यं द्विष्यात् ध्यायेत् तुर्वैनमर्पयतीति ब्राह्मणम् । उपसादयन्त्येतदिध्माबर्हिर्दक्षिणाभि-प्रमुखं बर्हिः ।

उपसादने च प्रोक्षणीनामनिधानार्थं प्रणी तस्य उत्तरमिध्मं तत उत्तरं बर्हिर्दक्षिणाभिप्रमुखं बर्हिरिति शालीकिः ।

१- कृ० बौ० श्रौ० सू० २०१६-२०-२२।८ ।

२-अन्तर्वेद्यादि तामन्वृत्त्यौ द्विषतो वध इति पुरस्तात्प्रत्यङ्मुखं स्फ्यमुद्-स्यति द्वेष्यं मनसा ध्यायन् ।

पुरस्तादुत्करस्य प्रत्यञ्चं प्रत्यङ्मुखस्यति परित्यजति सर्वत्र तूष्णीम् ध्यः। कृ० दर्शपूर्णमास प्रकाशः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

~~अथ षष्ठो ध्यायः~~

अथैताः स्रुचश्च सम्मार्ष्टि दक्षिणेन स्रुवं जुहूमुपभृतं, सव्येन ध्रुवां प्राशित्रहरणं चैत्यपरिवासनानीति । अथेति उत्तरस्य समनन्तरत्वादिप्रदर्शि- (श्रु) रूपप्रावनलक्षिणकामिनुत्वर्मिन्वर्सुरान्नीध्रो वा कौत्सुकनु , सता इति पात्राणां पार्वत्वं दर्शयति सम्यनिधित्तया । दक्षिणानुवाद: दक्षिणस्या- चारत एव प्राप्तत्वात् नार्थक्येऽपि । अथ स्रुवं[१] सम्मार्ष्टि- गोष्ठं(मा)निर्मृजं वाजिनं० मार्ज्मी(ति) । निरस्तस्फिरवोक्षितस्येव पूर्वार्धदर्भकुशाग्रैः संस्पृश्य(संस्पर्श), प्रतितप्योत्सृजत्यति । वाशिष्ठेनायन्तारतोऽग्रैः प्रागपवर्गं सम्मार्ष्टि: अथ: प्रत्यगपवर्गं: पूर्वार्धमधः प्रत्यगग्रस्योपरि प्रागपवर्गं: स्रुवं प्रागग्र- मुखनं मुखोपरतौ चैत्यपरिवासनाग्रैः प्रागपवर्गं त्रि: सम्मार्ष्टि अथस्तथैव प्रत्यगपवर्गं त्रि: सम्मार्ष्टि पूर्वार्धमधः प्रत्यगपवर्गमुपरि प्रागपवर्गं त्रि: सम्मार्ष्टि।। तस्मादुदञ्चो प्रा ञ्च्युदरिष्टाल्लोमानि प्रत्य ञ्चाधस्तादिति ब्राह्मणात् उत्प्र- च्छति उत्पूयान्यस्य करो ददाति ।

अथ जुहूं[२] सम्मार्ष्टि- वाचं प्राणं० वाजिनी० सम्माज्मीति। तथैव कुशाग्रैः संस्पृश्य प्रतितप्योत्सृजत्यति ।

अथोपभृतं सम्मार्ष्टि - चक्षुः श्रोत्रं[३] माज्मीति । तथैव कुशाग्रैः संस्पर्श्य प्रतितप्योत्सृजत्यति ।

अथ ध्रुवां[४] सम्मार्ष्टि- प्रजां योनिं० माज्मीति । तथैव कुशाग्रैः संस्पर्श्य प्रतितप्योत्सृजत्यति ।

अथ प्राशित्रहरणं सम्मार्ष्टि-रूपं वर्णं पशूनां मा निर्मृजं वाजित्वा सपत्नानाशिंमाज्मीति । तथैव कुशाग्रैः संस्पर्श्य प्रतितप्योत्सृजत्यति ।

- -

१- ध्रुवापरिष्ठात्प्रियां ध्रुवाति चैवयवानां इति स्रुच वाचाय प्रत्युष्ट रत:

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदाग्राणि स्रुक्सम्मार्जनान्यद्भिः संस्पृश्य गार्हपत्ये(उ) प्रहरति – दिवः
५ शिल्पं० नाशयामसि स्वाहेति, प्राजापत्य ऋक् । वेदपरिवासनैस्त्विति पंचधावि-
भज्य सूत्रं संमृजेदिति बोधायनः, समस्तैर्वाद्भिरभ्याकारमिति शालीकिः ।
यन्यथा विच्छिन्नैस्त्वयातयामत्वाद वेदस्याग्रमिति समुदाये मूल्यः । नाश्यवेणु
वचनादयातयामत्वम् । प्राशित्रहरणस्य सम्मार्जन इति सूत्रं बोधायनस्य, तूष्णीं
समृजेदिति शालीकिर्मन्त्रेणेवेदित्यपिमन्त्रः । ६ स्रुक् संमार्जनानामनुप्रहरण इति
सूत्रं शालीकेर्नास्मात् बोधायनोऽद्भिरभ्युक्ष्यापरः उपस्येत्युत्करे वेदिपरि-
सन्नतानीति । अनुप्रहरणं सूत्रं गार्हपत्ये प्रहरणं तस्माद्वेतान्यत्यावेव प्रह-
रेदिति वचनात् अद्भिरभ्युक्ष्येति तान्येके कुर्वन्ति प्रास्यन्तीति उत्करे वेदेति
अद्भिर्नार्द्रमित्यपीत्युत्करे न्यस्येदिति । इध्मसन्नहनान्यप्येवं पदार्थमिति वर्धयति ।
प्रहरणमाहवनीये अग्नौ पूर्ववैव प्रहरणादन्यत्र न स्यादाकारः ।
अथाग्रेणोत्करं तृणानि संस्तीर्य तेषु स्रुचः सादयित्वा अध्वर्युः परिक्रम्य पुरस्तात् स्रुच आदाय सादयति ।

अथैतां पत्नीमन्तरेण वेद्युत्करौ प्रपद्य जघनेन दक्षिणेन गार्हपत्यमुदी-
चीमुपावेश्य योक्त्रेण सन्नह्यति – ७ आशासाना सौमनसं० – कामकमिति । इध्मस्तोर्यंन

- -

अथोपांशुयाजोत्तरस्य पुरोडाशस्यापरार्धं विदधन्नाह- अग्नीषोमाभ्यामिति पौर्णमास्यामिन्द्राय वैमृधाय वैन्द्राग्न्यामित्यमावास्यायामान्नदा इन्द्राग्नीति, सन्नयतो महेन्द्रायेति वा, यदि महेन्द्रयाजी भवति, समानोपस्थान: समानाभिमर्शनं । अग्नीषोमीयावदानमाह- अग्नीषोमाभ्यामनुब्रूहीति । पूर्वार्धमुपस्थायाभिमृश्यापरार्धस्यावदाय पूर्वार्धमवद्यति । पञ्चावत्तिन उक्ता: पदा: पूर्वार्धान्मध्यादपरार्धादित्यादि, एवं सर्वत्र पूर्ववदभिघार्य प्रत्यक्रम्य पुरस्तात् स्रुवा जुहोत्याक्रम्याश्राव्य प्रत्याश्राविते चाह- अग्नीषोमौ यजेति, वषट्कृते जुहोति । अग्नीषोमाविष्टमनुमन्त्रयते यजमान- अग्नीषोमयोरहं, अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमिति । वृत्र: पाप्मा, पाप्मानमेव घ्नं तरतीति दर्शनात् । अध्वर्युरुदङ्ङत्याक्रम्योपरिष्टात् स्रुवाहुतिं हुत्वा, अथोपस्तीर्य, वैमृधस्य पुरोडाशस्यापरार्धं विदधन्नाह- इन्द्राय वैमृधायानुब्रूहीति वा। अग्नीषोमीयवदुपस्थायाभिमृश्यावदायाभिघार्य प्रत्यक्रम्य पुरस्तात् स्रुवाहुतिं जुहोत्याक्रम्याश्राव्य प्रत्याश्राविते चाह, इन्द्रं वैमृधं यजेति, वषट् कृते जुहोति । वैमृधं यजेति, वषट् कृते जुहोति । वैमृधमिष्टमनुमन्त्रयते यजमान- इन्द्रस्य वैमृधस्याहं देवयज्ययेन्द्रियाव ता पत्नीवीर्यवान् कामान् भूयासमिति, असपत्नो वीर्यवान् भूयासमिति वा । अध्वर्युरुदङ्ङत्याक्रम्योपरिष्टात् वा स्रुवां जुहोति, इति

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पौर्णमास्याम् । अमावास्यायामाम्नात आग्नेयोऽष्टाकपाँखाभ्यां पूर्ववत् स्रुक्पु-
स्तीर्णेतरस्य पुरोडाशस्यापरार्धप्रवचनात्- इन्द्राग्निभ्यामनुब्रूहीति । उपस्था-
यामिन्द्राग्नीनामीयमवदायाभिधार्य प्रत्यज्य पुरस्तात् स्वाहाकृतिं कृत्वात्या-
क्रम्याश्राव्य प्रत्याश्राविते आह- इन्द्राग्नी यजेति , वषट्कृते जुहोति । इन्द्रा-
ग्निभ्यामिदम् , इन्द्राग्न्योरिदं दैव(व्या)यैन्द्रियायान्नादो भूयासमिति ।
अध्वर्युरुपहूय कृत्वाक्रम्यापरिष्टात् स्वाहाकृतिं जुहोति । सन्नत इन्द्राग्न्योः स्थाने
इन्द्रः महेन्द्रो वा, यदि महेन्द्रयाजी भवति ।

अथोपस्तीर्णेतरस्य (पुरोडाशस्यापरार्धप्रवचनात्) -इन्द्रायानुब्रूही-
ति, महेन्द्रायानुब्रूहीति वा । पुरोडाशमग्नीषोमीयवदुपस्थायाभिमृश्यावदाय,
उपस्थानाभिमर्शनवर्ज्जुषेण शुल्वापरार्धात्, पूर्वार्धाच्चावदायेवन्नोऽवद्यति, यथा
दैवतमभिवर्धति । यजमान परिमाणादभिवृद्धिः। अयमभिधार्य पुरोडाशमन्येन
प्रत्यज्य तूष्णीं ह्यं धीं च प्रत्यनक्ति ।

अथोत्तरस्य पुरोडाशस्यैत्युपक्रम्य सर्वदेवतान्वयणमुपस्थानाभिमर्शनप्रत्य-
ञ्जनानि न सान्नाय्यस्यार्था इति ।

अथापस्तीर्णे जुहः पुरोडाशस्यापवन्नादैन्द्रायानुब्रूहीत्यैन्द्रस्य पुरर्वचनं
सम्प्रदानार्थम् । अवचनेन हि पुरोडाशस्य पूर्वभूतत्वात् सान्नाय्यस्य पृथक्प्रदानं
स्यात् । आग्नेयपुरोडाशविधिवदेवं प्रचरति समानवदाय दोहाभ्यामित्यापस्तम्बः।
अमाविशेषादघ्योरप्यवदानप्रत्यञ्जनानि प्रदेशिन्यमाश्च भवन्तीति गम्यत इति
तद्भाष्यम् । पुरस्तात् स्वाहाकृतिं कृत्वात्याक्रम्याश्राव्य प्रत्याश्राविते आह- इन्द्रं
यजेति महेन्द्रं यजेति वा । वषट्कृते जुहोति , इन्द्रमिष्टमनुमन्त्रयते यजमानः -
इन्द्रायेदम् ।
इन्द्रस्याहं देवयज्ययेन्द्रियावान् भूयासमिति महेन्द्रमिष्टमनुमन्त्रयते ,महेन्द्रस्याहं०

१- दध्नोऽवदाय शृतस्यावद्येत् वा विपरीतं। सर्वाणि द्रव्याणि स्रु०मुखेन जुहोति ।
द० दर्शपूर्णमास प्रकाश: ,पृ०३२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

महेन्द्रस्याहं देवयज्ययान्नादं भूयासमिति महेन्द्रयाजिनः । मध्यपूर्वाद०
उत्क्रम्य उपरिष्टात्स्रुवाहुतिं हुत्वा, व्यतिषक्तं दक्षिणस्य पुरोडाशस्योत्तरा-
र्धादवदायाग्नये स्विष्टकृते जुहोति । अत्र नोपस्तरणाभिघारणे: प्रधान-
यागार्थत्वात् । स्रुचि दक्षिणस्य पुरोडाशस्योत्तरार्धमवद्यति, (कृत्स्नोपस्तरणा-
भिघारौ भवतः प्रधान यागार्थत्वात् स्रुचि दक्षिणस्योत्तरार्धमवद्यति)। स्रुवा-
ज्यात् उत्तरस्योत्तरस्य पुरोडाशस्योत्तरार्धमवदानस्यावदानस्यार्धं स्रुचस्य
स्रुवदण्ड उत्तरार्धपूर्वार्धात्स्विष्टकृतमभिजुहोति, द्विरभिघारयति न प्रत्यनक्ति ।
पञ्चावत्तावदानत्वाभिघारणाहुति, चोभयत्वाभिजुहोतीति बोधायन, पाञ्चावत्ती-
येति शालीकि: । चोभयत्वेति प्रधानहविषां प्रकृतम् । यतः पतौ शान्त्यर्था-
र्धमुखाबाधादिव्यवदानादाभिघारविति । पाञ्चदत्तैत्याभिघारणं जुहोति ।

तथाकल्पारः:-

पञ्चावत्ताने त्ववदोषांश्च द्विरभिघारयति स्विष्टकृतोऽभिघारयति । आवदान-
श्रवणेन हविषामवदानानुज्ञाने । तथा च हविर्भ्यां वा द्विरभिघारयति , द्विरभि-
घारयतीति ।

पार्वणहोमः

अथ स्विष्टकृति स्रुवेण पार्वणौ होमौ जुहोति, व्याख्याता अत्वचनादीनामेव
प्रथमं वाजिनम् । पूर्णमासाय स्वाहेति , पूर्णमासायेत्थं इति पौर्णमास्याम् ।
अमावास्यायैवामा० वाम्याये स्वाहेति अमावास्याया एवं अत्वमावास्यायाम् । न
प्रत्यनक्ति ।

अथ स्रुवेण प्राञ्चुवीति पूर्वणाथौ: अनुज्ञायानिरन्धनत्वाभिघारणकृतिः । अत्र
एव उपहोमानां कालोऽनन्तरं वा प्रधानात् प्राग्वा स्विष्टात् यथेष्ट इति वचनात् ।

- -

१- अग्नये स्विष्टकृतेऽनुब्रूह्यग्निं स्विष्टकृतं यजेति संप्रैषौ । उत्तरार्धं पूर्वार्धे जुहो-
त्यसंसक्ताभिराभिराहुतिभिः ।

(हि०टि०भा० पृ० ९०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गच्छेदुक्तं दर्शपूर्णमासयोः अन्वाहार्यपचनात्स्रुग्वा इति दिशमनावृत्ताग्नेश्च:
दक्षिणं स्वेनाऽन्ततोवस्था वा । पुरस्तात्स्वाहाकृतं कुर्यादाग्न्याधानाय
प्रत्याश्रावित यावदग्निं स्विष्टकृतं करोति , यजमानरूपां उत्तरार्धपूर्वार्धेऽतिक्रम्य च
पूर्वं यादृगीर्युक्तेति । स्विष्टकृदमिष्टं दक्षिणोऽनुग्राहकः – अग्नौ स्विष्टकृते
स्वाहा । अग्नेः स्विष्टकृतो हं देवकथया युक्ताद् यजेन प्रतिष्ठां गमयतीति ।
अध्वर्युर्होतृन्प्रेतगणाकरणीये गुरुत्वापेक्षा संस्रावेणाभिजुहोति पूर्ववत्,
मेदसाप्रज्ञांशुभागार्थं यजमाने दक्षिणायागार्थं च । संस्रवणार्थं तु धार्यते च अग्नौ
प्रतिपादितत्वात् ।अथापिच्छत्वादपरिदेष्टात् पूर्णाहुतिं कुर्या पूर्णाग्नय यानीय
संस्रावान्तः परिधि निदधाति । मेखलानां बध्नः ओषे(ऊँस्वाहा) यज्ञं गच्छतु पि-
त्र्यमानं स्वधा नम इति । अग्नौ वैश्वानरायेति । निर्णयं पूर्वं निदध्यादग्नि:
पूर्वयित्वा बहि:परिधि निदधाति, दर्भं तत्र स्थापयेदिति । अग्नये स्वाहा । अग्नि-
लिङ्गमाज्यं दत्त्वा तत्र पूर्णां समाप्तौ,यथाकालं पूर्वां समापयित्वा ।

प्राशित्रावदानविचार:

प्राशित्रमपि दक्षिणस्य पुरोडाशस्याग्रेयार्धभागार्थं, ज्यायो० दधि-
रिति। प्राशित्रस्यावदान इति सूत्रं बोधायनस्य, परिहरिष्यन्नेव प्राशित्रमपीदिति
वाजेकि:। परिहरिष्यामीति पूर्वं प्राशित्रंपरिहृतोत्सेकात् प्राशित्र्यः।
प्राशित्रावदानं दक्षिणस्येव तस्याभिदानित्येवमनुक्रमात् यथूनस्येत्यवदानाच्च अग्नौ

१- उपस्तीर्यैनामिधारयेत्येकुवा विपरीतम् । अपि वोपस्तृणात्यभिधारयति ।
 द्र० दर्शपूर्णमास प्रकाश:, पृ०३२८-३३१ ।
२- द्र० दर्शपूर्णमास प्रकाश:, पृ०३२७ ।
३-द्र० दर्शपूर्णमास प्रकाश:, पृ०३२७-२८।उत्तरार्धपूर्वार्धे अग्नौ जुहोति ।सू०-४।
४- बौ०श्रौ० सू० १-२४-१५।२०-१३-२०-२४ ।
,, उपस्तृणाद्यत्रैव यजीयं पूर्वं प्राशित्रं परिहरति।द्र० दर्शपूर्णमास प्रकाश:,
 पृ० ३३५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दक्षिणस्य वेदिश्रोण्यां न्येणां तर्वान्तः सर्वेभ्यो यथाभागमिति , अग्नीन्ध्रे च।

उत्तरार्धात्पूर्वार्धाद्यामेकमवदाय प्राशित्रं भवति, यस्मिन्नाधीयते यस्मिन्

तस्मिन्नावापस्थाने च, तत्र स्थाने कस्तो वेदिषु प्राशित्रं यथाभागमनागी

स्विष्टकृदिडावेत्यवदाय प्राशित्रं भवति, तन्त्रं तु प्रधानेषु वर्तते तम् साधा-
रणं प्राशित्राणां प्राशित्रकृताना-परिहरणमवदातव्यमित्यर्थः। प्रत्येक-
मनाय: सोमामावास्यायां तधिविनाशकृधिरित्यर्थः। एवं प्राशित्रादेरीकधैव
तन्त्रयोपकल्पं प्रतिपादितम् । अतः प्रतिपदिस्ववदानमिति सिद्धम् । एवं दक्षि-
णस्य पुरोडाशस्य सर्वेषां वा अविणपूर्वार्धात् प्राशित्रावदानमिति विकल्पः ।
सर्वेभ्योऽवदानमदो सान्नाय्यधर्मविधानं तथा न प्राशित्रं पौर्णमास्यामिति सत्याषाढः।
अमावास्यायामनिर्वापात्। प्राशित्रमन्तो ध्रुवे सिद्धानां किञ्चाग्नी मनुतादिनीति
कल्पकारः । दक्षिणस्यैव पुरोडाशस्य पूर्वार्धात्प्राशित्रमवदानमाङ्गुष्ठपर्वमात्र-
भागानीति युक्तम् । प्राशित्रावदीयमाने यजमानो जपति – अग्नेष्ट्वास्येन प्राश्नामि
[illegible] । अध्वर्युर्यथास्रुवदण्डेनाभिघार्य अग्ने प्रणीता: सावित्र्यानुभि:
ब्रह्मणे संप्रहृत्य निदधाति, ब्रह्मा पूर्वेषु प्रतिपद्यते।

अथ इडां वा अन्यं वेडोपकल्पनं याचति । तावदेव इडापात्रमित्युक्तं तस्मात्तन्त्र-
तत्र सावधेऽपीति केचित् इडाशब्दो पैतान्वयः इडायैभ्यो निर्वपणात् । अत तु
इडा अन्यतोऽस्मिन्निडोपकल्पनं करोति। तन्त्रवैविध्यमस्मिन्नुक्तमेव, यज-
मानभागस्यासा दक्षिणस्य पुरोडाशस्य दक्षिणार्धात्प्रत्यवदधाति । प्रत्य-
ङ्गुष्ठमात्रं भागस्यावदानांशपीता:, न पुरोडाशपीता:। अग्निस्त्विति , पञ्चेडं-
गात् मनुष्यभ्यां कृताभिति तिलोभ्यस्थानानि संभिन्नवदधाति। यदीयन्तो देव्य:
प्रोदीच्यो इत्यवदानानि, स्थानानि संभिन्न यथाभिमानि भवन्ति तथा गृह्णाति।
मध्ये गृहीतो सर्वाभिस्थानानि गृहीतानि भवन्ति ।

अथ न मन्त्र:, दक्षिणार्धेऽविरोधात् , एवं तृतीयं पश्चात्प्राचीन: तिर्यं-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निधास्येत्, दक्षिणस्यैव पुरोडाशस्य पूर्वार्धमवदाय द्व्यङ्गुलं वा चतुरङ्गुलं वा दीर्घं कृत्वाऽन्येन स्रुवान्तरस्थाग्रेण ध्रुवायां यजमानभागं निदधाति यजमानः। यजमानभागेऽवदीयमाने यजमानो जपति [illegible] इति। तथैवावदाय पूर्ववत्कृत्वा यजमानभागसमीपे प्राशित्रं निदधाति पूर्वोपाङ्कमांसवचनात्, सर्वाभ्यो दर्विभ्यां वा यजमानभागप्राशित्रयोरवदानम्। प्राशित्रावदाने किं-चित्स्यात्। ईडावचनात्, दीक्षणीयायां चतुर्धा करणात्, पृथक् प्रतिषेधात्, संकुशी [illegible] यजमानभागप्राशित्रयोरिति वचनाच्च। [illegible] तूष्णीम्। [illegible] पुरोडाशस्य [illegible] पूर्ववत्। [illegible] नित्यत्वाभिप्रायं त्रिः [illegible] त्रिरुक्तः आज्यस्थाल्या अभिधारयति, [illegible] अभिधारणे [illegible] त्रिरभिधा-रणं वेति।

अथ होतुरिडामुपाह्वयति, आज्यस्थाल्याः [illegible] होतुः प्राशित्राऽर्थं पर्वणी अनक्ति। अथ प्रथममध्यमं प्राशित्रयाः पर्वणी उभे अ-नक्तीत्यादि [illegible] प्राशित्राः पर्वणोरिडन्ह्। [illegible] प्राशित्र-त्यादिवचनाच्च। [illegible] [illegible] होतारं प्रेरयितेत्यर्थः। होतावाचस्पतिनेत्यादि करोति।

अथ होत्र इडामाहरति, [illegible] पर्वणोऽनुमन्त्रयेत्[illegible] वर्णवर्णादाशीति प्रतिपद्य [illegible] इत्याह, प्रतिपद्य [illegible] इत्यर्थः। अध्वर्युः [illegible] चतुर्वान्तारेडामवपति। होतुर्हस्ते [illegible] इडाया इत्यर्थः।

- -

१- [illegible] पुरस्तात् [illegible] इडाया होतुर्हस्ते वान्तरेडामवपति। अ-ध्वर्युः प्रथममवान्तरमवपति इत्यं होतारमेतुना विपरीतम्।

CC.O Sampurnanand University Collection. Digitized by eGangotri

ध्रुवान्तरेडाया इति वचनाच्च स्वपिस्तरणाभिधारणे, तेषां उपस्तरणा-
भिधारणे भवत इत्यापस्तम्बः । तेषामिडावदानाभ्यत्वात् । उपस्तृणाति ।
द्विरवधायाभिघारयति[1] । क्वापि फांकसाभिघुदितोंगभवाजभ्यवा ।

अथ होतेडामुपह्वयतेऽन्वारब्धो ध्वर्युश्च यजमानश्च ब्रह्माग्नीध्रः च ।

अथ यत्र होतुरभिजानाति - दैव्या अध्वर्यव उपहूता उपहूता मनुष्या
इति । तद्दक्षिणं पुरोडाशं चार्धं कृत्वा बर्हिषदं[2] करोत्यध्वर्युः यजमानः इति
वृत्तिकृत् । वेदस्तीर्णे बर्हिषि निदधाति । क्व विरोधादन्वारम्भपरित्यागः
सव्येनान्वारभ्य अविच्छिद्य दक्षिणेन चतुर्धाकरणं, सव्येन वा दक्षिणस्या-
न्वारम्भे व्यापृतत्वात् कर्णस्पर्शनविधिविरोधात् सव्येन करणाविरोधः ।

अथ यत्र होतुरभिजानात्युपहूतोऽयं यजमान इति, तर्हि यजमानो ~~होता~~
होतारमीक्षमाणो वायुं मनसा ध्यायेत् । इडाया पैत्रावरुणस्य ध्यायेत् वायु-
र्वर्त्तौ वसिष्ठौडामुपह्वयेति । तर्हि यजमानो होतारमीक्षमाणो वायुं मनसा
ध्यायेन्नाम वत्सपुत्रावत्सुहो तिष्ठतीति उपहूतायामिडायामुपहूतः पशुनामानीति

- -

१- १- द्विरभिधारयेत्यन्वारभिनः । उपहूतानामन्वारम्भो यथा वैकल्पिकत्वात् ।
दैव्या अध्वर्यव उपहूता इत्यभिप्रायोपहूताः पशुनामानीत्यध्वर्युरिति उपहूतोऽयं
यजमानः इत्यादावित्येवं यजमानः।द० दर्शपूर्णमास प्रकाशः, पृ०३३५ ।
२- यजमानेति इदं पुनर्गतामित्यभिप्रायेणैव प्रस्तरे गार्ग्येत्याऽन्ये पुरोडाशं
चतुर्धा कृत्वा बर्हिषदं करोति बर्हिषदं वा कृत्वा चतुर्धा करोति ।

द० दर्शपूर्णमास प्रकाशः, पृ० ३३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यजमानो जपति । प्रत्याशीष्वाद् अध्वर्युरित्यन्ये, आपस्त उपवीतीनिविकृ-
तस्थावमिति । उपहूतः पशुमानसानीत्याह। उपवीती कृत्वो- वीता इडायै
देवानामुपहूयी । उपहूतः पशुमान् भवतीति ब्राह्मणात् ।

स्रुगादायाप्युपहूता ब्रवि,
यष्टा यथाऽध्वर्युरिडामिरी है । इति कल्पकार।

पैष्याध्वर्यव उपहूता इत्यभिशायोपहूतः पशुमानसानीत्यध्वर्युरित्युप-हूतोऽयं यजमान: इत्यभिशायी तस्य मन्त्र यजमान इत्यापस्तम्ब: । उपहूताया-मिडायामग्नीध्र आदधाति, आदधाति, षडवत्तमुपस्तृणात्यादधात्यभिधार्य-त्युपस्तृणात्यादधात्यभिधारयति । आज्यवत्त्वा उपस्तरणाभिधारणे अवा-न्तरेडामित्यवचनात् । उपस्तृणात्यादधात्यभिधारयतीति सकृत्पाठेऽपि पश्चै व्याग्नीध्र आदधाति षडवत्तमभिनिष्क्रमणादवनिमिति , वशिष्ठोऽमिगा व्यवचनात् षडवत्तंपरिहाप्यैनेति गम्यते । तथा वशिष्टं निराददधाति कशान्वो अनिष्ट-मितिवचनं प्रत्यवत्तान्मुपस्तरणाभिधारणे पूर्वमिति न तु मिकृपस्तीर्य त्रिरावर्त त्रिरभिधार्येति (मार्जयन्ते यजमानोऽग्नीध्र: प्राश्नाति) होतावान्तरेडां प्राश्नाति यजमानोऽवान्तरेडां प्राश्यामानमवुर्कृन्ती- वृष्टिरसि गमयेमिति । होतुरिडाया: पंचमभागोऽपि भवति, तस्य तूष्णीं प्राशनम् । तथा इडाया: प्रथमं भागं होता (तु) कृत्वा पूर्ण: इव ,षडवत्तं तदग्नीध्र इति गोपाल: वृधिकृत्य । अध्वर्यु-यजमाना एवं इवमिडाया: पञ्चमं भागं प्राश्नन्ति होतुरन्येषामं(मं)त्रम् प्राशनं-(त)वचनात् उिंतावितेभागमित्यविरोधेन वा प्राशनं पूर्वादाह्वन्मातिवचनात् । स यदि सर्वान्प्राशिष्यन् स्यात्, पाणौ कृतानि प्राश्य तमादेव प्राश्नीयादथ त्रिर्वा ।ा निमिततोत्या पुरोडाशशकलापन्विवश्व(प्राश्नी)प्राश्नीयात् इति होतुर्वचनं प्रवर्त-

- -

९- अग्नीत्पुनरानुरीत्युपमान्ता । १० कातूपत्रियाप्रकाश: , पृ०७३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नाथीमिति । तथा च छन्दोगाः यजमानमन्वारभन्ते अन्वारम्भ भवति(च)

स्यादिष्टानामीस्यां वदति निरष्टुर्लां(पच्यतुर्ला)। यागस्य यजमानोऽन्वारम्भ-
मिच्छन्ति, मनोज्योतिः० बृहस्पतिस्तनुताम्० मादयन्तामिति , वैगानस पानीय ~~सजेन~~
तानि: छिद्रमनुवदतीति केचित् ।कल्पानन्तरोपक यागान्तेन मार्जनमित्यन्ये ।
परिस्तरणशिंजयित्वाधीयाप चावेक्षते, तन्मार्जनमित्यायस्तम्बः:, एवं तूष्णी-
मितरे मार्जन्ते । अन्तरेऽपि पुरस्तात् मार्जन्त इत्यापस्तम्बः: ।

प्राशित्रहरणम्

अध्वर्युः करोति - ब्रह्मणे प्राशित्रं परिहरेति, परिहरन्त्यस्मा एतत्प्रा-
शित्रमन्यो ऽग्रेणाहवनीयम् ।अङ्गुष्ठं परिहर्तुरभिमतम् । तथा चाग्नीध्रः परि-
क्षीरपि परिहरति । तत्प्राशित्रमाह्रियमाणं ब्रह्मा पश्यति - सूर्यस्य त्वा चक्षुषा
प्रतिपश्यामि इति ।

अथैनत्प्रत्यां प्रतिगृह्णाति - देवस्य त्वा० हस्ताभ्यां प्रतिगृह्णा-
मीति । वेद्यां सादयति - पृथिव्यास्त्वा नाभौ सादयामीति ।

अथावेक्षते - सुपर्णस्य त्वा गरुत्मतश्चक्षुषावेक्षे इति ।

अथाङ्गुष्ठेन चानामिकया चोपसंगृह्याशिताशनवत: प्रथमं निगिरति नि-
धाति - अग्नेष्ट्वास्येन प्राश्नामीति । ब्राह्मणस्योदरेण बृहस्पतेर्ब्रह्मणेति मन्त्र
मन्त्री वा इत्याङ्गिरसमिति । आचम्याद्भिः प्राणान् संमृशति - वाङ् म आसन्
ऊर्ध्वं रोप: इति यथालिंगम् । परिष्वायिषा० नाभ्यामिरिति स्पृष्ट्वा नाना-
वीनेन पुन: संमृशति - मयि प्राणा मयि प्राण इति वा । मयि प्राण इति वा
मुखेन नानाप्राणानिमृशति न वाङ्० च यावन्नित्यापिना । निरुक्ति: प्रोन्निय-
मातृस्पर्शाभिप्रायेण ।

अथ यजमानो वर्षिष्ठं पुरोडाशमभिमन्त्रयते - इन्द्रियावन्तस्त्व० यो

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पराणिति । एवं ब्रह्मणः, एवं होतुः, एवमध्वर्योः, एवमग्नीध्रस्य, इति

व्यादिशति, व्यादिश्यानुदिश्यानुदिशं पुरोडाशशकलान् व्यूहेति श्रुतिः । परिप्राशित्रं तन्त्यन्वयो वेदेन ब्रह्मभागमिति सूत्रात् । व्यादेशानन्तरं कपाल-परिहरणात्पूर्वमेवेति गम्यते । अन्ये तु चतुर्धाकरणस्य दक्षिणात्वात् परिहरणं प्राक्तनान्येवेति । कर्मान्ते किं दक्षिणानम्यत्वेनेति प्रस्तुत्य दर्श-पूर्णमासयोरन्वाहार्यश्च(स्व) पुरोडाशस्य च चतुर्धाकरणं विज्ञायते; दक्षिणात्वादेक-भावो यजमानस्य भक्षणमपि भवतीति, यथापि यजमानः तस्मिन्नीश्वरः पाकयज्ञत्व-न्यायो दक्षिणानीयं यजमानापि दक्षिणं पुरोडाशं चतुर्धा कृत्वा परिवेषयं करोतीति, एवमुपांशुदक्षिणात्वम् । तस्मिन्नतो वैश्वदेवत्वादि वाचिन्नमिति चतुर्धाकरणप्रतिषेधः दक्षिणानिषेधस्य नित्योऽन्वाहार्य इति वचनान्यथा चतुर्धा-करणं वैश्वकर्तव्यतार्थं दक्षिणान्तरेण निवृत्तानिवृत्तं च नित्योऽन्वाहार्य इति । कौषीतकं च यदन्वाहार्यमाहरत्येतद्दक्षिणौ दर्शपूर्णमासाविति । अथाग्नीध्र भागयति, सकृदं सकृदुपस्तीर्य द्विरवद्यत्युपस्तीर्य द्विरभिघारयतीति ब्राह्मणात् । आग्नीध्रभागं द्वेधा कृत्वा सकृदुपर्यंके(क) भागमादाय पुनरुपस्तीर्याभिघार्य-द्विरभिघारयति (इति) गोपालस्य । अपृष्ट्वा ब्रह्मेति ताम्यक्रीडिते ब्रह्मणे व्यादि-निरभिमुख्य यथाभागमग्नीध्रे प्रयच्छन्: उपस्तीर्य द्विधा भागं कृत्वा तस्मिन्नादधात् । उपस्तीर्याभिघार्य ततो द्विरभिघारयेत्, एतदग्नीध एव वेदेन ब्रह्मणो हरेत् होत्रे चाध्वर्यवे चान्ये प्राशित्रं[2] ब्रह्मणोऽस्य इति । वेदेन ब्रह्मणे[3] ब्रह्मभागं परिहरति । वाक्ये ब्रह्मभागं प्राशित्रहरणे निदधाति, वेदेनान्येन पात्रेण[4] होतेऽध्वर्यवे च ददाति ।

अन्वाहार्यासनम्

अथ अन्वाहार्यं ददाति । यावतीदेनं चतुर्णामृत्विजां तृप्तिस्तावद-न्वाहार्यमपरिमितमोदनमन्वाहार्यपचने श्रपयन्ति, परिवेषणि, कपालान्तं ददाति ।

- -

१- दक्षिणाग्नावन्वाहार्यं महान्तमपरिमितमोदनं पचति । प्र० प० पू० प्र०, पृ०३३६ ।

२-वेदेन ब्रह्मभागमाग्नीं परिहरति ।

३- पृष्ठ पात्रान्वाभिमर्शयो: । प्र० दर्शपूर्णमास प्रकरण: , पृ०३३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यदन्वाहार्यपचनेऽन्वाहार्यं पचतीति श्रुतिः, यो यज्ञस्य छिद्रं यदुपलिप्तं तदन्वाहार्येणान्वाहरति, तदन्वाहार्यस्यान्वाहार्यत्वमिति च ब्राह्मणादन्वाहार्योऽन्वाहार्यशब्दः। अपरिमितो निरुप्योऽपरिमितः प्रजापतिरिति वचनादपरिमितः अपरितथः। दक्षिणाग्नावन्वाहार्यं पक्वान्तमपरिमितमोदनं पचति, दक्षिणतो भवतीत्येके, तमभिघार्यानभिघार्यं वोद्वास्येत्यापस्तम्बः। तमभिघार्यानभिघार्य चोद्वास्य दक्षिणतस्त्यां वेदिश्रोण्यामासादयति, अन्वाहार्यस्य सादन इति। कर्केण [1]यजमानं च ब्रह्माणं च [2]पर्याहृत्य दक्षिणस्यां श्रोण्यामासादयेदिति बौधायनोऽत एव दक्षिणस्यां श्रोण्यामिति शालीकिः। ब्रह्मन्नर्षेयं तन्मनाक्षार्यमभिमन्त्रयते- ब्रह्मन् ब्रह्मासि, नमस्ते ब्रह्मन्, ब्रह्मणो पाणिभ्यां हुताय सर्वां नम इयं कुरु भवेति।

अथास्य याज्ञन्वाहार्याय प्राशित्रकर्ण निधाति- औरस्योदनाम स्रुवन्वानन्नादो भूयासमिति यजमानम्। अरन्यान्निरस्यः। यजमानस्तमन्वाहार्यमनुमन्त्रयते - प्रजापतेर्भागो०ऽसि ऊर्जस्वांल्लोके इति ब्राह्मणाः अर्धं च चक्रिनो यजमानं प्रतिगृह्णीध्वमित्यृत्विग्भ्यो ददाति, ते च उपावहत्योपान्य ब्रहिष्ठं वायु नाभिकाम्यां उपावहत्योऽन्वारभ्य देवस्यत्वा० इत्यादिना प्रतिगृह्णाति, रायस्त्वा वरुणो नयतु देवि दक्षिणे ब्रह्मणे ओदनं तेनामृतत्वमश्यां० प्रतिगृह्णात्विति प्रतिगृह्णन्ति। अत्र मन्त्रप्रतिग्रहो नैको ब्राह्मणे स्पष्टोपि इति ब्रह्मतां ब्राह्मणेनेति परिभाषितत्वात्। अत्र केचित्, देवा वै वरुणमयाजयन्, स यस्यै देवतायै दक्षिणामनयत्, तस्माद्विब्रुर्लोके माध्यन्दिने सवने दक्षिणा नीयन्त इति सर्वे दक्षिणानयनवचनात् सर्व एव प्रतिगृह्णन्ति इति। नान्यको देवतासम्बन्धाभावादोदनब्राह्मणाच्च विभागो परकाले प्रत्येकमनन्वयिमयी बीभत्सायां नाशात्। स्यति: वानार्थः आम्नायात्, तस्माद्विशेषेण मन्त्रः देवा वै वरुणमयाजयन्निति ददातिमन्त्रावृत्तौ तिथौ वितैकाग्निशब्दाविग् नास्ति सः, तस्मादेवांगदक्षिणा-

- -

१- द्र० बौ० श्रौ० सू० १-२७-१६-१३।२०-१३-२०-१४।

२- द्र० बौ० श्रौ० सू० २०-१३।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्राणायामि नास्ति मन्त्रः। उपासद्यायोरन्वारम्भः[1] । केण सुवह स्त्रुच-
त्राचयेमिति बोधायनः, अनेन स्रुव उपयामिति आत्रेयः। स्त्रुवास्यानं
प्रजानुमन्त्री- यतीयिषं रोचु० चौन्धिति उपासद्यकेदानिकद्वियम्। कूर्मे
सुव उपयामित्यात्मन्वारम्भः ।

अथ सम्प्रैषमाह- यजु प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्त्सकृत्
सकृत् संमृड्ढीति । क्वापि अग्नीदग्नीन् अग्नीत् परिधींश्चाग्नि(?) चेति
विकल्पः पूर्वोक्तः , युक्तन्यायत्वात् विकल्पः पूर्वोक्तः, युक्तन्यायत्वात्
समिधमाधाय संमृड्ढीत्यपि इत्येवं समिधमाधाय प्रस्थास्याम इति सम्बन्धः ।
समिधाधानोत्तरकालमर्थेन आग्नीध्र इत्यारम्भात् । यत एव समिदाधानानन्तर्यं,
वचननिर्देशो परिच्छिन्नकालत्वात् कालपरः। प्रतिष्ठेति प्राय एककर्मत्वात् । तत्
प्रतिष्ठितेव सवितारेतत्ते प्रा० बृहस्पतिर्ब्रह्मा। यज्ञं पाहि स यज्ञपतिं पाहि
मां पाहीति जपित्वा ओं प्रतिष्ठ, इत्यनुज्ञां ब्रह्मानुजानाति । अध्वर्युः प्रस्थाऽस्थितां
समिधं मध्यम आहवनीयस्याभ्याधाति । तामिति पूर्वपरिधिनिरूपितामनुज्ञाप्य-
मिधमित्यमध्ये । तूष्णीमभ्याधाति मन्त्रानुपदेशात् ।

अथैन आग्नीध्रो स्फ्यस्येध्मसन्नहनैः परिधीन्त्संमार्ष्टि[2], सकृत् सकृत्
सकृद्दक्षिणार्धं सकृदुत्तरार्धं सकृदाहवनीयमुपवाजयति अग्ने वाजजिद्वाजं त्वा ससृवांसं
वाजं जिगिवांसं ध्यायेति । क्वापि विकल्पः पूर्ववत् ।

अथैतानि ध्मसन्नहनान्यद्भिः (अ्भि:) संस्पर्श्याहवनीयेऽनु प्रहरति -

यो भूतानामधिपतिः० इत्यनु प्रहरतीति । भूतानामधिपतये रुद्राय तं(ति)चराय

- -

१-अन्वारम्भस्योपासन इति । द्र० बौ० श्रौ०सू०१-१७-१८-२०।१३-२०-१४ ।
२- पूर्ववत्परिधीन्त्सकृत्सकृत्संमृज्याग्ने वाजजिद्वाजं त्वा ससृवांसं वाजं जिगिवांसं
वा जिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादमन्नाद्यायेति सकृदग्निं
प्राञ्चम् । द्र० दर्शपूर्णमास प्रकाशः, पृ०३४१-४२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वृष्ण स्वतु । न ह्युत्तमान्नियमं धर्मिमन्मान्नम् । प्रकारं चाग्नीध्र एव , चन तिर्यं यतो सपुत्वदुत्तमपूर्वोत्त्वधाय्यर्थु: पुणयार्थं, यो ऽध्वर्युरत्वात् । इतरथा पान्तत्वान्यनुप्रवृत्त्यारम्भेत्का तद्वामस्यावपानुमूर्ते । अध्वर्यु: च सुत्रायावायात्याध्यायाय प्रत्येक वाह- देवान् यजेति वषट्कर्ता जुहोति ।

अनुयाजविचार:

यज यजेति मैत्रावरुणप्रेषितो ऽनुयाजान् यजति, प्राचां तत: संनिनदित; देवान् यजेति । सर्वविषयं वचनं,; न भिन्नविषयं, ततश्चोदयोर्धयोर्व- र्हिरादयो प्रयोजनमपरिहार्यमनुयाजानामित्यत एवो यजेति भिन्नविषयत्वे देवा- भिधेयं भवितव्यम् । सर्वविषयत्वमेवात्र युक्तं , कर्मान्तरस्याश्रवणात् प्रत्यासत्तिं च निश्चित्य, प्राचां तत इति संनिपत्योपपन्नम् ।

एवमाचार्यमतानां प्रत्याभाषितं यजेति त्रिभिरनुयाजैः वषट् करोति च सोमः, प्रभृति इति वचनात् । पूर्वार्धे प्रथमं , मध्ये द्वितीयं , पश्चार्धे तृतीयं, पूर्वानुप्राचां तत आहुत्यर्थत्वाद् अनुगमित्वात् (पो)ते अनुमन्त्रयति । आपस्तम्बः , पूर्वार्धे प्रथमं समिधं जुहोति, मध्ये द्वितीयं , (प्रा अवमतासंस्थेन) प्राक्स्थाने संस्थापयन्निति: एवमुत्तरमिति । अनुयाजानां होम इति सूत्रं बौधायन- स्य, क्रोधोत्तरेण आहुति: संस्थाप्येतिति शालीकि: । न प्राचां तत: सम्यक् शालीकि: । कर्मणि किं देवत्या उ तदनुयाजा भवन्तीत्यादिन्यथा इत्येव ब्राह्मा- णिवाक्ये- तं देवा आहुतीभिरनुयाजेष्वन्वविन्दन्, यदनुयाजान् यजत्यग्निमेव तत्समिन्ध इति, यतो ऽग्निरनुयाजदेवता, बर्हिषोऽहं देवयज्ययेति बर्हिषिवत् इत्याम्नानात्तु बर्हिरादायोनात (दा) देवाय बर्हिषे स्वं , देवाय नराशं- साय स्वं, देवायाग्नये स्विष्टकृते स्वमिति त्यागः । यजमानः अनुयाजानामिष्टानि मिष्टमनुमन्त्रयते - बर्हिषोऽहं देवा:० यज्ञ , नराशंसं० वसु । स्विष्टकृ०

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गमयामीति यजमानः । पश्चार्द्धेन परीत्य प्रत्यङ्ङ्याऽऽहवनीये स्रुचौ सादयित्वा[1] वाजवतीभ्यां स्रुचौ व्यूहति । अग्नं वाजवत्यौ व्यूहनमिति कल्पान्ते व्यवाय- मानत्व् वद व्यूहति- वाज(या)स्य मा० जुहूमिति[2] दक्षिणेन जुहूमुद्गृह्णा-ति उपभृति[3] ।

व्यायपत्न्या इन्द्रो मे० करोति सव्येनोपभृतं नियच्छति । ततः प्रे- षति , उत्प्रायं च० ऋग्य इति प्राचीं जुहूमति । प्राक् विलापवदिलाप्या- वंताद् ।

व्यायपत्न्याग्नीन्द्राग्नी० व्यक्तावानिति० प्राचीं जुहूमग्रं व्यूहति। उपभृत: प्रत्यञ्चं प्रत्यग्विलावदामिति + भाष्यम्। व्याप्यावं प्राक् प्रत्यक् विरुद्धार्थं, वाजवत्यौ व्यूहनमिति भूमिष्ठम् । कल्पान्तरेऽपि पन्थ: वाजवत्यौ व्यूहन इति । तत्त्वान्तरे पौर्णमास्यांऽत्यया प्राचीं जुहूं प्रत्युपे- क्षितवेनां संस्पृशतिवत्कल्पान्तर ताबिदि: प्राचीमुकूदे स्यैने विकर्षन्न वषि- न्नाशक्नि: संस्पृशेति । प्राच्यां परिधीनर्दित- यावृज्यत्वेति पश्चात्, रुद्रेन्द्रत्वेति दक्षिणमावित्येन्द्रत्वेत्युत्तरं, चाप्यावृज्यत्वेनाविपासंवात् परिधीनावृत्य नसन्ना । स्वाहेत्याग: । रुद्रेन्द्रत्वेत्यत् वामामुत्तरां रुद्रानुकरात् । प्राकृत्यवत्यावात् वहुवचनाच्च रुद्राग्नन्नानिवापीति केचित् । प्राच्यां जुहूत्यर्था:, जुह्वाग्नौ प्रणासीनं प्रेत्येति भाव: ।

- -

१- प्रत्याङ्ङ्याऽऽहवनीये स्रुचौ सादयित्वा वाजवतीभ्यां व्यूहति ।

२- वाजस्य मा प्रसवेनेति दक्षिणेन हस्तेनाने जुहूमुदृह्णाति प्रर्सपन्न मिदं सपत्नानिति सव्येनोपभृतं नियच्छति ।

३- उत्प्रायं चेति जुहूमुच्छति निग्राभं चेत्युपभृतं नियच्छति ।

दृ०(दर्श) दर्शपूर्णमास प्रकाश:, पृ०३५४-३५५ ।

४- प्रतीचा व्यापृज्यन्निति प्राचीं जुहूं प्रोक्षति ॥

दृ० दर्शपूर्णमास प्रकाश: पृ० ३५५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पयोषिकुलानक्रिः ₁संस्पर्शं ष्यायानं ध्रुवीं सादयित्वा ध्रुवा प्रस्त-
रमोक्ति, उक्तं रिहाणा इति जुह्वामग्राणीति अंजु वियं इत्युपभृति मध्यानि
ध्रुवां वीतिं मान्युलानिति ध्रुवाया मूलानि । प्रस्तरस्य वर्त्मन इति विधि-
रेकं वर्त्मन्याधिति बधायन्स्तरात्मलदिति शालीकिः ।

अथ प्रस्तरस्तृणं प्रक्षिप्य जुह्वामवधाति । प्रक्षि च जुह्वा जुहवद्व,
जुह्वामवधानं प्रस्तरस्य न तृणस्य । कृतस्य तृणमपादाय प्राग्न[2] निधायेत्या-
पस्तम्बः । दक्षिणोत्तराभ्यां पाणिभ्यां गृह्णातीति च ।

अथ आश्रावयति- ओं श्रावयास्तु श्रौषट् इत्यन्ताम्नायेत्यादि० सुत्वा वदेति
संप्रेष्यतीति शेषः । तिष्ठन्नाश्रावयेदिति कात्यायनवचनमत्यन्तिष्ठता प्रति-
स्थो पि वाचीन स्वाध्यायनादि करोति, ध्रुवा यावन्तमनादीनि प्रस्तरधा-
रणं गच्छन् इति, तथा वाचीन शाल कत्यान्तरेषु समस्तं यत सौत्रामि-
णनास्यभिनिर्दर्शं उपदिशतीति, तदध्यानामुपस्थानमित्युक्तमुत्पत्तौ[3] वर्तु-
माणिति बोध्यम् । यथेष्टनिष्कृतिर्वार्त्यः । अथ सूक्तवाकेन प्रस्तरं प्रहरतीति
वाक्यविधिः वाच्यवाच्यानीयः सूक्तवाकः प्रस्तरो प्रवर्गिषिमिते, यो देवता

- -

१-अक्तं रिहाणा इति जुह्वामग्रं प्रयां वाभिरित्युपभृति मध्यम् ।आप्यायन्तामाप
ओषधय इति ध्रुवायां मूलम् । सं० मि०। द्र० दर्शपूर्णमास प्रकाशः ,पृ०३४७ ।
२- वायुर्वेत्येतस्य तृणमपादाय प्राग्नं निधाय दक्षिणोत्तराभ्यां पाणिभ्यां
प्रस्तरं गृहीत्वा जुह्वां प्रतिष्ठाप्याश्रीनामायामु प्रत्याश्राविते संप्रेष्यो-न्विता-
त्या होतारो वाच्यावा प्रेषितो मानुगः सूक्तवाकाय सूक्ता ब्रूहीति ।
द्र० दर्शपूर्णमास प्रकाशः ।
३-अनुख्याने सूक्तवाके प्रहृतां पुनरत्यः स्यादिति तत्कालता प्रस्तरमाप्यानीये प्रहरति।
द्र० दर्शपूर्णमास प्रकाशः पृ०३४७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रकृति समर्थ्य इति, अन्ये तु पूर्णाहुत्यार्थंप्रस्तरप्रतिपत्तिकप्रकरणस्य सूक्तवाक-कालत्वाभावान्न: इष्ट्याग्न्याधानसमीपे तदभिधेयत्वमस्तु । अग्न्यादिदेवतासं-कीर्तनं च प्रधानयागदेवताभिधानार्थमिति । अथ सूक्तवाकमानं वाचयति - अग्नेरह-मुज्जितिमनूज्जेषं, सोमस्या० वं, अग्नेरहं० वं, प्रजापते·· वं, विष्णोरह·· वं, अग्नीषोमयोरहं० वं०, इन्द्रस्य वैमृधस्याहं० वम्, इति पौर्णमास्याम् । अमावास्यायामुपांशुयाजदेवता-न्तरं इन्द्राग्न्योरहं० मित्यमावास्यायामित्याम्नात: इन्द्राग्नीस्थाने इन्द्रस्या-हं० वमिति, सन्नयतो इन्द्रस्थाने महेन्द्रस्या वमिति वा यदि महेन्द्रयाजी भवति ।

अथ साधारणम्-

देवानामाज्यपानामवृधेथं, अग्नेः स्विष्टकृतोऽहमुज्जितिमनूज्जेषमिति यागपदौ सर्वत्रोपदेशत्वाग्नौ केचिदिच्छन्ति ।

अथ यत्र होतुरभिज्ञानात्प्रस्तरं यं यजमानो हाभिति तद्यजमानं प्रस्तरं वाचयति- एषा वसु० मिमामिति प्रोक्षिते यजमाने वाचनादध्वर्युर्दिद् सूक्तवा-कान्ते प्रकरणमिति भाष्यम् । तमुपरीव प्रा न्वं प्रहरति । नात्यग्रं प्रहरति न पुरस्तात्प्र(त्य) स्यति न प्रविधूनोति न विष्वञ्चं वियौत्यूर्ध्वं धुनोति, प्रा-च्यावन्तामप ओषधयो मरुतां० मेथ्येति । यथा सूक्तवाकान्ते मन्त्रान्ते च प्रस्तर-प्रहरणं भवति तथा प्रस्तरप्रहरणं करोति मन्त्रमपि तथा पठेत् । यत्र मन्त्रान्ते स्वाहाकार: प्रस्तावार्थो होमरूपत्वात् जातवेदो वपयेति वपायां प्रतिनिधाय होम-यतीति । अन्ये तु यत्र जुहोति चोदनाभावान्न तथेति । न स्वाहाकरोतीत्यापस्तम्ब: ।

अथ शाखया प्रस्तरं आहवनीये प्रहरतीत्यापस्तम्ब: परिधींश्च प्रहरत्यापीह शाखया एव प्रहरणम् , तथा एव प्रहरणविधानात् । तमुपरीव बर्हिरूर्णम्

- -

१- द० दर्शपूर्णमास प्रकाश: , पृ० ३४८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ग्रीवं प्रागग्रं नात्यग्रं नातीदार्ढ्यं नाग्रादारभ्यैव न पुरस्तात् प्रत्यस्यति प्रागायतनं प्रकर्षति । न प्रतिमृष्टोति[1] प्रस्तरेण गार्हपत्यं स्पृशति न विश्वञ्चं वियौति प्रस्तरं तिर्यञ्चं नात्यस्यति ऊर्ध्वं युयौति उद्गमयति बाहुभ्यामुद्गच्छतीत्यर्थः प्रस्तरं प्रहरिष्यन्तं यजमानोऽनुमन्त्रयते - रोहितेन त्वा० गमय, स्वाहा० गमयत्विति । अध्वर्युराग्नीध्रमीरयते - अग्नीत इति । तथाऽऽग्नीध्रः - संवदस्वेति । संवाद एव- मत्यनुसन्धः, तदेवाह। अगानग्नी इत्याऽध्वर्युः, अगन्नित्याऽऽग्नीध्रः। श्रावय इत्याऽध्वर्युः, श्रौषडित्याग्नीध्रः । प्रस्तरादपादं तृणं प्रगृह्य - इदं धुनीत्या- ऽध्वर्युः, धनुर्धर्त्याऽऽग्नीध्रः । अध्वर्युः प्रस्तरादपात्तं तृणमाग्नीध्रोऽनुप्र- त्याह - स्वगा दैव्या होतृभ्य० वो धूरिति । सोऽत्रागात्यधीपीत्याग्नीध्रोऽनुप- तिष्ठते - वायुभ्यो० मैत्रावरुणीति ।

यथेमानभिमृशति धुवासीति इमामिति, पृथिवीमित्यर्थः । अपि शी- र्णितस्यैकवचनलिङ्गस्य पृथिवीवाचकत्वदर्शनात् । सा च वैदिका दक्षिणा जातत्वात्, धुवासीत्यन्त्येऽपि पृथिवीमभिमृशतीत्यापस्तम्बः । मध्यमं परिधिमनुप्रहरत्याग्नीध्रे- धे यं परिधिं[2] पर्यधत्त इति । यथेतरावनुप्रहरति - स्वाहापाथ० समिधामिति । इतरौ परिधी मध्यमपरिधिसंस्पृष्टौ प्रहरतीत्यर्थः । सस्रवणं समिधामिति लिङ्गेन लिङ्गात् ।

परिधेरभिधानविचार:

परिधिनाभ्याधान इति सूत्रं बौधायनस्य, प्रस्थाने यजमानस्यावस्था- नमिति आत्रेयिः। सूत्रं मध्यमस्यापरीतरौ प्रस्थाने वा स्थिताः यस्मिन्स्थाने तत्प्रस्थानं प्रसिद्धं स्थानं यथास्थानमिति यावत् । मध्यमं मध्ये दक्षिणं दक्षिणतः

- -

१- द० दर्शपूर्णमास प्रकाशः, पृ० ३४८ ।

२- यं परिधिं पर्यधत्था इति मध्यमं यजस्याय उपाधिकाति इतरौ ।
द०दर्शपूर्णमास प्रकाशः, पृ०३५२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उदग्मुखत: इति ।परिधीनुपविमुच्यमान यजमानोऽनुमन्त्रयते- विवे मुंचामि० देवता-स्यामिति । संस्रावमुत्तममनुमन्त्रयते- विष्णो: स्थां:० गमेयमिति । अध्वर्यु: उप-तान् परिधीन् संस्रावेणाभिघारयति , जुह्वामौपभृतं स्रावयति- संस्रावभागस्थे मायव्यं स्वाहेति, वसुभ्यो रुद्रेभ्य: आदित्येभ्य संस्रावभागेभ्य इदं । संस्राव जुह्वन्तो: परिशिष्टमाज्यशेष: तं तं जुह्वामौपभृतसंस्रावं जुह्वाभिर्जुहोतीत्यर्थ:।

कर्तेनाद् संस्रावेणाभि जुहोतीति सूत्रं बौधायनस्य, प्रस्तरं चैव परिधींश्चा-भिजुहुयादिति शालीकि:।

अथ प्रदक्षिणमावृत्य प्रत्यगावृत्य धुरियुगौ विमुञ्चति यज्ञोपयज्ञ० पातमिति । धुरि युगौ वहनीये इत्यर्थ: । यजमानाभिमुखोत्करं एते स्फ्ये विमुञ्चति । उत्कर उपनाद्ये स्फ्यं निधाय तस्योपरि जुहूमुखी सादयति यजमानपत्नी सादयतीति संप्रदाय:।

पत्नीसंयाजविचार:

अथाहवे दक्षिणेनाज्यस्थालीं स्त्रुवां सव्येन जुहूं सोमे वेदं सव्येन जुहूं सोमे वेदं प्रदाय प्रदक्षिणमावृत्य प्रत्यंचावावृत्य दक्षिणेनाध्वर्युर्गार्हपत्यं परिक्रम्योत्तरेण होता तौ जघनेन गार्हपत्यं पश्चात्प्रांचावुपविशतो दक्षिण एवाध्वर्युरुत्तरो होता, होतैवं प्रत्यावृत्य इत्याधिक्योऽन्वय:। नैवं गार्हपत्यं चान्तरा दक्षिणेनाध्वर्युरुत्तरेण होता, तौ जघनेन गार्हपत्यं पश्चादिति कोणनिर्गतौ प्रांचौ प्राङ्मुखौ सर्वे पत्न्या उत्तरत उपविशन्ति , दक्षिणत एव पत्नी। पत्नीसंयाजेष्वृत्विजां परिक्रमण इति सूत्रं बौधायनस्य, सर्वे एवोत्तरेण गार्हपत्यं

१- आज्येन सोमं त्वष्टारं विष्णुवा जामन्या पत्नी: संयाजान्याजरुत्य वा यथा गृहीतेन । दर्शपूर्णमास प्रकाश:, पृ०३५५-५६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

परिक्रामेयुरिति शाठीकिः। स एव बहुवचनादाग्नीध्रोऽप्युत्तरेणापरिक्रम्य
होतुरुत्तरत उपविशति, स्फ्यहस्तः प्रत्याश्रावयतीति केचित्, तूष्णीमेके
स्फ्यस्यापि निधानं इति तन्मतात्। तूष्णींभूतस्यैः पुनः प्रयोगात् स्फ्-
यस्यापि पुनः प्रयोगेन विरोध इति कृतम्। दक्षिणतोऽवस्थितश्च आग्नीध्रो
मध्ये होतेत्यापस्तम्बः।

१

अथाध्वर्युर्वेदमुपस्तीर्णं कृत्वा, उपस्तीर्य कृत्वा च चतुर आज्यस्य गृहीत्वा
आह, सोमायेत्युपांश्वनुब्रूहीत्युच्चैराश्रावयति। सोममित्युपांशु, यजेत्युच्चैर्वषट्-
कृते जुहोति, उच्चैरिति मन्त्रः उपांशुत्वात्, चतुरस्त्वाज्यस्य गृहीत्वा त्व-
ष्टारं इति उपांश्वनुब्रूहीत्युच्चैः, आश्राव्य त्वष्टारमित्युपांशु यजेत्युच्चैः।
वषट्कृते जुहोति चतुर आज्यस्य गृहीत्वा आह देवानां पत्नीभ्य इत्युपांश्वनु-
ब्रूहीत्युच्चैः, आश्राव्य देवानां पत्नीरित्युपांशु यजेत्युच्चैः, वषट्कृते परि-
धौ देवानां पत्नीर्यजति[2]। चतुर आज्यस्य गृहीत्वा च आह- अग्नये गृहपतये
इत्युपांश्वनुब्रूहीत्युच्चैः, आश्राव्य अग्निं गृहपतिमित्युपांशु यजेत्युच्चैर्वषट्कृते
उत्तरार्धपूर्वार्धेऽतिहाय पूर्वार्धेऽतिहाय पूर्वां प्राक्तीर्जुहोति आपस्तम्बः, सर्वत्र प्रत्या-
श्रावयति। अग्नौ यथा उपांशुकर्माणि भवन्ति। यजमानस्याधेयं पुनराधेयं निरु-
क्तो [illegible] प्रायणीयातिथ्योपसदः प्रवर्ग्याकः पत्नीसंयाजाः [illegible]
उदयनीयविकारणीयाविति, प्रणयनीयं त्वाष्ट्रीयपुरोडाशिण्याष्टापदी गर्भ
इति [illegible] भवन्तीति। चिति प्रणयनीयं महाग्निचितावग्निप्रणयने-
प्रतिरयं [illegible] होतान्वाहेत्युक्तं, [illegible] लोभावयः तेषां यथा तथा
भवन्ति तदनुरोधेन दीर्घाश्चापिस्वरा भवन्तीत्यर्थः। स्वरविरोधे सति सर्वत्रा-
विधिः छन्दोगादिविधिषु स्वरोऽन्यतम एक एवानुवर्तव्य इतिभावः। पत्नीनां
संयाजन इति सूत्रं बौधायनस्य, ग्रीवाज्येनैक पत्नीः संयाजयेदिति शाठीकिः। सूत्र-
मिति उपांश्वेव। करणाददृश्यं मनः प्रयोगमुपांशु। यदारभ्य न्यूनानामनुकल्पि-

---

१- वेदमुपस्तीर्णं कृत्वा जुह्वा स्रुवेण चेत्येके।

द्र० दर्शपूर्णमास प्रकाशः पृ०-३५५।

२- पत्नीसंयाजाख्यं कर्म च सर्वमुपांशु भवति। उपांशुरन्ति, यदुग्रा सर्वे सर्वेषु।

द्र० का० श्री सू०३-७-५-६।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ध्वनिः। अन्तर्धाय देवानां पत्नीः कुर्वीतेति बौधायनो नान्तर्धायेति शालीकिः।
अन्तर्धायेति कौथुमः प्रच्छन्नमेवमिति । इतरे भोजनेनापि स्विदम् ।

पत्नीसंयाजानुमन्त्रणम् ।

यजमानः पत्नीसंयाजानामिष्टमिष्टमनुमन्त्रयते । तत्र सोममिष्टमनुमन्त्रयते- सोमस्याहं देव० भिषजीयेति । त्वष्टारमिष्टमनुमन्त्रयते- त्वष्टु रहं० त्वष्टुरहं देव० पुष्येयमिति । देवानां पत्नीरन्य इष्टम् । अग्ने गृहपतय इदं० । पत्नीराजानुमन्त्रयति । उपक्रमस्यानुमन्त्रणं तत्त्वर्थः । देवानां पत्नीरग्निः गृहपतिरिति । अमान्ति चर्चं इके राकां च सिनीवालीं च पत्नीसोमं यजतारिष्टी च सौम्यौ पुरस्तात् गृहपतेरुपयजतीति भाष्यं च, इत्यादि कुहूं चानुमतिं च वषट्कारप्रधानानिज्यतोऽपि । अन्ये जुहुयात् एव, न च कुहूं राकायै स्वाहा, सिनीवाल्यै स्वाहेति ।

अथ केचि इति वचनादनित्या राकाद्याः कल्पान्तरात्वत्वार एव नित्याः, अन्येतु जुहुयात् एव, राकादीनां न जुहूतिरपि । राकादीनां यागपक्षे पूर्ववत् आज्येन यागः स्थालीपाकेन चतुर आज्यस्य गृहीत्वा याज- राकायै० इत्युपांशु अनुब्रूहीत्युक्त्वा: । आश्राव्य प्रत्याश्राविते आह- राकामित्युपांशु यजेत्युक्त्वा:, वषट्कृते जुहोति - राकाया इदं, चतुर आज्यस्य गृहीत्वाह- सिनीवाल्यै(इ)त्युपांशु अनुब्रूहीत्युक्त्वा:, आश्राव्य प्रत्याश्राविते आह- सिनीवालीमित्युपांशु यजेत्युक्त्वा:, वषट्कृते जुहोति- सिनीवाल्या इदं । चतुर आज्यस्य गृहीत्वाह- कुह्वै इत्युपांशु आश्राव्यप्रत्याश्राविते आह - कुहूमित्युपांशु यजेत्युक्त्वा:, वषट्कृते जुहोति कुह्वा इदम्० । आसामपि दधिरहोत्यनुमन्त्रणम् , उपांशुयाजविकारत्वात् । तत्स्थाने जुहुयात् :- सपत्नीपत्न्या० मारभतां स्वाहा, चित्तिज्योतिषे अहराय परमात्मन इदम् इत्यादि० अमुताभिमूर्ध्वाहा, नारिष्टाभ्याम् इदम् । यं वा देवाः ० यजन्ती स्वाहा० , नारिष्टाभ्यामिदम् । राकादीनामपि जुहुतिपक्षे- राकायै स्वाहा

- -

(टि० क० पृ० पृ०)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सिनीवाल्यै स्वाहा न कुह्वाहुतिः । सपत्नीवती तत्नुः यथा देवा इति पञ्चाहुता हुतयः।

राकांसिनीवाल्यथ पत्निसंग

नारिष्टकः प्राक् गुरुपत्न्यीष्टमिति कल्पकारः।

एवं च कल्पोक्ताश्चत्वारः पत्नीसंयाजा इत्येकः पक्षः। कल्पोक्ता-श्चत्वारः कर्मान्तोक्तास्त्रयश्च वषट्कारप्रधानाः सपत्नीसोमादयस्तु: स्रुवाहुत्य इति द्वितीयः । कल्पोक्ताश्चत्वार एव वषट्कारप्रधाना राका-दीनाम् पञ्चस्रुवाहुत्य इति तृतीयः । अत्र केचित् कुह्वा- अनन्तरमनुमतियागं याज्यपदे स्रुवाहुतिपदे च स्रुवाहुतिमिच्छन्ति , तथा सूत्रभाष्ययोरदर्शना-दुपेक्ष्यम् । अत्र प्रजा कामो राकां सिनीवालीं कुहूमिति ,प्राग्गृहपतेरित्याश्वला-यनः । राकां पुत्रकामो यजेत ,[2]सिनीवालीं पशुकामः , कुहूं पुष्टिकामो, नित्य-वदेके समामनन्ति । पुरस्ताद्देवपत्नीभ्य एता एके समामनन्ति इत्युपरिष्टा-दित्यापस्तम्बः। नामोपत्नीसंयाजाराकादयः किन्तु तत्फलभावीनि काम्यानि यागान्तराणि । कुतः ? पूर्वत्र सोमादीनां परिगणनात् चत्वारः पत्नी-संयाजाः इति श्रुतेश्च ।

१- राकां पुत्रकामो यजेत सिनीवालीं पशुकामः कुहूं पुष्टिकामः । इति भा०सू० पत्नीसंयाग मध्ये पठिता एता देवताः काम्या नपत्नीसंयाजाः अतश्चत्वारः पत्नीसंयाजाः इति श्रुतेश्च ।

द्र० दर्शपूर्णमास प्रकाशः, पृ० ३५८ ।

२- द्र० दर्शपूर्णमास प्रकाश, पृ० ३५८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

१

अथाग्रेण होतारमुपातीत्य होतुरिरड०गुलावनक्ति, त्रिरेण मदायित्वा व्याख्यातमेतद् । चतुर्होता (न) च दंडां सम्भावयत्याज्येन आज्यस्थाल्या स्रुवेण होतुर्दक्षिणे समान्वारभेते अध्वर्युरेव पत्नी च । पत्नीत्येव न (च) विवक्षितम् । अविशेषाददृष्टार्थत्वाच्च एष शब्दः संनिहिताग्नीध्रभ्याद्-त्वर्थः, उपहूतायामिडायामग्नीध्र आदधाति षडवत्तं आज्यस्थाल्याः स्रुवेण। प्राश्नीतो मार्जयतो आग्नीध्रहोतारौ इडां होताषडवत्तमितरः। अन्यारेव भक्षणं मदाणं द्रव्यसम्बन्धात् नेतरयोरध्वर्युपत्न्योः, मार्जनं च सन्निधानात् ।

संकुलाकरणविचारः

पत्नीसंयाजेषु संकुलाकस्य करण इति कुर्यादिति बोधायनो, न कुर्यादिति शालीकिः। करणपक्षे, इडामार्जनानन्तरं स्वगावेद्या होतृ-भ्य इति सम्प्रैणादि ।

अथ स्रुचि चतुर्गृहीतं गृहीत्वाप्रक्षिणेः(प्रदक्षिणः) पर्यावृत्यन्वाहार्य-पचने प्रायश्चित्तं जुहोति – उत्सूलेष्वेतद० दुष्वपिकृष्णाजिन० यत्कामाते जुहोमि स्वाहेति ,विश्वेभ्यो देवेभ्यो इदम् । न मन्त्रवत: यज्ञांगेनानात्मान-मभिपरिहरणार्थमवर्तो रति वचनम् । कर्मान्ते यथोपतंशालीके कल्पं वेदकरो

१- पूर्ववहोतुरड०गुलीपर्वणी अङ्०वत्वापस्पृष्टोदकाय होतुर्दक्षे चतुर आज्य बिन्दून्निदधाति आग्नीध्रः ।

द्र० दर्शपूर्णमास प्रकाश:, पृ० ३५८ ।

२-द्र० दर्शपूर्णमास प्रकाश: ,पृ०३५८-५९-६० ।

३- यथेतमाहवनीयं गत्वा चतुर्गृह्य स्रुवेण सर्व प्रायश्चित्तानि जुहोति। अविज्ञात-दोष निमित्तार्थानि सर्वप्रायश्चित्तानिनिमित्तविशेष संयोगाभावान्नैमित्तिक विशेष, संयुक्त विशेषनिमित्त संपात प्रधाने तदेव तन्निमित्तिकं भवति ।
-द्र० दर्शपूर्णमास प्रकाश: ,पृ० ३६३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पत्नीसंयाजेषु, सर्वं सव्यचारेण गार्हपत्यं परिक्रामेयुरित्यनायुक्तैव याम फलीकरण-होमो होतव्यो भवतीति । यज्ञाभिपरिहरणाभावादिति भाव:। अपरं चतुर्गृहीतं गृहीत्वान्वाहार्यपचन इध्म प्रव्रश्चनान्यभ्याधाय फलीकरणानोप्य फलीकरण-होमं[1] जुहोति- अग्नेऽदब्धायो० यौ निस्थाहेति(यौ निधाहेति), अग्ने अदब्धायो अशी-त तनू स्वाहा । फलीकरणहोममिति वचनार्थव्यावर्तनीयतण्डुलविवेकमनुनिष्पादि-फलीकरणाभावेऽप्ययं होम इति केचित् । अन्ये तु समाख्या संव्यवहाराभ्यां, वीतदर्शीयादौ पशौ तु प्रायश्चित्तं कृत्वा न फलीकरणहोमेन चरतीत्यनु-पात्तो न प्राप्त: प्रतिषेध इति च । उलूखले मुसल इति तु वचनमेव उलूखलादि - संश्लिष्टप्रतिपत्त्यर्थत्वाभावात् ।

प्रायश्चित्तहोमादिविचारा:

प्रायश्चित्तं जुहोतीति चतुर्गृहीताज्यस्यैव होमविधानात् मन्त्रलिङ्गो-पपत्ति: विष्णुर्होममन्त्रोऽतव्या । वेदे यजमानं वाचयति - वेदोऽसि वित्तिरसि विदेय० वाचिकमित्येतदनुवाकस्य वेदे विषये वेदं प्रदर्श्य तं प्रेक्षमाणं यजमानं वाचयाञ्चक्र वाचयतीति । वेदं यजमानाय प्रदाय तं प्रेक्षमाणं वाचयतीत्यन्ये। वेदे यजमानं वाचयतीति सूत्रं शालीकेरनोक्त्यात बौधायनो वेदोऽसि वित्तिरसि विदेयेति यजुस्त्रानुवाक्याभिध्यायेदस्य नाम गृह्णामि वाक्यैवास्य सर्वं सूक्तं इति । सूत्रं कात्यायनेन वाचनं द्वितीय: , ध्यानं भ्रातृव्यस्य सम्यग्ध्यानाभावेवेत्यनन्तरं देवदत्तस्य प्रजां पशून् धनमित्यादि तत: अगारीति समानम् । विदेय पाप्मनो व्या-वृत्तिमिति तु भिन्नम् ।

कर्मैव प्रीतमेत्य होमे वेदं प्रदाय पत्नी विष्यति(विष्यति) वा ।

१- फलीकरण होमं पूर्वोक्तवत् विपरीतं चतुर्गृहीत आज्ये फलीकरणानोप्याग्ने-ऽदब्धायोऽशीततनो इति जुहोत्येवं पिष्टलेपान् उलूखले मुसलेऽथच्च शूर्पे चाक्षिरवेण दृषदि चरुयाहे ।

द्र० दर्शपूर्णमास प्रकाश: , पृ०३१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यथेतमिति यथागतमावेष्टयन्नु इत्य आगत्य पत्नी समीपमागत्य विष्यति मु
मुञ्चति [1] : क्वापि हेतुर्वा त्रेता पत्नीवाचनादी स्त्री अध्वर्युः
पत्न्यायोक्त्रं विमोक्ष्यतीति - इमं विष्यामि० केत: धातुश्च० स्योनं मे
सह प्रत्याकरोमीति ।व्याख्या योक्त्रया ग्रंथिमुद् इत्याश्वलायन: ।अस्या
वीप्सायाम् ।अस्या इति
इति प्रतिपत्नीं कर्म संभावुर्भ्रवति । ध्यावद्व: कर्मोन्मन्यार्थ: । यत्स्व-
र्गांक्यति स एव योक्त्रं विमुच इति , विमुखी विमुञ्चति पत्नीमित्यर्थ:,
इति भद्रक प्रक्रिया त्रेता वा विमुञ्चति । व्याख्ये योक्त्रम् अन्त्काधायो-
पयाम्नान्यति - समायुषा० तनूपामीति । उपपात्रं उदकं पूर्णं यस्मि-
न्निदमात्रं पात्रपूर्णमुदकमित्यर्थ: ।

अथ मुखं विमृष्टे- यदप्स्वन्त० मुखाद्य०पिबन्त्यति ।अंभो-
स्थमुदकं भूमौ निनीयार्द्रेण हस्तेन पत्नीमुखं विमृष्टे ।यथा निनयत्यप्सुदेव
इदं कुर्वीतिप्रति । आनीयमाने समायुषेति पत्नी जपति कल्याणाय ।

तथाऽऽपस्तम्ब:- तस्या: संपूर्णकर्मी पूर्णपात्रमानयति -
समायुषा संब्रवीत्यानीयमाने जपतीति ।

अथैनं तथैव शिर:पवित्रमपवावामयति- प्रयस्वती: इत्युदीरि
पावमानादि उर्ध्वं पूर्ववत् ।अथैनां तथैव गार्हपत्ये दक्षिण वाचयति - अग्ने-
व्रतपते व्रतचारिणं तवतं तन्वी राधि स्वाहा । वायो० तन्वी राधि स्वाहा।
आदित्यव्रत० तन्वी राधि स्वाहा । व्रतानां० तन्वीराधिस्वाहेति । यथालिंगं
त्यागा: । आचन्त्यर्थ: परिणीयनं च , अथ यथाप्रपन्नं निष्क्रामति तीर्थे-
नैव अध्वर्यु: । अथ यथेतं प्राङ्०त्य ध्रुवामाप्याययति । यथेतमागमनीयां
गत्वेत्यापस्तम्ब: । आज्यस्थाल्या: स्रुवेणोपहत्य ध्रुवामाप्याययति- आप्या-

- -

१- वेदीरिमं विष्यामीति पत्नी योक्त्रपाशं विमुञ्चति तथा:- तयोक्ते
अन्तौ पूर्णपात्रमानयति । समायुषा संब्रवीत्यानीयमाने जपति निनीय

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कार्यं ध्रुवाज्येन० यजेदिन्निति । ध्रुवामाप्यायमानां यजमानोऽनुमन्त्रयते एतेनैव मन्त्रेण ।

अथ यजमानभागं प्राश्नाति , प्रजापतेर्भागो० यजमानेनेति । स यजमानराशिनेति वा यजमानेन विकल्पः प्रदर्शितः । तत्र यजमानेनेत्य-नेन तत्र विकल्प इति केचित् । कात्यायनो यदा तत्तु बौधायनस्य कर्मं वैक-ल्पो प्रस्तरः प्रस्तरेणैवास्य सह यजमानभागमनु प्रहरेत् ध्रुवादेवाज्यमुप-स्तीर्य जुहूमवधाय जुहुयात् प्रस्तरमूर्धं यजमानभागो गच्छतीति प्रस्तर प्रस्तरेणैवास्य तद्यजमानभागमनुप्रहरेदिति [2]। अथ यदि यजमानस्तत्रा यां वा भवति प्रक्षाति वा तस्माद बौधायनः प्रस्तरः प्रस्तरेणैवास्य सह यजमानभागमनुप्रहरेद् ध्रुवायै वाज्येन पर्युपस्तीर्य जुहूमवधाय जुहुयात् प्रस्तरमूर्धं यजमानभागो गच्छतीति । इति बौधायनवचनमनूद्य ध्रुवा-यै वाज्येनेति विकल्पयता गौरवादुपेक्ष्य स्त्रुक्संघं कात्यायनः प्रस्तरः प्रस्तरेणैवेति एव न्यायः पाठक्रमेण प्रस्तरप्रहरणेन सह तस्यात्यन्त-मिति । उपस्तरणाभिघारणार्थं प्रस्तरप्रहरणकाले तदानुग्रहणार्थं कर्तव्यं कात्यायनस्याभिप्रायः । ध्रुवायैवाज्येनेत्यस्मिन् पक्षे यजमानभागप्रहरणकाल एव ध्रुवाज्येन जुह्वामुपस्तीर्याधायाभिघार्यानीय जुहुयात् प्रजापतेर्भागो-ऽसीति मन्त्रेण स्वाहाकारान्ते न ।

आज्यस्थाल्याः स्रुवेणादाय प्रायश्चित्तानि जुहोति । पत्नीसं-याजादिष्वाज्यस्थालीग्रहणमनादिष्टे ध्रौवादिति आपस्तम्ब । प्रायश्चित्ता-नीति वक्ष्यमाणं दोषनिर्घातार्थमित्यल्पत्वादानुषंगिकी दोषनिर्घातिनी भवति

---

१ मूर्धं विष्णोर्विष्ठाति ।

द्र० दर्शपूर्णमास प्रकाश: , पृ०३११

२–बौ० श्रौ० सू० ११६२।६०।२०–२४।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कन्यलिंगानीदं च म (आ) शीकिमत्यां आर्धितं ० देवान्स्वाहा ।

व्यस्तमुहितीविचार:

यज्ञार्थं पय कृत व्यस्तमुहिर्भुवीति, व्यस्तमुहितिरिति संज्ञा । इष्टेभ्य: स्वाहा , इष्टेभ्य इदं वषडनिष्टेभ्य: स्वाहा वषडनिष्टेभ्य इदम् । भेषजं दुरिष्ट्यै स्वाहा, भेषजं दुरिष्ट्या इदम् ।निष्कृत्यै स्वाहा, निष्कृत्याय इदम् ।दौराध्यै स्वाहा , दौराध्यां इदम्[१] । दैवीभ्यस्तनूभ्य: स्वाहा , दैवीभ्यस्तनूभ्य इदं । ऋध्यै स्वाहा, अग्नय इदम् । भुव:स्वाहा, वायव इदम् । सर्वसमृध्यै स्वाहा, सर्वसमृध्या इदं नमम। इति व्यस्तसमुच्चय:। भू: स्वाहा, अग्नय इदम् । भुव:- स्वाहा , वायव इदम् । स्व: स्वाहा, सूर्यायेदम् । भूर्भुव: स्व: स्वाहा ,प्रजापतय इदं । इमं मे वरुण० रायके स्वाहा, वरुणायेदम् ।तत्वायामि० प्रमोषी: स्वाहा ,वरुणायेदं। त्वन्नो अग्ने० मुमुग्ध्यस्वाहा , अग्नीवरुणाभ्यामिदम् ।सत्वन्नो० दीप- स्वाहा, अग्नीवरुणाभ्यामिदम् । त्वमग्ने० अयासि भेषजं स्वाहा,अग्नये अयस इदम् । अयाश्चाग्नेरनभिशस्तीश्च सत्यमित्वमया असि ।अयसानसा हविषा० भेषजं स्वाहा, अग्नये अयस: इदम् । यदस्मिन् कर्मण्यन्तरागां मन्त्र: कर्मणो वा अन्यथा कृत्वा तत्क्षमामि इदं सुप्वन्तु० येवा वाचापां कृत्वा स्वाहा । देवेभ्य इदम् । यदस्य कर्मणो० सुहुतं करोतु मे० अग्नये[२] स्विष्टकृते सुहुतहुत आहुतीनां कामानां समर्धयित्रे स्वाहा ,अग्नये स्विष्टकृते

१- पु० दर्शपूर्णमास प्रकाश: , पृ०३२।

२- - तत्रैव -

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इदम् । प्रजानां० स्त्रीणां (स्त्रीणां) स्वाहा, प्रजापतय इदम् । इति नित्यानि ।

अथ ध्रुवाज्यात्स्रुवेण पयान्नं ध्रुवा वा सद्भुत्सह्नुहोति — ध्रुव प्रतिष्ठा मना— इत्यनेनानुवाकेन[२] प्रत्यृचं, मन्त्रगणान्० (भातानि) गणानि जुहुयात् ध्रुव प्रतिष्ठा० देवान्स्वाहा, ध्रुवाय इदम् । आधाविष्णो० देवान्स्वाहा कामायेदम् । यस्वो देवाः निर्ऋतेन स्वाहा, मरुद्भ्यः इदं । तदम पापः अर्थाय स्वाहा, अनुभ्य इदम् । यद्वर्चं० रूपं स्वाहा, सूर्यायेदं उदुत्यं० सूर्ये स्वाहा सूर्यायेदं । चित्रं देवानां० यस्य स्वाहा, सूर्यायेदं । इमं मे वरुण, तत्त्वायामि, त्वन्नो अग्ने, सत्वन्नो अग्ने, त्वमग्ने अयासि, प्रजापतेनत्वम्, इमं जीवेभ्यः मेधां० वधतां, पर्वतेन स्वाहा, अग्नय इदं । मृत्युसूक्ते पाठान्मृत्युर्वा देवता इष्टेभ्य इत्यष्टौ । एवा इन्द्र० पति स्वाहा, इन्द्रायेदम् । स्वस्तिदा० अभयं-कर स्वाहा, इन्द्रायाभयंकरायेदं । यामिर्गीर्भिः स्याम स्वाहा, इन्द्राय हरिवते वर्धमानायेदम् । अनाज्ञातम् ० तथं स्वाहा, अग्नय इदम् । पुरुषसंमि० तथा स्वाहा, अग्नय इदम् । ~~पुरुषसंमि० तथा स्वाहा, अग्नय इदम्~~ । यत्पाकत्रा० कवि स्वाहा, अग्नय इदम् । यद्वान आत्मनो० मिथुणीस्वाहा, अग्नये जातवेदसे० इदम् । पुनरूर्जा० मद्योस्वाहा, आग्नीध्र बृहस्पत्यादिभ्य इदम् । पुनस्त्वादित्याः ० कामास्वाहा, अग्नये व्रतपतये अग्नय इदम् । प्रत्यग्ने-तथा समिधमाधायैतथैव ध्रुवाहुतिं जुहुयात्, स्वरग्न्युपधातप्रायश्चित्तम् । सर्वेण् यजमानः पत्नी: संयाज्य प्राशित्य ध्रुवामाप्या(प्याय्य) ध्रुवतः सर्वप्रायश्चित्तानि जुहोति । ध्रुव प्रतिष्ठा मना, इत्येतेनानुवाकेन प्रत्यृचमयवै भवतिष्ठ कर्माणि जुहोति यज्ञस्य समिष्ट्यै, यदि यज्ञस्य क्रूरं यद्विलिष्टं यदत्येति यन्ना-त्येति यदति करोति यन्नापि करोति तदेवैः प्रीणातीति, ब्राह्मणम् । तता-न्येव ब्राह्मणविहितानीज्याप्यायनानि + मन्त्रवन्ति भवन्तीति बौधायनो, मन्त्रगणात्मातानि नैमित्तिकानीति शालीकिः । ~~सूत्रैर्नैमित्तिकानीति शालीकिः~~

- -

२– ध्रु० दर्शपूर्णमास प्रकरी, सू०१–१३।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सुचीमिति कल्पोक्तौ प्रतिष्ठेत्यादीनां स्रुवाहुतिविधानादत्रापि स्रुवाहुत्य एव नित्यत्वेन ,प्रतिग्रहणाभावादेशे परिभाषायां जुह्वा सह ग्रहं जुह्वाभिधिकरणाज्जुह्वा सह गृहीतेन होमः। इतरो यत्रेणं(अधिकारेण) प्रायश्चित्तं भूः स्वाहेति गार्हपत्ये, अनुष्टौ यजुर्गणप्रायश्चित्तं भुवः स्वाहे-त्यन्वाहार्यपचने । सर्वत्र यज्ञगणप्रायश्चित्तं भूर्भुवः स्वः स्वाहेत्याहवनीये जुहोति । अथवा (अथवा) क्रमादयो होतव्या, प्राग्वासमिष्टयजुष इति वचनात् । अथ बर्हिषो धातूनां सम्प्लुष्य जुह्वायां समनक्ति । स्तीर्णस्य बर्हिषो धातूनां सम्बन्धि एकदेशं गृहीत्वा सम्प्लुष्य एकीकृत्य समन-क्तीत्यर्थः। समंक्ता बर्हिः- इत्यादिनाभिमिति । अथेतामध्वनीकेऽनुप्रहरति -दिव्यं धाम गच्छतु बर्हिस्वाहेति , दिव्याय नमः स्वाहा।

समिष्टयजुर्होमविचारः

अथोपोत्थायवदारणेन यथावेदिमभिक्रम्य जुह्वा समिष्टयजुर्जुहोति-देवा गातुविदो गातुं वित्त्वा गातुमित० वातेधाः स्वाहेति । देवेभ्यो गातुविद्भ्यो यज्ञाय पवमानाय स्वाहा । उद्धरन्ति स्रुचम् । स्रुचामात्मनोऽग्रेण प्रायोगूहीयां परिष्ठति । द्वे समिष्टयजुषि जुहोति उपोत्थायाऽनन्यानुप-तिष्ठते, अयाडग्निः यज्ञं उभयो जातवेदा यज्ञश्री अन्ततः पूर्वो अस्मिन्नि-षद्य । इमं नो अग्ने सुक्रतुः विमुञ्चेत्यादि जातवेदो यज्ञमिति । स एतेन हुता भवति दर्शपूर्णमासयोरिष्टीनां चातुर्मास्यानां पशुबन्धस्य सौ-त्रामण्या इति । निनयति प्रणीताः । अथाने उत्तरस्य यजमानस्य परिस्तर-भागार्थम् । उपोत्थाय यजमानो दक्षिणेन वेदिं विष्णुक्रमान् क्रमते । अत्रापि यजमाने विस्तरेणाधिकारस्य विष्णुक्रमणस्येह पुनर्वचनं प्रमादोऽपीह ऋत्विजः अपरार्धे संतिष्ठन्ते आमावास्यां वा पौर्णमासं वा हविः सन्ति-ष्ठत इति वचनमध्वर्यवोऽनाभ्याभिप्रायम् । चास्य: समुच्चयार्थः । निनयति प्रणीता इत्युक्तं , तत्प्रकारमाह, अध्वर्युर्ब्रह्मेत्यूर्णपात्रम~~स्मीति निनयति पूर्ण-~~

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पात्रमन्तर्वेदि निधाय पूर्णपात्रे यजमानं वाचयति - ,सदसि सानेदोष्टा इति। पात्रपूर्णमुक्तं पूर्णपात्रमेतदिति सिद्धवचनात् प्रणीतापात्रमन्तर्वेदि निनयति, प्रणीता इति वचनाच्च । पूर्णपात्रे पूर्णपात्रं प्रेक्षमाणमिति पूर्वम् ।

